Dharma Dwaita Nirnayah : Title

Bhatta Śankara Son of : Author

Nārāyana : Editor

: Year, Vols.

~~Bhatt Shankar Narayana~~) : Publisher

9 : Remarks

द्वैतनिर्ण.

१

श्रीगणेशायनमः ॥ शुंडादंडविलो — — बमुद्द्रग्वारयंतंजनप्रत्यूहान्महतो निशाकरकरव्रातंव्रतंबिभ्रता दंतद्योतित
दिङ्मुखेनहसितेनानंदयंतंशिवौशांतंतंधिशुमाश्रयेहमनयोःखेलंतमाराभ्युरः १ पौलस्त्यस्यप्रहर्त्तातदनुजवि
विभिभंयस्यापिदाताकवीनाभर्त्तारण्यस्यगंतापशुपतिधनुषोमर्दिताभार्गवस्य जेताविश्वस्यपीतापितुरुपच
रिताजानकीशोकशल्यशेस्योद्धर्त्तासेतुकर्त्तामममसुसुखयिताबालिहर्त्तासभूयात् २ उदयमेतियस्यविलयेविश्वं
यस्योदयेपुनरुहेति किमपिमहोमहनीयमानसतमसःशमासंवदेहं ३ मीमांसासरसिसरोजमकरंदास्वादने
कव्रतोहंसःस्वीययशःसिताद्वयमनेरस्तान्यनृपाभिधः वाग्देव्यागतमत्सरांश्रियमयंनित्यानुरक्तामजन्मो
मुंचन्नविमुक्तकंविजयतेश्रीभट्टनारायणः ४ विबुधानंद — — — — — हेतवेतत्तनूद्भवः मीमांसाद्वैतसाम्राज्य
भीतिजोम — — — रः ५ मेधानिधिश्चापरार्कविज्ञानिश्वयोभिदा स्मृत्यर्थसारकर्त्तुश्चकालादर्शकृतस्तथा ६ चंद्रिका शिव
कारहेमाद्रीमाधवश्चनृसिंहयोः गुरोश्चत्रिस्थलीसेतुकर्त्तुर्शाल्वामतास्तथा ७ दाक्षिणात्यमतेस्थित्वाधर्मद्वैतेषु १

निर्णयं तनुते रिगाद्येवनावमान्यःकथंचन ८ तत्रनवरात्रद्वैतनिर्णयस्तावदुच्यते तत्राश्विनशुक्लप्रतिपदंनवरात्रव्रतानुष्ठा
नेद्वैधेवोपारन्नेलोकः कश्चिदमाविद्धांपूर्वांइतरउत्तरांद्वितीयाविद्धामिति तथापारणामपिकेचिन्नवम्यामेवान्येदंति
अपरेदशम्यामितिविप्रतिपद्यंतेलोकाः तन्निर्णयप्रवृत्ताश्चाधुनिकानिबंधकृतोविप्रतिपद्यंते यथानृसिंहप्रसादंदुर्गा
वतीप्रकाशादावमाविद्धाप्रतिपदुक्ता वाक्यानिचोदाहृतानि अमायुक्तैवकर्तव्याप्रतिपच्चंडिकार्चने नग्राह्यापरसंयु
क्ताशुद्धसंतानकांक्षिभिरिति लल्लसंहितायां द्वितीयालेशसंयुक्ताप्रतिपच्चंडिकार्चने मोहाद्यथोपदेशाद्वाकृता
पुत्रविनाशका आरंभेनवरात्रस्यद्वितीयाहरि — ता नकेवलंतिथिंहंतिवंधात्मापुत्रसंपदं तथाद्वितीया — पेताप्रतिप
च्चंडिकार्चने गृहीतानाशयत्येषासंततिंपुत्रपौत्रिकीं द्वितीयादिपदोपेताप्रतिपच्चंडिकार्चने वर्जनीया — बलकृतायुक्तं ।
श्रीदेव्युवाच प्रतिपद्वेषसंयुक्ताद्वितीयायांसमर्चनं कृतंधर्मनाशयतिसंततिंपुत्रपौत्रिकीं अमायुक्तैवसाग्राह्याप्रति
पच्चंडिकार्चने अन्यथाकरणेदोषोराज्यभंगःप्रजायते परशुरामप्रसादकृतादिभिस्तुद्वितीयाविद्धाप्रतिपदुक्ता ।

वाक्यानि वोदाहृतानि अमायुक्तानकर्तव्याप्रतिपत्पूजनेमम मुहूर्त्तमात्राकर्त्तव्याद्वितीयादिगुणान्विता द्वितीयायाआदित्त
 वाक्यानि वोदाहृतानि अमायुक्तानकर्तव्याप्रतिपत्पूजनेमम मुहूर्त्तमात्राकर्त्तव्याद्वितीयादिगुणान्विते प्रतिपच्छरदिज्ञानात्सोश्नुतेफलमव्ययं यदिमोहा
द्रूपेणगुणेनान्वितेत्यर्थः मनुः योमांप्रपूजयेन्नित्यंद्वितीयादिगुणान्विते प्रतिपच्छरदिज्ञानात्सोश्नुतेफलमव्ययं यदिमोहा
त्प्रकुरुतेप्रथमेस्थापनंमम तस्यशापायुतंदत्वाभस्मशेषंकरोम्यहं आग्रहात्कुरुतेयश्चप्रथमेस्थापनंमम तस्यसंपद्विना
२ शःस्यात्ज्येष्ठःपुत्रोविनश्यति पुनरपिमनुः पूर्वविद्धातुयाशुक्लाभवेत्प्रतिपदाश्विने नवरात्रव्रतंतस्यांनकार्यंशुभमिच्छता
तिथीनांप्रवरायस्माद्ब्रह्मणासमुदाहृता प्रतिपादितायदापूर्वंप्रतिपत्तेनसोच्यते तिस्रोह्येताःपराःप्रोक्तास्तिथयःकुरु
नंदन कार्तिक्याश्वयुजेमासिचैत्रेमासिचभारत देवीपुराणे आश्विनस्यसितेपक्षेप्रतिपत्सुयथाक्रमं सुस्नातस्तिल
तैलेनपूर्वाह्णेपूजयेच्छिवां तथाचतत्रैव दर्शाभंगोभवेत्तत्रदुर्भिक्षंचोपजायते नंदायांदर्शयुक्तायांयदिस्यान्ममपूजनं
६ तस्माद्द्वितीयान्विताराजन्नवरात्रेप्रशस्यते आश्विनेमासिमेभक्तैः कर्तव्याशुक्लपक्षगा प्रतिपत्त्रिमुहूर्तायापुत्रपौत्र शिव २
प्रवर्द्धिनी धनवृद्धिकरीपुंसांसर्वसौख्यकरीतथा अतोन्यथानकर्त्तव्यानवरात्रव्रतेमम मार्कंडेयोपि सुस्नातस्ति

लतैलेनवापराह्णेमहामुने प्रतिपद्याश्विनेमासिशुद्धेविद्धेथभद्रया प्रतिपत्तिथौ भद्रकालींस्तुवीतार्यश्रद्धाभक्तिसमन्वि
तः डामरकल्पेनवमेध्याये आश्विनस्यसितेपक्षेप्रतिपत्सुयथाक्रमं सुस्नातस्तिलतैलेनपूर्वाह्णेपूजयेच्छिवामित्युप
क्रम्याग्रेप्रतिपद्याश्विनेमासिशुद्धेविद्धेथभद्रया पुण्याहवाचनंकृत्वाजपपश्चात्समारभेदितिस्पष्टमेवद्वितीया
विद्धाप्रतिपद्विहि-- नामान्युभयविधान्यपिवाक्यानिक्वापिकिलपुराणस्मृतौचेद न्वेषणेथउपलंभात्प्रामाणि
कनिबंधेषुवालिखनादनाकराण्येवतावत् साकरत्वेप्युभयेषामनिर्णायकत्वात् हेमाद्रिणासामान्यनिर्णयमेवप्रतिपा
दिकेविदार्यंते अपरेतुमाधवीयलिखितविशेषनिर्णयमेव वयंतुतदुभयविषयनिर्णयमेवोपपादनपूर्वकंनिर्णयंवरा
मः तस्यचनिर्णयस्यतस्वरूपनिर्णयापन्नत्वात्तत्तावन्निर्णीयते तत्रस्कांदमार्कंडेयभविष्योत्तरेषुयुधिष्ठिरेणकस्मात्काला
त्प्रवृत्तेयमित्यादिष्टेश्रीकृष्णेनन्नृपभेदैर्नामभेदैर्भवानीपूज्यतेशिवा गंधर्वैरुरगैर्यक्षैः पूज्यतेकिंनरैर्नरैः नवम्यां
पूजितांदेवीसाददात्यक्षयंफलं सैवकालीमहादेवीयशोदागर्भसंभवा कंसासुरस्योत्तमांगेपादंकृत्वागताविय
ततः प्रभृतिदैत्यघ्नीयशोदानंदिनीमया विंध्याचलेपूजयित्वापुनःपूजाप्रवर्तिता आश्विनेमासिमेधांतेमहिषा

द्वैतनि. सुरमर्दिनी देवींसंपूजयित्वायेअर्धरात्रेष्टमीषु च क्रीडंतिविविधैर्भोगैर्देवलोकेसुदुर्लभे नाधयोव्याधयस्तेषांनचशत्रुभयंभवेत्
२ यावद्भूर्यावदाकाशंजलंवह्निःशशीग्रहाः तास्तास्ताःश्चंडिकापूज्याभविष्यतिसदाभुवि एतत्तेदेवराजेंद्रस्वर्गावाप्तिफलप्रदं
परापरविभागेनतवभक्त्याप्रकीर्त्तितं मित्युपक्रम्यमध्याद्द्रस्यशेषोपसंहारेषुपूजायाएवकीर्त्तनात् तस्याएवचफलसंबंधाव
नात्प्राधान्यमवगम्यते हेमाद्रौमदनरत्नेचव्रतखंडेभविष्ये एवंचविंध्यवासिन्यांनवरात्रोपवासतः एकभुक्तेननक्तेनस्वशक्त्याया
चितेनवा अथवानवनक्तैश्चनवरात्रंसमापयेत् इतिक्वचित्कर्तृविशेषणत्वेनश्रवणादितरत्रापितात्पर्यन्यायेन दत्तोधावतिनखा
निनिकृंततिस्नातीत्यादिवत्स्कालिसंस्कारकतया विकल्पेनोपवासादीनामंगत्वावसाय्यात् एवं मासिचाश्वयुजेशुक्ले
नवरात्रेविशेषतः संपूज्यनवदुर्गांश्चनक्तंकुर्यात्समाहितः तथाहेमाद्रिव्रतखंडे पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे
गृहेगृहेशक्तिपरैःग्रामेग्रामेवनेवने स्नातैःप्रमुदितैर्हृष्टैःब्राह्मणैःक्षत्रियैर्नृप वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैः
स्त्रीभिश्चकुरुशार्दूल तद्विधानमिदंशृणु नवरात्राभिधंकर्मनक्तव्रतमितिश्रुतं धर्मार्थकाममोक्षार्थमनुष्ठेयंद्विजा शिव
तिभिःफलपुष्पोपहारैश्चचंडिकामभिपूजयेत् वर्षेवर्षेचकर्तव्यंनरैर्भक्तिपरायणैरित्येतेष्वपिवाक्येषुपूजनीयेत्यु २

पक्रमादभिपूजयेदित्युपसंहारात्प्राधान्येननिश्चिते प्रकरणे संपूज्यनक्तंकुर्यात् इत्यत्रवाजपेयेनेष्ट्वाबृहस्पतिसवेनयजेतेतिव
दंगिन्येव रप्रत्यययोगांगिसंबंधेनैवावार्थात्तद्देवप्रधानोत्तरवचनविधाननक्तरूपांगविधानात्कालार्थसंयोगफललाभःअ
त्रनवरात्रपूजाव्रतकर्मणे नामधेयंनवरात्रमितितत्प्रख्यन्यायसहकृतसामानाधिकरण्यात् सामानाधिकरण्येतावन्ना
रदीयपुराणे आश्विनस्यसितेपक्षेनवरात्रव्रतंशुभं आदौप्रतिपदंप्राप्य तिथिंचंडीमनःप्रियां प्रतापरुद्रनिबंधेमदन
रत्नव्रतखंडेचहेमाद्रिव्रतखंडेधौम्यः आश्विनेशुक्लपक्षेतुकर्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् त्रिरा
त्रंवापिकर्त्तव्यंसप्तम्यादियथाक्रमं अत्रोत्तरार्धेप्रतिपदादिनवम्यंततिथिनवकरूपकालस्यगुणविधानात्पूर्वार्धग
तेनवरात्रशब्देतत्प्रख्यन्यायविषयत्वमपियुक्तंनचायंनियमः समस्तवाक्यांतरीयमेवनाम्नःप्रवृत्तिनिमित्तंभवती
तिउद्भिदादौस्ववाक्यलब्धस्यापिफलोद्देशस्यनिमित्तत्वाभ्युपगमात् सतुदेवीवाक्यांतरेपुराणेपिकालविधिः
आश्विनेप्रतिपन्मुख्याःपुण्यास्तुतिथयोत्तवे देविकापूजनेप्रोक्ताःसर्वकामफलप्रदाः प्रागुपक्रम्यस्तभविष्योत्तरी
यवाक्यंतुनवरात्राभिधंकर्मैतिनवरात्रमित्यभिधानायत्ये

द्वैतनि॰ त्येवंदेवदत्ताभिधोयमित्यादिवदस्पष्टमेवशक्तिग्राहकं अथवानवरात्रंवसप्तमंवत्रिकादिवा एकभक्तेननक्तेनायाचितो
पोषितैःक्रमात् इतिकालिकापुराणवाक्यगतस्तुसप्तपंचत्रिकादिशब्दानांदिगतसंख्याविशेषवाचित्वात्तद्वैकल्पि
कसंख्यांतरविधायितयाविशेषप्रधानोनवरात्रशब्दः केवलंगुणविधिः तत्रकालाध्वनोरत्यंतसंयोगइतिद्विती
४ यांतत्वाविरोधः एतेननवरात्रशब्देसार्वत्रिकंगुणविधित्वंनामधेयत्वमितिविवादंतोनिरस्ताः नन्वच्प्रत्यन्ववपू
र्वात्सामलोम्नइत्यत्रप्रत्ययस्यतत्पुरुषस्यांगुलेः संख्याव्ययादेरित्यतश्चसंख्याव्ययादेरित्यस्यानुवृत्तौअहःसर्वैक
देशसंख्यातपुण्याच्चरात्रेरित्यनेननवरात्रयः समाहृताइतिसमाहारद्विगोरच्प्रत्ययेद्विगुरेकवचनंसनपुंसकमितिसामान्य
विधौरात्राह्नाहाःपुंसीतिविशेषेणापोदितेपुनःसंख्यापूर्वस्यरात्रिशब्दस्यक्लीबतावाच्येत्यनेनप्रतिप्रसवादहर्गणविषयाद्विरात्रत्रि
रात्रादिशब्दवच्छांदसलिंगव्यत्ययोपपत्तेर्नपुंसकस्यनवरात्रशब्दस्यकालएवानुशासनात्गुणविधित्वमेवयुक्तमि शिव
तिचेत् नकिंचिदेतत्कालवचनस्यैवदर्शादिशब्दवत् विधिवाक्यादिगतसामानाधिकरण्यबलेनलक्षणयाहर्गण ४

विषयाद्विरात्रत्रिरात्रद्वादशाहशब्दवत्पूर्वोपपादिततत्संख्यानमयाकर्मनामतोपपत्तेः तदुक्तमाचार्यैः गौणंलाक्षणिकंचापिवाक्यभे
देनवास्वयं वेदोयमाश्रयत्यर्थकोनुतंप्रतिकूलयेत् इतिसद्वानवरात्रशब्दे द्विरात्रत्रिरात्रद्वादशाहादिशब्देष्विवबहुव्रीहिरेवछांदसस्तुसमा
सांतउपांशुयाजशब्दइवगुणविधावपिनजोः कुपिण्यतोरितिकृत्वस्याभावइति नचात्रावयवश्रुतोरात्रिशब्दोरात्रेरेववाचकः किंतुदशरात्र २
मशौचकमित्यादौदिवाहोरात्रवचनस्तिथीनामेवप्राप्तस्तत्परत्वादिति अथैतद्व्रतोपक्रमेकीदृशीप्रतिपदुपोष्येतिसंशयेहेमाद्रिमा
धवादिकृतनिर्णययोरेवगतत्वेतत्स्वरूपंतावत्प्रदर्श्यते तत्रापस्तंबीयंयुग्मवाक्यं प्रतिपत्सद्वितीयास्याद्वितीयाप्रतिपद्युतेति॰
तदिदंशुक्लकृष्णोभयविषयत्वात्सामान्यरूपंप्रतिपदमावास्येतिनिगमयुग्मवाक्येनशुक्लपक्षमात्रविषयत्वाद्विशेषरूपेणशुक्ल
प्रतिपदिबाध्यमानंनसर्वत्रबाध्यंतोबाधकस्यनिगमयुग्मवाक्यस्यपुरोडाशंचतुर्धाकरोतीत्यस्येवाग्नेयंचतुर्धाकरोतीत्यनेनव
त्युत्सवेउपवासेचपूर्वविद्धप्रतिपद्ग्राह्यत्वप्रतिपादकाभ्यांविशेषवाक्याभ्यांस्वविषयेउपसंहारस्यमाधवेनाभ्युपेयत्वात् त
थाचजाबालिः प्रतिपत्पंचमावेवउपोष्यापूर्वसंयुतेति स्मृत्यंतरेपि एकादशीतथाषष्ठीअमावास्याचतुर्थिका उपोष्याःप

५ रसंयुक्ताः पराः पूर्वेण संयुता इति। एतदेव परविद्धायामुपवासे निषेधमुखेन बृहद्वसिष्ठेनोक्तं। द्वितीया पंचवेधाद
शमी च त्रयोदशी। चतुर्दश्याश्चोपवासे हन्युः पूर्वोत्तरे तिथी इति वत्स्युस्तवेतु पूर्वविद्धा स्मरणं स्कांदे। श्रावणी दुर्गनवमी
तथा दूर्वाष्टमी च याः। पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्बलेर्दिनं इति। एवं वत्स्युस्तवोपवासयोरेव पूर्वेत्युपसंहृते क्रियता
पूर्वस्यपेक्षायां पैठीनसिना पंचमी सप्तमी चैव दशमी च त्रयोदशी। प्रतिपन्नवमी चैव कर्त्तव्या संमुखी तिथिरिति संमु
ख्येन ग्रास्य स्वउक्तं स्कंदे संमुखी नाम सायाह्नव्यापिनी दृश्यते यदा। प्रतिपत्संमुखी कार्या या भवेदापराह्निकी इति सं
मुख्या निर्वचनात्तु न रूपसंज्ञा रोगी रूतः। ततश्च माधवस्यापराह्नव्यापिनी मुख्या तदभावे सायाह्नव्यापिनी इत्युभय
विधेयायाश्च कृष्णप्रतिपत्तावत्स्युस्तवोपवासयोरेव पूर्वेति सामान्यनिर्णयो — —मतः। तथा च ते — — — सायाह्नव्यापि
वचनेन त्रिमुहूर्त्तवेधो विधीयते। अप — — — — कवचनेन ततोप्यधिकवेधः। तत्रोभयत्र शुक्लप्रतिपत्पूर्वैवोपोष्येति
तथा व्यासवचनेन पूर्वविद्धायाः शुक्लप्रतिपदि ये दैवपित्र्ये विहिते तयोर्देशब्देन प्रतिपन्निमित्त उपवासो वत्स्युस्तव
श्चेत्युभयमेव विवक्षितं वेचनांतराभ्यां तयोः श्रंह्णंग्राहिकया विधानादिति। हेमाद्रिणा तु न्यायतल्लाभिसंत ५

यास्कांदे पूर्वार्द्धसायाह्नव्याप्त्यासंमुख्यस्य सर्वतिथिषु सामान्यतो भिहितत्वयोत्तरार्द्धे प्रतिपत्तिथिविशेषे पराह्ण
व्याप्त्या संमुखेनाभिहितेन बाधमभिप्रेत्य अपराह्णव्यापिन्यामेव शुक्लप्रतिपद्युपवासादिनिर्णयस्य एव कृव
क्ष्यमाणत्वात्तद्भिन्नव्रतमात्रे पूर्वैत्युक्तं तदेवं सति सर्वापि कृष्णाप्रतिपच्छुक्लापि चोक्तविधोभयविषया त्वापरैवा
प्रतिपदापरत्वं व युग्मवाक्यादिति सामान्यनिर्णयस्तावत्सर्वनिबंधकाराणां संमतः। साचेयं नवरात्रप्रतिपन्मवत्युभ
यविषया त्या। ननु वलिप्रतिपद्भिन्नत्वेपि यदा मा विद्धास्यपराह्णे व्याप्नोति तदा हेमाद्रेरपि सायाह्नमात्रव्यात्वे
तु माधवस्यैव सामान्यनिर्णयविषयः। कदाचित्संपन्नोति न सर्वदा तत् द्वात्ये — — सार्वत्रिकी द्वितीया विद्धा सिध्यति।
मैवं। इहेदं निर्णीतं पू — — — नं चैकस्मिका निचोपवासे कभक्तनक्तायाचिता निफलितसंस्कारकृतयांगानीति। न
प्योंगभूतनक्तादौ नक्तादिव्रतपुरस्कारेणाभिहितो निर्णयः प्रवर्त्तते इति सर्वसंमतं। तदुक्तं माधवेन। अन्यांग
स्यैकभक्तादेस्य कालस्त्वंग्यनुसारतः। हेमाद्रिसिद्धांतो पिकालनिर्णयदीपिकायां। नान्यांगे यमभोजनं प्रतिनिधौ
नक्तैकभक्तेन यद इति। न चेदं वाचनिकं किंतु न्यायमूलकं। न्यायश्च प्रधानवशवर्त्तित्वादंगानां प्रधानांगतिथावेवा

नु।ष्ठेयत्वात्परस्यात्तैर्व्यर्थं निर्णयापेक्षास्तीति· सचार्थन्यायउपवासेप्यन्यांगभूतेतुस्यादिति माधवस्यैकभक्तग्रहणं
६ दीपिकाकृतश्च नक्तैकभक्तग्रहणमयाचितोपवासयोरप्युपलक्षणार्थं न पराण्हसायाह्नव्याप्तिमाविद्धोपवासौग्र ६
ह्येतिमाधवीयसामान्यनिर्णयस्य नावनवरात्रव्रतनविषयः। पूजाप्रधानकत्वेनानुपवासात्मकत्वात्। नापितत्रस
उपवासोन्यांगत्वात्· यदि चोपवासनिर्णयः प्रवर्त्तेत तस्य पाक्षिकत्वादेकभक्तादावितनिर्णयाअपि पाक्षिकाः प्र
वर्त्तेरन्निति न सर्वदासाविद्धैव सिध्यति किंतु कदाचिदुत्तरविद्धापीत्यनवस्थितशास्त्रार्थापत्तिरिति· नन्वेवमस्मादिने
पराण्हव्यापित्वेसर्वहेमाद्रिसामान्यनिर्णयविषयत्वसंभवः शंकितोन निरस्त इति पूर्वोपि कदाचित्स्यान्नोति· एतद
प्यत्रनेवस्थितशास्त्रार्थापत्तेरेवासुक्तनिर्णयोपक्रमएवंयेनतदुक्तं केचित्पूर्वां केचिदुत्तरामुपाददतइति। तत्रै
वान्यतरपक्षः समर्थनीयोऽयं प्रमाणवत्ताबाधस्तेपंनेतितत्त्वंनवस्थितथाचारोस्तियस्यमूलंनिरूप्यतेति नचा
नवस्थितनिर्णयः। प्रतिपत्सामान्यविषयत्वात् नवरात्रप्रतिपद्विशेषविषयं व्यवस्थिताचारं बाधितुंशक्नोति
विशेषविषयाचारस्यैव सामान्यस्मृतिबाधकत्वात्।· विशेषविषयस्तु निर्णयोबाधेत न चासावस्तिहेमा

द्रिंद्राविति· ननुहेमाद्रिणानभिधानेपि असौ माधवेनाभिहितएव प्रतिपत्सामान्यनिर्णयोशंकोत्तरत्वेन·
नत्वाश्वयुजेमासियोयंनवरात्रोत्सवस्तदुपक्रमस्यापि पूर्वविद्धायां क्रियमाणत्वात्सोप्यत्रैव पूर्वविद्धावि
षयेषु वस्तुष्वसत्वादिषु वीक्षणीयइति चेत्· मैवं· तस्य नक्तव्रतत्वात्· एकभक्तनक्तप्रतिपदिष्टीनांच पृथक्
निर्णयस्य वक्ष्यमाणत्वादिति· नक्तत्वमात्रंतु हेमाद्रिणाप्युक्तं· चंडिकानवरात्रव्रतस्य नक्तव्रतत्वप्रसिद्धं
षभविष्योत्तरपद्मपुराणादिप्रसिद्धपूर्वाश्विरात्रव्रतज्ञानीत्रिरात्रमधुत्रिरात्रवधा —— रात्रप्रकृतित्वानव
रात्राभिधानेनाऽनक्तव्रतत्वस्य स्पष्टमभिधानादिति· अत्रोच्यते· नतावद्धेमाद्रिग्रंथविरोधः। नहितत्रनि
शामुखभोजनात्मकमुख्यनक्तव्रतत्वमुक्तं· नवातन्निर्णयेन निर्णयत्वं किंतु योगेन रात्रिव्रतस्य रूपतावन्मा
त्रंच न विरुद्धं। माधवग्रंथेतु किं मुख्यनक्तव्रतत्वमुक्तमुत गौणमथ यौगिकमिति· नाद्यं पूजात्मकत्वोपपाद
नात्नहि निशामुखभोजनात्मकमुख्यनक्तव्रतत्वमुपेक्षितमपि शक्यते सचेतनेन· नद्वितीयं· गौणंहिनक्त
व्रतत्वं मुख्यनक्तव्रतांगकत्वाद्वास्याऽमुख्यनक्तउत्तरकाले प्रदोषे विधानाद्वा· नाद्यः। नावतापितन्निर्णये

७ ननिर्णयस्यनिरस्तत्वमोवाच्यत्वात्·नद्वितीयः।यथाहिनिशामुखभोजनात्मकनक्तव्रतस्यत्रिदंडिकात्मक
सायंसंध्योत्तरघटिकात्रयात्मकःकर्मकालउक्तौनैवमस्तावस्थोवासतत्रेभांगविशेषोनवरात्रव्रतेकर्मकाले
ननियतःक्वापिपुराणेउपलभ्यतेनवानिबंधभिर्निर्णीतः।तेनास्मिन्नपिपक्षेनक्तव्रतनिर्णयेननिर्णीतत्वाभि
धानेमाधवीयेनिर्मूलत्वान्नयथाश्रुतंसमंजसं·अथमाधवस्यप्रसपितनरत्वांतदुक्तैवप्रदोषस्यकर्मकालत्वं
नवरात्रव्रतेनुप — — पमामपिर्क्षेविपुराणेउक्तंभविष्यतीतिकस्यचित्तेनतोविचरणाचार्य — — पिषोडशमय
जोक्तेमर्त्स्लंकिंचित्कस्येत्·तेननतोमीमांसुचित्र — — माधानापनत्पुनः।विवरिष्येयथान्यायंश्रुतिस्मृतिवचो
बलात्·इतिप्रतिज्ञायसर्वत्रचतथैववचनन्यायमूलकंनिर्णयवदतोस्येहैवकर्मकालवाक्यमनुपन्यस्यतन्ने
दृशंसिद्धवदभिधातुंयुज्यते·अभिदधतोवाविश्वसितुंपदवाक्यप्रमाणपरैर्नतरांतत्रैवाभिनिवेशुधर्मविना
शभीरुभिः।अथतृतीयःपक्षः·शंक्यतेनक्तंरात्रौव्रतंनक्तव्रतमितिव्युत्पत्त्यायौगिकंनक्तव्रतत्वंभविष्यती
ति·अस्तिचात्रप्रमाणमितिननिर्मूलता।तथाहि·देवीपुराणे·आश्विनेमासिमेधांतेमहिषासुरमर्दिनीं·नि ७

धासुरंजपेद्वक्त्यासोपवासादिभिःक्रमात्·रात्रिरूपायतोदेवीदिवारूपोमहेश्वरः।रात्रिव्रतमिदंदेविसर्वपा
पप्रणाशनं·सर्वकामप्रदंनृणांसर्वशत्रुनिबर्हणं·रात्रिव्रतमिदंतस्माद्रात्रौकर्तव्यमिष्यते·नक्तव्रतमिदंयस्मा
दन्यथानरकेगतिः।तथाआश्विनेमासिमेधांतेप्रतिपद्यातिथिर्भवेत्·तस्यांनक्तंप्रकुर्वीतरात्रौदेवींचपूज
येत्·नक्तव्रतमिदंपार्थसर्वपापप्रणाशनं·नवरात्राभिधंकर्मनक्तव्रतमितिश्रुतमित्यादिस्कांदभविष्योत्त
रादौरात्रेःकर्मकालत्वोक्तेस्तद्व्यापिनीपूर्वेवेतिसैवग्राह्या·कर्मणोयस्ययःकालइतिशास्त्रस्यसर्वतोपिप्राब
ल्यंनिबंधमिरुक्तं।अतएवनृसिंहप्रसादेमाधवोक्तंनक्तव्रतत्वमनुपपन्नमित्याक्षिप्तं·ननुकथमेतस्यनक्तव्र
तत्वमस्यानुक्रमप्यंगीक्रियतइत्यादिना·समाहितंचयौगिकत्वेनैवरात्रौविहितत्वादेवीपूजायानक्तव्रतत्वमे
तस्येत्यादिना·माधवग्रंथमतनव्रतोक्त्यभिप्रायश्चोपसंहारेउक्तः।माधवीयकालनिर्णयकारैरपिनक्तव्रत
त्वंरात्राववस्थेयतेनाभिमतमित्युक्तमिति·सत्यमिदमेवरात्रिव्रतत्वेननक्तव्रतमितितावतापितुमाधवोक्तं
नक्तव्रतनिर्णयनिर्णयत्वमसंबद्धमेव·योहिमुख्यनक्तस्यप्रदोषकालत्वमुपजातिर्णयोभिधास्यतेनतस्यायंवि

६ विषयः ॥ रात्रेः कर्मकालत्वेपि प्रदोषस्यतद्सिद्धेः पूर्वोक्तत्वात् यथावेदं रात्रिव्रतत्वेन नक्तव्रतेनस्य निर्ण
यस्यैवाभिधास्यते इत्येकांगविकल्पतयोभयतुः षाशारज्ञुः तेनापिनामाधवग्रंथः सर्वथाप्यलग्नकः केवलं
भक्तिमात्रएवेत्युपेक्षणीयः ॥ यद्वा केनचिदभिनिवेशं विना प्रक्षिप्त इत्युन्नीयते ॥ नन्वेवं प्राचीनग्रंथकृदु
क्तसामान्यविशेषनिर्णयाप्रतिपादनेपि कथं निर्णेतव्यं ॥ उच्यते ॥ इहानेकः कर्मकालः श्रूयते ॥ तत्र रात्रेस्ता
वत् कर्मकालस्य प्रतिपादकान्यनेकान्यसनंतरमेवोदाहृतानि ॥ तत्र कानिचित्पुराणांतरगतानि ॥ कानिचि
द्देवीपुराणगतान्यपि ॥ तत्र च पूर्वाह्णस्यापि कर्मकालत्वं श्रूयते ॥ प्रत्यक्षतश्चोपलभ्यमानत्वात् यथा रात्रेः
कर्मकालत्वप्रतिपादकानामविगीतं प्रामाण्यमिष्यते एवमितरेषामपि ॥ ततश्च प्रागुक्तानां द्वितीयाविद्ध
निषेधकानाममाविद्धनिषेधकानां च सर्वेषामभिनिविष्टतद्ग्रंथकृदुपन्यस्तानां वाक्यानामनाकरत्वेपि
पूर्वाह्णस्य कर्मकालत्वप्रतिपादकं देवीपुराणीयं वचनं नानाकरत्वेन शंकितुमपि शक्यते ॥ तच्च पठ्यते देवीपु
राणे ॥ आश्विनस्य सिते पक्षे प्रतिपत्सु यथाक्रमं ॥ सुस्नातस्तिलतैलेन पूर्वाह्णे पूजयेच्छिवामिति ॥ अत्र बाहु ६

वचनानुपपत्तेः क्रमविधानाच्च प्राणभृदादिवल्लिंगसमवायेन प्रतिपच्छब्दः प्रतिपदादितिथिनवके गौणः
॥ तथा रुद्रयामले ॥ नवरात्रप्रक्रमेः प्रत्यहं पूजने कुर्यात्त्रिकालं भक्तितत्परः ॥ अष्टम्यां जागरं चैवं महापूजन
पूर्वकमिति प्रातर्मध्याह्नसायंकालानां कर्मकालत्वे प्रातःकालस्यापि प्रतिपन्नं कर्मकालत्वं ॥ तथा डामरक
ल्पे ॥ यंत्रोद्धारे कलशस्थापनपूर्वकलशोपरिस्थे यंत्रे दुर्गापूजा कार्येत्युक्तं ॥ शृणु राजन्प्रवक्ष्यामि चंडिकायंत्र
मुत्तमं ॥ आश्विनस्य सिते पक्षे प्रतिपत्सु यथाक्रमं ॥ सुस्नातस्तिलतैलेन पूर्वाह्णे च नृपोत्तम ॥ पुण्याहवाच
नं कृत्वा द्विजांश्चैव तु पूजयेत् ॥ ततश्च कारयेद्वेदिं सप्तधान्यसुलान्नप ॥ स्थापयेत्पूर्णकलशं पंचरत्नसम
न्वितं ॥ वस्त्रेवारक्तकेचैव सलिलैश्च यंत्रमुत्तममिति ॥ अत्र च कालाकांक्षाविशेषात् पूर्वाह्ण इति सर्वत्र संबध्य
ते क्रमश्च पाठप्राप्तोपि विवक्षितस्तेन न कस्मिंश्चित्पदार्थे वस्थातुं लभ्यत इति पूर्वाह्णस्यैव पूजाकालत्वसिद्धिः
॥ डामरकल्पएवतत्र व्याख्यायेत आश्विनस्य सिते पक्षे प्रतिपत्सु यथाक्रमं ॥ सुस्नातस्तिलतैलेन पूर्वाह्णे पू
जयेच्छिवामिति देवीपुराणवदेव पठितमुपक्रमे ॥ तथाग्ने ॥ प्रतिपद्याश्विने मासि शुद्धे ज्विद्वेथप्रदया ॥ पुण्या

९ हु वाचनं कृत्वा जपं पश्चात्समारभेदिति स्पष्टमेव द्वितीया विद्ध प्रतिपद्विधिर्जागर्ति· उमरकल्पोक्तं च शत
चंडी विधान कुमारी पूजा यंत्रोद्धाराद्यादि प्रमाणम् नामेतान्येव वाक्यानि कथं केषुचित्निबंधेषु अग्ले खनमात्रे
णनादर्त्तव्यानीति न विंतथाभ्युपगमे च दुरुद्धरमर्द्धजरतीयमापद्येतेति· अत पूर्वाण्हरूप कर्मकालव्यापिनी द्वि
तीया विद्धैवेति सैव प्रतिपन्नवरात्रोपक्रमे ग्राह्येति सिद्धांतः॥ रात्रेः कर्मकालत्व प्रतिपादकानि तु गौणकालपरत्वे
न नेयानि· न च वैपरीत्यं उत्तरकालस्यैव गौणकालत्वौचित्यात्· तदुक्तं मंडनेन· स्वकालादुत्तरो गौणः कालः स्वै
स्य कर्मण इति· न चैवमनेनैव सिद्धेः यं त्रेः कर्मकालत्व प्रतिपादकवचनानर्थक्यं· सामान्य वाक्यस्य नित्यविष
यत्वात्काम्ये नवरात्र व्रतते विशेषतो गौणकालप्रतिपादनस्यार्थवत्त्वात् तदाद्यपि वर्षे च कर्त्तव्यमिति वीप्सया वसंते
वसाने ज्योतिषा यजेतिवच्छिरस्वताने स्यनेतथापि नानाफलश्रवस्यापि सत्वा — — — तिष्टोमवदेव नित्यकाम्यत्वात्का
म्य प्रयोगार्था गौणकालो क्षिरितरच सामान्यवचनादेव सिद्धेरिति· यथा रात्रावपि पूजां न रविधायकत्वेन रात्रि
कर्मकालवाक्यानि व्याख्येयानि· अत एव देवीपुराणे· शुद्धेतिथौ प्रवर्त्तव्या प्रतिपच्चोर्ध्वगामिनी आद्यास्तु ९

नाडिकास्तास्याः षोडश स्युर्दशापि वा· अपराण्हे च कर्त्तव्यं शुद्ध संतानकांक्षिभिरिति हि यदा प्रतिपच्छुद्धषष्टिदंडा
होरात्रं व्याप्य वर्द्धते तदा आद्यषोडश द्वादशनाडीनां निषिद्धत्वात्तदेव वा परान्हेपि कर्त्तव्यतोत्तरां पूर्वाण्हे पाषो
डशघटिकासंपात्ताभावे पूर्वाण्ह एव मुख्यकालत्वमितिषस्यते· तेन पूर्वाण्हस्य कर्मकालत्वेन तत्द्व्यापिन्या द्वि
तीया विद्धायाएव ग्राह्यत्वे सिद्धे यदि कानिचिदमाविद्धा ग्राह्यतावचनानि समूलान्यपि भविष्यंति तत्तत्स्तानि
द्वितीया विद्धाया अभावे योजनीयानि· द्वितीया विद्धानिषेधाश्रवत्वादशोएव विषयेमाविद्धाप्रशंसार्था द्वितीया
या विद्धापिन कार्या किमुतामदविद्धेति· तदुक्तमभियुक्तैः॥ न हि निंदा निंद्यं निंदितुं प्रवर्त्तते पितु विधेयं स्तोतुमिति·
नवरात्र प्रतिपन्निर्णयः॥ ॥अथा च प्रतिपदि चित्रा वैधृति संभवश्चेत्तत्तत्र कलशस्थापन निषेधात्तव
हितेभागे राज्यादावप्युक्तं ये यं· अयमपि च विषयो रात्रेः कर्मकालत्व प्रतिपादकानां वाक्यानां विज्ञेयः॥ चित्रावै
धृति निषेधश्च· अथ शुक्ल प्रतिपद्ये चेत् शुक्ल पायामपराण्हके· कलशस्थापनं कुर्यात् क्षित्वा चित्रां च वैधृतिमिति·
तथा· त्वाष्ट्र वैधृति युक्ता चेत्प्रतिपच्चंडिकार्चने· तयोरंते विधातव्यं कलशारोपणं गृहे इति· अत्र केचित् होहाभि

१० साद्यिकर्मगताश्वनीराजनांगकलशस्थापनविषयाश्विन्यायैधृतिनिषेधः। वाजिनीराजनं कुर्यात्स्वक्षा
त्रियांच वैधृतिमिति अश्वशास्त्रवाक्येन सहैकमूलकल्पनालाघवात्। अत एव ब्रह्मपुराणे चित्रापरित्याग
मेवाभिप्रेत्य स्वातियोगे श्वपूजोक्ता। अश्वयुक्शुक्लपक्षे तु स्वातियोगेषु भो दिने। पूर्वमुच्चैःश्रवानाम प्रथमं
श्रियमाहरत्। तस्मात्स वैनरैस्तत्र पूज्यो सौश्रद्धया सदा। पूजनीयाश्च तुरगा नवमीयावदेव हि। शांतिः स्व
स्त्ययनं कार्यं तदा तेषां दिने दिने। धान्यं भक्ष्यान्नकं कुर्यात् वचा सिद्धार्थ कालस्था। पंचवर्णेन सूत्रेण ग्रंथितेषां तु बं
धयेत्। वायव्यैर्वारुणैः सौरैः शाक्रैर्मंत्रैः सवैष्णवैः। वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिने दिने। तुरगा रक्षणी
यास्तु पुरुषैः शस्त्रपाणिभिः। न चलाश्वाः कचिन्नत्र नच वाह्याः कथंचनेति। हेमाद्रिमदनरत्न व्रतरत्
नेः भविष्योत्तरे तु विष्णुघोषो होमद्रव्यादः। जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात्। लोहाभिसारिकं कर्म का
रयेद्यावदष्टमी। लोहाभिव्याहृतो या वच्छव्दः। देवीपुराणे नवमीयावदित्युक्तेः। प्रागुदक्प्रवणे देशे पताकाभि
रलंकृतं। मंडपं कारयेद्दिव्यं नवसप्तकरं वरं। षोडशकरमित्यर्थः। आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभ १०

नं। मेखलात्रयसंयुक्तं योन्याश्वत्थदलाभया। राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च। आनीय मंडपे ता
नि सर्वाण्यत्राधिवासयेत्। ततस्तु ब्राह्मणः स्नातः शुक्लांबरधरः शुचिः। ॐकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्धुतं।
लोहनामा भवत्पूर्वं दानवः सुमहाबलः। स देवैः सपरैः क्रुद्धैर्बहुधा शकलीकृतः। तदंगसंभवमिदं लोहं यद् दृश्यते क्षि
तौ। शस्त्रास्त्रमंत्रैर्हौतव्यं पापसंघातसंयुतं। कुलशोषं तुरंगाणां राज्ञां तमुपहारयेत्। लोहाभिसारिकं कर्म तेनैतद्विधिः
स्मृतं। धृतपत्सयनो नश्वानाज्ञां श्च स लेखकान्। भ्रामयेन्नगरे नित्यं नंदिघोषपुरस्कृतान्। प्रत्यहं नृपतिः स्नात्वा सं
पूज्य पितृदेवताः। पूजयेद्राजचिह्नानि फलबिल्वविलेपनैः। तस्याभिधारणादालोविजयः समुदाहृतः। पूजामंत्रा
न्प्रवक्ष्यामीत्युक्त्वा छत्रचामरध्वजपताकाश्वगजखड्गचापछुरिकाकनकदंडदुंदुभिशंखसिंहासनपूजामंत्रानुक्त्वो
पसंहृतं। लोहाभिसारिकं कर्म कृत्वैवं विधिपूर्वकमिति। अत्र च कर्मणि न क्वापि कलशप्रतिष्ठाविधिर्दृश्यते। किं वाश्व
शास्त्रवाक्येन कलशप्रतिष्ठापात्ता किंतु वाजिनीराजनमात्रं। अतस्तद्विषयेण चित्रावैधृतिनिषेधेन कलशप्रतिष्ठा
विधेर्भिन्नत्वाविषयत्वादेकमूलकल्पनालाघवं श्रुयाणः स्वगुरोरपिलाघवमापादयति। ब्रह्मपुराणे पि स्वाति

११ त्वाश्वपूजामात्रशुक्लेन करस्थ प्रतिष्ठागंधोपीति· अस्य चित्रानिषेधस्य प्रतिप्रसवः स्मर्यते· आश्विनस्य सिते
पक्षे योगो वैधृतिचित्रयोः। पूर्वमर्धं परित्यज्य कर्तव्या चोत्तरे क्रियेति· तदिदं यद्यप्येवं विधानुपूर्वीकेन केनचित्पुरा
णे निबंधे वोपलभ्यते तथापि ज्योतिःशास्त्रनिषिद्धभागे नास्यां नरत्यान्तासंते विवादः। अत्र नवरात्रे उपवासादावे
करात्रादिपक्षो विकल्पेन पठ्यतेऽत्र च तत्र नवरात्रव्यतिरिक्तः। धौम्यः। अथवा नवरात्रादि सप्तपंचत्रिकादि वा· एकभक्तेन नक्तेना
याचितोपोषितैः क्रमात्· आदिशब्देनाष्टरात्रद्विरात्रैकरात्रपक्षाः संगृहीताः। तेन यथासंख्यमनन्वयात् एकभक्तादीप्र
त्येकं सर्वसंख्याविकल्पः सिद्धः। अष्टरात्रपक्षो भविष्ये· प्रथमा द्वितीया तृतीया च चतुर्थी च नराधिप· एतास्तु एकभक्तेन
प्रवदंति मनीषिणः· पंचमी च तथा षष्ठी सप्तमी वाष्टमीषु च· उपवासपरो भूत्वा पूजयेच्चंडिकां बुधः। रुद्रयामलेपि।
दुर्गोत्सवे स्मृतं देव्युपवासस्य सप्तकं· अष्टमे दिवसे होमं कृत्वा किंचित्तु भक्षयेत्· सप्तरात्रपक्ष एवायं प्रतिपदादिरष्टम्यां
तं किंचिद्भक्षणाधिक्येव विधीयते· तिथिक्षयवृद्धिवशेन चैव्यास्येयमिति वक्ष्यते· पंचम्यादि पंचरात्रपक्षो भविष्ये· ११
एकभक्तस्तु पंचम्यां षष्ठ्यां नक्तं प्रचरेत्· अयाचितस्तु सप्तम्यामष्टम्यां तूपोषितः। नवम्यां पारणं। कुर्यादित्येवं

पंचरात्रकं· सप्तम्यादि त्रिरात्रपक्षो भविष्ये· त्रिरात्रं वापि कर्तव्यं सप्तम्यादिदिनत्रयं· द्विरात्रमपि भविष्ये· अष्टम्यां च नवम्यां
च जगन्मातरमंबिकां· पूजयित्वाश्विने मासि विशोको जायते नरः। एकरात्रपक्षे त्वष्टमीमात्रोपवासो नवम्यां वा तत्रा
द्यः। कन्यासंस्थे रवावीशशुक्लाष्टम्यां प्रपूजयेत्· सोपवासो निशार्द्धे तु महाविभवविस्तरैः। द्वितीयस्तु· यः करोत्युपवासं
तु नवम्यां विधिवन्नृप· स फलं प्राप्नुयात्सर्वं राजसूयाश्वमेधयोरिति· एषां चैकरात्रोपवासादीनां प्रातिस्विकवाक्येषु
फलसंबंधेपि धौम्यवाक्येन नवरात्रपक्षानुकल्पतया विधानात् स्वस्य च नित्यत्वात् नित्यनापि सिद्धेरग्निहोत्रवदुभयरूप
त्वाविरोधः। तथा प्रातिस्विकवाक्येषु यद्यप्येकरात्रद्विरात्रपक्षयोरुपवास एव श्रुतः। पंचरात्रपक्षे क्रमेण तिथिपंचके एकभ
क्तादि पंचकं· अष्टरात्रपक्षे प्रतिपदादितिथिचतुष्कद्वये एकभक्तोपवासावेव तथापि सर्वेष्वप्येकरात्रादिपक्षेषु सर्वेषा
मेकभक्तादीनां धौम्यवाक्यादेव सिद्धिः। अयं च यावदन्नहविष्यादीनामप्यत्रोक्तेषु एकभक्तादिस्थानापन्नैव ए
कद्विरात्रादिपक्षाणां वैकल्पिकानामश्रुतानामपि प्राप्तिर्वैद्यानवृद्धिविधं नवरात्रं· शारदं वासंतं च· वासनेन वरा
त्रे तु पूज्या स्याद्रक्तदंतिकेति रुद्रयामलोक्तेः। तथा सति प्रथमातिक्रमे कारणाभावाद्धर्षोपक्रम एव प्राप्तेः पूर्ववा

१२ क्याश्च वर्षादौ भवेदिति फलितोर्थः। अत्र चाधिकारः सर्वेषां हेमाद्रिमदनरत्नव्रतखंडे· भविष्ये· स्नातैः प्रमुदितैर्हृ
ष्टैर्ब्राह्मणैः क्षत्रियैर्विशैः। शूद्रैर्भक्तियुतैर्म्लेच्छैरन्यैश्च भुवि मानवैः। स्त्रीभिश्च कुरुशार्दूलेत्युक्तं। म्लेच्छाः शबरकिरात
पुलिंदादयः। अन्ये नुलोमप्रतिलोमजाः। अस्य नित्यत्वेपि फलमुखोप्यधिकारः श्रूयते· देवीपुराणे· शृणु शक्र प्रवक्ष्यामि
यथा त्वं परिपृच्छसि· महासिद्धिप्रदं धन्यं सर्वशत्रुनिबर्हणं· सर्वलोकोपकारार्थं विशेषाद्दसिवर्त्तिभिः। कर्तव्यं ब्राह्म
णैश्च क्षत्रियैर्लोकपालकैः· धनार्थैश्च तथा वैश्यैः शूद्रैः पुत्रसुखार्थिभिः। सौभाग्यार्थं तथा स्त्रीभिरन्यैश्च धनकांक्षि
भिरिति· अत्र तत्तत्कामनयोक्ते फलविशेषसंबंधश्रवणेपि भविष्योत्तरादौ सर्वकामप्रदं नृणामित्यत्र वर्णविशेषानुपा
दानात्सर्वेषां सर्वफलसिद्धिरविरुद्धा· न चैवं शूद्रैः पुत्रसुखार्थिभिरिति व्यर्थं गुणफलसंबंधिनार्थ यानोपपत्तेः। य
द्वा सर्वकामप्रद॥ मित्यस्य पत्रमितिपदप्राप्तं फलं तत्परत्वात्· नारदीये· चाश्वयुग्यावज्जीवं नरः स्त्री वा नवरात्रमहाव्रतं· कु
र्वते· चंडिकाप्रीत्यै भुक्तिं मुक्तिं च विंदति· तिथ्यावज्जीयानुष्ठानोक्तावपि अव्यवहितो चेत्रिं०शद्वर्षपक्षद्वयपक्षांतरमथा
स्नातेन तत्रैवाशक्तविषयं· नववर्षाणि यावच्च नारी स्नानपरायणा· दुर्गापूजादिकं कृत्वा व्रतानांतरं तु समाचरेदिति· १२

अत्र च जपकन्यापूजनाद्यन्यास्नानं· देवीपुराणे· अयाचीदथवैकाशी नक्ताशी त्वथवाग्वदः। प्रातः स्नायी जितद्वं
द्वस्त्रिकालं शिवपूजकः। शिवापूजकरद्रूपर्थेयां दसंहस्त्र त्वं: शिवाशिवश्च नयोः पूजकरमिवा· जपहोमसमास
क्तः कन्यकासाजपेत्सदेति· त्रिकालं प्रातर्मध्यंदिनापराण्हेषु· तदा च निशि पूजा चतुर्थीत्युपकुलदेवतापूज्येत्युक्तं
व्रतखंडे· यस्य यस्य हि यादेवी कुलमार्गेण संस्थिता· तेन तेन च सा पूज्या बलिगंधानुलेपनैः। नैवेद्यैर्विविधैश्चैव
पूजयेत्कुलमातरं· कन्यापूजने विशेषः स्कांदे· एकैकां पूजयेत्कन्यामेकैकवृद्ध्या तथैव च· द्विगुणं त्रिगुणं वापि प्रत्येकं न
वकं तथा· अत्र एकवृद्ध्येति पक्षस्तः पक्षांतरमुक्तं द्विगुणं त्रिगुणमित्यनेन· अतोवनायमर्थः द्वितीये द्विगुणं तृतीये त्रिगुणं
तृतीये त्रिगुणमिति किंतिमौ द्वौ पक्षौ द्विगुणमिति त्रिगुणमिति न तो भिन्नः। द्विगुणता त्रिगुणता चैकापक्षे एव· प्रत्येकमि
ति चोभाभ्यां संबध्यते· तेनायमर्थः। प्रत्येकं प्रतिदिनं द्विगुणं द्वे द्वे कन्ये पूजनीये· प्रतिदिनं च त्रिगुणं तिस्रः तिस्रः पूज्या इति·
स्कांदे· एकवर्षा तु या कन्या पूजार्थं तां विवर्जयेत्· गंधपुष्पफलादीनां प्रीतिरत्न स्या न विद्यते· अरोगिणीं सुपुष्टांगीं सुरूपां
व्रणवर्जितां· समानवंशसंभूतां कन्यां सम्यक् प्रपूजयेत्॰ पूजकस्य समानवंशजां समानवर्णा ब्राह्मणस्य ब्राह्मणी क्षत्रि

१३ यस्यक्षत्रियेत्यादि यद्वा सपिंड सगोत्र चनेव वंशशाब्दस्य मुख्योर्थ इति स्यकन्यादिकमप्यत्राभ्यनुज्ञायते॰ शिष्य
चारोप्येवमेवाविगीतउपलभ्यते॰ कामनाभेदेनापि व्यवस्थास्मानएवच॰ ब्राह्मणःसर्वकार्येषु जयार्थे नृपवंश
जा॰ लाभार्थे वैश्यवंशोत्था सुतार्थे शूद्रवंशजा॰ दारुणे संत्यजातीनां पूजयेद्विधिना नरः॥ वर्षभेदेन च नामान्याह
धौम्यः॥ कैं एकवर्षा भवेत्कन्या द्विवर्षा च सरस्वती॰ त्रिवर्षा तु त्रिमूर्तिस्याच्चतुर्वर्षा तु कालिका॰ सुभगा पंचवर्षा
स्यात्षड्वर्षा तु उमा भवेत्॰ सप्तवर्षा मालिनी स्यादष्टवर्षा तु कुब्जिका॰ नवभिः कालसंदर्भा॰ दशभिश्चापराजि
ता॰ एकादशे तु रुद्राणी द्वादशे तु ऋतुरवी॰ त्रयोदशे महालक्ष्मीर्द्विसप्ता पीठनायिका क्षेत्रज्ञा पंचदशभिः षोडशे
चांबिकामता॰ एवं क्रमेण पूज्या स्यात्यावत्पुष्पं न विद्यते॰ दुर्गापूजाच कलशस्थापनपूर्वकं सलिलं संभवेत्कलशोप
रिष्टं चेत्कार्या॰ नारदीये॰ ततस्त्विकमनाभूत्वा कुर्याद्गोमयमंडलं॰ तन्निकाशं डिले स्थाप्य कलशं जलसंभृतं॰
तपल्लवं सवस्त्रं च स्वर्णमुद्रासमन्वितं॰ सपूर्णपात्रं निक्षिप्य दुर्गां तत्र तु विन्यसेत्॰ डामरकल्पे॰ शरदन्ताविशे
मासि शुक्लपक्षे नृपोत्तम॰ प्रतिपत्तिथिमारभ्य नवचंडीसमारभेत्॰ कलशं सर्वरत्नाढ्यं हेमवस्त्रादिशोभि १३

तं संप्रतिष्ठाप्य संपूज्य चंडिकार्चनमारभेत्॰ तत्रैव पंचोद्धारे श्रृणु राजन् प्रवक्ष्यामि चंडिकायंत्रमुत्तमं॰ सुस्ना
तस्तिलतैलेन पूर्वाण्हे च नृपोत्तम॰ पुण्याहवाचनं कृत्वा द्विजान्भक्त्या बहु पूजयेत्॥ ततश्च कारयेद्वेदीं सप्तधान्ययु
तान्नृप॰ स्थापयेत्पूर्णकलशं पंचरत्नसमन्वितं॰ वस्त्रे चारक्तके चैव संलिखेत्पंचमुत्तमं॰ तत्रैव नवचंडीविधा
ने॰ आश्विनप्रतिपन्मुख्याः पुण्यास्तु तिथयो नव॰ चंडिकापूजने प्रोक्ताः सर्वकामफलप्रदाः॥ स्नात्वा शुक्लतिलै
स्तोयैर्गंगायाः शुचिमानसः॥ गृहे वा देवतास्थाने कुर्यात्कुसुममंडपं॰ वस्त्रैः परिवृतं सम्यक् नानावर्णैः सुशो
भनैः॥ पूगैश्च नालिकेरैश्च जंबीरैर्मातुलिंगकैः॥ अन्यैर्बहुविधैः पुष्पैः शोभितं फलसंचयैः॥ तत्र मध्ये भद्रं
कार्यमालवालं मनोरमं॰ निक्षिपेत्तत्र धान्यानि ततः सिंचेज्जलैः शुभैः॥ तयोपरि न्यसेत्कुंभं सुवर्णजलपूर्णनवशु
भं॰ सुवर्णं निक्षिपेत्तत्र गंधपुष्पैः समर्चयेत्॰ पुष्पमालावृतं कुर्यात्प्रतिष्ठामंत्रमंत्रितं॰ पुरस्तात्तत्र — साज्यपे
स्तत शतं बुधः॥ एकमेकोऽजरावध्यारूपाणि परिकोर्तयेत् — प्रत्यहमेकरूपं जपेत् पितत्रैव द्वितीयाध्याये॰
न्यासपूर्वं पूजां समालोक्य प्राणानायम्य पूर्वोक्तन्यासान् संस्मृत्य बालभवान्॰ प्रथमं चरितं प्रोक्तं मधुकैटभ प्रा

१४ हकं॰ महिषासुरनिर्नाशचरितं विद्धि मध्यमं॰ चरितं चोत्तरं देव्या निशुंभादिवधः स्मृतं॰ चरितानि जपेत्त्रीणि सर
हस्यान्यतं द्वितः। चरितं मध्यमं चैषां जपेद्वा चंडिकामयं॰ जपेन्नवाक्षरं मंत्रमथवाष्टोत्तरं शतं॰ एतज्जपदशांशेन
पायसं तिलसर्पिषा इत्यादि॰ अन्यत्र तु प्रत्यहं नव वा रस सप्त वा रस्तोत्रजप उक्तः। यथा कथंचिद्यशतं रूपाणि कार्याणि
तितत्र मूलमन्वेषणीयं॰ अथ तत्र त्याष्टमीनवमीकृत्यविधयः॥ मार्कंडेयः। प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पि
त्रिति॰ धौम्यः। होमस्तत्र प्रकर्तव्यः स्वमंत्रेण जपार्थिनः। जातवेदसे निमंत्रेण संमंत्र्य परमाहुतिं॰ स्वमंत्रो गुरूपदि
ष्टो मंत्रः। डामरकल्पे॰ रुद्राध्याये यथा होमो मंत्रेणैकेन साध्यते॰ चंडी सप्तशती जाप्ये होममंत्रो नवाक्षरः। कथितः
पूजना ध्यायेतेन होमो भवेदिह॰ नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म
तां॰ अथवा यं भवेद्धोमः श्लोकैः स्तोत्रनिरूपितैरिति॰ तेन गुरूपदिष्टनवाक्षरस्य जातवेदस इत्यस्य नमो देव्या इति
तस्य स्तोत्रमंत्राणां च होमे विकल्पः। द्रव्याणि च नारदीये॰ तिलाज्यकुसुमादीनि पायसं मधु शर्कराः। हरिद्रव्या
णि जुहुयाद्दुर्गाष्टम्यां विशेषतः। मंत्रहोमे कालत्रयं वैकल्पिकं॰ अष्टम्यामेवारभ्य समापयेदित्येकः पक्षः। १४

स च नारदीयात्सिद्धः। नवम्यामेवारभ्य समापयेदिति द्वितीयः। गारुडपुराणे॰ माघे चाश्वयुजे वीर नव
म्यां समापयेदिति स्मर्यते॰ नवम्यां तु जपं होमं समाप्य विधिवद्बलिं॰ पात्रीं वै द्विपदः कुमारीः दशम्यां श्रव
णे पिचेति॰ बलिदाने प्येवमेव पक्षत्रयं॰ तत्र संधिपक्षस्तान्नवदमेनैव स्मरणे न सिद्धः। अष्टम्यामेव बलि
दानं देवीपुराणे॰ आश्विने मासि संप्राप्ते महिषासुरमर्दिनी। देवी संपूजयित्वा ये अष्टम्यामष्टमी पुनः॰ घातयंति
पशून्भक्त्या ते भवंति महाबलाः इति॰ नवम्यां बलिदानमाह कालिकापुराणः। नाममापाशवमज्जमांसरुधिरैः कू
ष्माण्डनवम्यां बलिमिति॰ अत्र वै वर्जयेत्॰ अत्रपराह्णके काले बलिदानं प्रशस्यते॰ दशम्यां वर्जयेत्तत्र कार्यो वि
चारणेति॰ अत्र च यथा कुलाचारं होमबलिपशुव्यवस्था विज्ञेयेति॰ अत्र तु होमे स्त्रीशूद्राणामपि प्रधाने
धिकारोस्त्येव॰ तत्र प्रधाने धिकारः श्रूयते भविष्योत्तरे॰ पूजनीया जनै देवी स्थाने स्थाने पुरे पुरे॰ प्र
मुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्विशैः। शूद्रैर्भक्तियुतैर्म्लेच्छैरन्यैश्च भुवि मानवैः। स्त्रीभिश्च कुरुशार्दूल तन्नि
श्च प्रधाने धिकारात्तदंगहोमादावप्यधिकारः सिद्धः स मंत्रकोपि होमो विप्रद्वारा करणीयः अमंत्रस्तु शूद्रस्य

१५ विप्रो मंत्रेण गृह्णीयादिति ब्रह्मपुराणात्॰ इयं च श्राद्धप्रकरणे विश्वरूपप्रमाणपरिभाषाणप्रकरणेन निषिध्यते इ
ति शूद्रकृपाणिः तथा धर्मविवृतौ॰ उपवासो व्रतं होमस्तीर्थस्नानजपादिकं॰ विप्रैः संपादितं यस्य संपन्नं तस्य
तत्फलमिति॰ यदाप्यत्र होमे पौराणो मंत्रः करणं तदापि ब्राह्मणद्वारा कारयेत्॰ पुराणाध्याये विश्वरूपस्यानधि
कारादाहत्यपि धानं विना पौराणमंत्रोच्चारणासंभवात्॰ यत्तु पाराशरेण दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुया
द्धविः। ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत्॥ इति तन्माधवाचार्यैर्व्याख्यातं॰ यो विप्रः शूद्राद्दक्षि
णामादाय तदीयं हविः शांतिपुष्ट्यादिसिद्धये वैदिकैर्मंत्रैर्जुहोति तस्य ब्राह्मणस्यैव भ्रंसपायः शूद्रस्तु होमे
फलं लभेतैवेति॰ अत्र बलिदाने [illegible] यथादेशं यथाचारं पुष्प्यादयः कूष्मांडादयश्च व्यवस्थिता बलयो ज्ञेयाः।
अत एव नारदीये॰ मेषाश्च महिषादीनामसंभवे पैष्टिकमन्युपदेयो दैव्याम विधानेन यद्वा कूष्मांडकं फलमिति॰
अत्र भयमपि द्रव्यस्तुपलक्षणं॰ विचिकित्सादिनाप्यनुष्ठानस्य॰ अत एव विस्तारेनेश्वरेण अस्यार्थः काचिद्दिदं धर्म्य
मप्याचरेन्नतु इत्सक्तोदाहरणं ददतोक्तं धार्म्यरहितमपि लोकविद्विष्टं लोकाशक्तिजननं मधुपर्कगोवधादि १५

कं नाचरेदिति यस्माद्धर्म्यमग्नीषोमीयवत्स्वर्गसाधनं न भवतीति॰॥ ॥इति श्रीभट्टनारायणात्मजभट्टशंकर
कृतौ नवरात्रसंध्याविद्वेदपरिच्छेदः समाप्तः॥ ॥अथ पंचमीदिननिर्णयः॥ ॥हेमाद्रिणा पंचमी चतुर्थीयुता का
र्येति सामान्यत उपक्रम्य युग्माग्नतानामिति युग्मवाक्यात् पंचमी तु तथोक्ता पंचमी चतुर्थीसंयुता विभो इति स्कंदपुराणा
त्॰ पंचमी सचतुर्थी च कार्या षष्ठ्या न संयुतेति विपाक्षभविष्यत्पुराणवचनाच्चेति प्रमाणमुक्त्वा यत्तु ब्रह्मवैवर्तेऽच
ने पंचमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारदेति तच्छुक्लपक्षविषयं॰ शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविरिति
वचनात्॰ इति व्यवस्थाप्योपसंहृतं तस्माच्छुक्ले पंचमी परविद्धा कृष्णे पंचमी तु पूर्वविद्धे सुपसंहृतं॰ तदपि स्वयमेव
दूषितं॰ अन्ये त्वेवमाहुः॥ पंचम्याश्च चतुर्थीयुतत्वप्रतिपादिकानि गमादिवचनादि उपवासविषयाणि॰ एकादशी तथा
षष्ठी अमावास्या चतुर्थिका॰ उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इति वचनेनोपवासे पंचम्याश्च चतुर्थीयुक्तत्वस्या
भिधानात्॰ किंतु पूर्वव्यवस्थापि पंचमीनुप्रकर्तव्येति वाक्यस्योपवासव्यतिरिक्तविषयत्वेन कृष्णपक्षेऽप्युपपद्यमा
नस्य कारणं विना संकोचः प्रसज्येति॰ न च युग्मादिवाक्यानामुपवासविषयत्वेन संकोचो दोषाय सामान्यशास्त्र

१६ स्य विशेषशास्त्रेणोपसंहारस्य युक्तत्वात्· भवन्मतेऽपि केवलकृष्णपक्षविषयत्वेन संकोचस्याविशिष्टत्वात्· नु
चैवं विधेर्विषये संकोचो विधानेऽस्त्वित्युक्तं प्राक्· तस्मादुपवासव्यतिरिक्तकार्येषु त्तराउपवासे तु पक्षद्वयेऽपि पूर्वेति· तदिदं
माधवाचार्यैर्दूषितं· पंचमीलुप्रकर्त्व्या षष्ठ्या युक्ता तु नारद इति ब्रह्मवैवर्तवचनस्य स्येवं वाक्यशेषः श्रूयते· स्कंदोपवा
सस्त्री कार्या पंचमीपरसंयुतेति· न चासंजातविरोधिनो वाक्योपक्रमस्य संजातविरोधिना वाक्यशेषेण कथं संको
च इति शंकनीयं· असंदिग्धोपक्रमस्य प्राबल्येऽपि संदिग्धोपक्रमस्य वाक्यशेषेण निर्णेतव्यत्वात्· अत एव जैव
मिनिः। संदिग्धेषु वाक्यशेषादिति· एवं दूषिते सिद्धांत एवं सिद्धः। स्कंदोपवासे पंचमीपरा अन्येषु सर्वकार्येषु पूर्वेति·
सोऽयं वाक्यशेषो हेमाद्रिणानोदाहृतः। एवं वचनांतरमंत्रेण युक्तसिद्धांतसिद्धावपि हेमाद्र्युल्लिखितहारीतवाक्य
क्यमप्युक्तं· चतुर्थीसंयुता कार्या पंचमी परया न तु· दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथासिते इति· अत्र हि पौर्वाण्हिका
इति वचनबलाद्दानव्रतयोः परदिनानुष्ठानप्राप्तौ तस्यापवादाय दैवे कर्मणीत्युक्तं· न च दैवे कर्माणि पूर्वाण्हिकस्य
कर्मकालत्वात्कर्मकालशास्त्रप्राबल्यस्य च वर्णितत्वात्तद्बाधेन युक्तमिति शंकनीयं· विधेर्निषेधस्य वा प्रति १६

पत्तिपदोक्तस्य प्रबलतरत्वात्· न च पूर्वदिनपूर्वाण्हसाप्तस्यैतत् कर्मकालत्वं· साकल्यवचनाद्यादितकर्म
कालस्य सत्त्वसंभवात्· ईदृशोऽपवादविषये साकल्यवाक्यस्य प्रवृत्तत्वात्· स्वाभाविककालव्याप्तौ न स्यानर्थ
क्यात्· तस्माद्दैव कर्मणि परयुतायाः पंचम्या निषेधो न विरुद्धः। नन्वेवमपि पित्र्ये तन्निषेधो निरर्थकः। पि
त्र्यस्य स्वत एवापरविद्धायामप्राप्तत्वात्· मैवं· दृष्टांततया पित्र्योपन्यासोपपत्तेः। यथा पित्र्ये उत्तरविद्धा न ग्रा
ह्या तथा दैवेऽपीति विवक्षया दैवपित्र्ययोः सहोपन्यास इति· अत्र पित्र्यग्रहणस्य दृष्टांततोक्तिरयुक्ता· यथा
हि प्रतिपत्प्रकरणे प्रतिपत्सैव विद्धा या याभवेदपराह्णिकी· दैवं कर्म तथा ज्ञेयं पित्र्यं वामनुरब्रवीत्· इति व्या
सवाक्ये माधवेनैवोक्तं पित्र्यशब्देनात्र मन्ताहश्राद्धं विवक्षितं अपराण्हिकीति तस्मिन्वचने विधानात्· आ
पराण्हिकत्वं च मन्ताहश्राद्धप्रयोजकमिति वक्ष्यते· एवं तर्हि पितिथ्यंतरमन्ताहवदत्रापि प्राप्तत्वात्पित्र्यं
वा मनुरब्रवीदिति विशेषविधानमनर्थकमिति चेन्न· तदपवादार्थत्वात्· यदा पूर्वेद्युरस्तोपराण्हस्पर्शस्तदा
परेद्युरेव मन्ताहश्राद्धतिथ्यंतरे प्रतिपदि तु· तदपवादेन पूर्वेद्युरेव विधीयत इति· तदिदमाह पित्र्यग्रहणस

१७ विध्यर्थत्वसंभवात्· यद्यप्येतावान्विशेषस्तथापराह्णिकत्वं मध्याह्नाद्वोपस्थापकमस्ति इह तु न तदस्तीति
तथापि मध्याह्ने कोद्दिष्टे भयोपादानमिह संभवत्येव· न त्वमध्याह्ने न द्वेधापदार्थत्वं· एवमेकोद्दिष्टेपि· यद
परेद्युरेव मध्याह्नव्याप्तिस्तदान्यतिथौ परेद्युरेवैकोद्दिष्टं पंचम्यां तु नदपवादेन पूर्वेद्युरेव विधीयत
इति· अतः पित्र्यग्रहणस्य माधवेन दृष्टांततोक्तिः स्वयमेव प्रतिपत्त्युपकरणमुक्तप्रमेयस्याविस्मरणान्निर्बंधे
नैवेद्युपरस्यते· पंचमीविषयो हेमाद्र्युक्तोऽनेन विनिर्णयः। माधवोक्तस्तु सम्यक्त्वं किंचिन्नापि वान्यथा·
इति श्रीमत्सदस्यप्रामाण्यपारावारीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणसुतभट्टशंकर
कृते धर्मद्वैतनिर्णये पंचविधसंध्याभेदपरिच्छेदः।। ।। कृष्णजन्माष्टमीव्रतं निर्णीयते· भविष्यपुरा
णे· श्रावणे बहुले कृष्णजन्माष्टमीव्रतं· न करोति नरो यस्तु भवति क्रूरराक्षसः। कृष्णजन्माष्टमीं सत्का
यो महत्तमुपासते· नाप्नोति सुकृतं किंचिदिष्टापूर्तमथापि वा। वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतं· न क
रोति महाप्राज्ञ व्याली भवति कानने इति· स्कंदपुराणे। ये न कुर्वंति जानंतः कृष्णजन्माष्टमीव्रतं· ते भवंति १७

नराः प्राज्ञ व्याला व्याघ्राश्च कानने· रटंतीह पुराणानि भूयो भूयो महामुने· अतीतानागतं तेन कुलमेकोत्तरं
शतं· पातितं नरके घोरे भुंजता कृष्णवासरे इति· तथा प्राजापत्यर्क्षसंयुक्ता श्रावणस्यासिताष्टमी। वर्षे तु
वर्षे कर्तव्या तुष्ट्यर्थं चक्रपाणिनः।। विष्णुरहस्ये प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी· मुहूर्तमपि ल
भ्येत सोपोष्या सा महाफला। मुहूर्तमप्यहोरात्रे यस्मिन्युक्तो हि लभ्यते· अष्टम्यां रोहिणी नक्षत्रं तां सुपुण्या
मुपावसेत्· अत्र चाष्टम्यां रोहिणी ऋक्षमिति नक्षत्रस्य प्राधान्यावगतावपि आदौ ऋक्षसंयुक्तेति विशेष
णादंते च तामित्यष्टम्या एव परामर्शात्तिथेरेवोपवासनिमित्तत्वात्प्राधान्यमवसेयं जयंती त्वपि तस्या
एव कृष्णयोगान्नाम। तदुक्तं तत्रैव। अष्टमी कृष्णपक्षस्य रोहिणी ऋक्षसंयुता। भवेत्प्रौष्ठपदे मासि जयंती ना
नाम सा तिथिः प्रौष्ठपद इति कृष्णपक्षादिमासविवक्षया। वह्निपुराणे कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी
स्मृता। जयंती नाम सा प्रोक्ता उपोष्या सा प्रयत्नतः सप्तजन्मकृतं पापं राजन्त्रिविधं नृणां। तत्क्षणाल्लयति
गोविंद तिथौ तस्यां समर्चिते।। उपवासश्च न प्रोक्तो महापातकनाशनः।। जयंत्यां जगतीपाल विधिनात्र

१८ संशयः। त्रेतायां द्वापरे चैव राजन्कृतयुगे पुरा। रोहिणीसंयुता चेयं विद्वद्भिः समुपोषिता। अत्र जयंतीना
मस्या प्रोक्तेति लब्धो नाम्न्येवाभिधीयते। नित्योतस्यां तत्रोक्तः। जयंत्यां रोहिणीसंयुता चेयमिति वचनस्याप
वपरामर्शात्। अत्र च कृष्णयोगे पूपवासः स्मर्यते। भविष्यद्विष्णुधर्मोत्तरयोरपि जयंत्यामुपवासश्च महापा
तकनाशनः। सर्वैः कार्यो महाभक्त्या पूजनीयश्च केशवः। अत्र केचिन्मन्यंते भविष्यत्स्कंदपुराणवचनयोरक
रणे प्रत्यवायश्रवणान्नित्योष्टमीमात्रनिमित्त उपवासो विधीयते। वह्निपुराणादिवाक्येषु जयंत्याश्च प्रवृ
त्तिनिमित्तभूतरोहिणीयोगे नित्यमुपवासांतरं विधीयते। विष्णुरहस्यादिवाक्येष्वतस्येच फलार्थता। वर्षे तु
वर्षे तु कर्तव्यं तुष्ट्यर्थं च क्रपाणिनः इत्यत्र तु वीप्सामरक्षयोगवद्वर्षविषयामभ्युपेत्य पूर्ववाक्येनान्वितता जयंत्यु
पवासस्य द्वितीयपादेन च कर्तव्यं पदानुषंगेण भिन्नवाक्यतया काम्यता बोध्यते। नित्यत्वकाम्यत्वपरतदा वैरू
प्यप्रसंगेनैकवाक्यत्वासंभवादिति। अन्ये त्विदमुररीकुर्वते। एकमेवाष्टमीनिमित्तं ग्रहमग्निहोत्रवदेकादशी
व्रतवच्चनित्यकाम्यं। जयंत्याख्यरोहिणीयोगे तु ज्योतिष्टोमादिदक्षिणाभूतगवादिषु दोग्ध्रत्वादिवद्धर्मि १८

मवारवच्छाखाशस्त्यात्फलातिशयमात्रमिति। अपरस्त्वेवं प्रतिपेदिरे। प्रकृतं नित्यं शुद्धाष्टम्युपवासमाश्रित्य जयं
तीयोगाख्यः कालः फलेगुणो विधीयते। सप्तमे ब्रह्मवर्चसकामस्येत्यादिवत्। तेन रोहिणीयोगे सति फलांतरमपि
बुधसोमवारवदिति। तदुक्तं पद्मपुराणे। प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः। यैः कृता श्रावणे मासि अष्टमी रो
हिणीयुता किं पुनर्बुधवारेण सोमेनापि विशेषतः इति। सा चाष्टमी मध्यरात्रगतात्र ग्राह्या। तदुक्तं भविष्योत्तरे। मासि भा
द्रपदेष्टम्यां कृष्णपक्षेऽर्धरात्रके। शशांके वृषराशिस्थे ऋक्षे रोहिणिसंज्ञिते। योगेस्मिन्वासुदेवाद्धि देवकी मामज
जीजनत्। तस्मान्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः इति। तदेवमष्टम्याः प्राधान्यान्निशीथसत्त्वेन निर्णतव्यता
यस्मिन्वर्षे रोहिणीयोगाभावस्तदा तस्यामेव निशीथव्यापिन्यां निशीथयोगिन्यां वोपवासः। यदा तु दिनद्वयेऽपि नि
शीथयोगस्तदा भूयस्त्वेन निर्णयः। यदा तु दिनद्वयेऽपि निशीथव्याप्तिः समस्पर्शः अस्पर्शो वा तदोत्तरैव। प्रातः सं
कल्पकाले सत्त्वात्। मुहूर्तेनापि संयुक्ता संपूर्णा साष्टमी भवेत्। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति पाद्ये
नवमीयोगस्य स्तुतत्वात्। वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी। सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमीति

१९ पूर्वार्धनोत्तरार्धगतेनापि शशिनेन च केवलया या अष्टम्याः सप्तमीयोगस्य निषिद्धत्वाच्चेति· यस्मिन्वर्षे रोहिणीयोगस्त
दपि सप्तधाभिधाने· तत्र यदा तावत्पूर्वेद्युरेव निशाथे रोहिणीयुक्ता परेद्युस्तु निशीथगापि केवलाष्टमी तदा पूर्वेद्यु
र्वाच्या अर्धरात्रगतस्य रोहिणीयोगस्य प्रशस्ततरत्वात्· तथा च भविष्यविष्णुधर्मोत्तरयोः रोहिण्यां अर्धरात्रे च य
दा कृष्णाष्टमी भवेत्· तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजं· प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी· सोप
वासो हरेः पूजां तत्र कृत्वा न सीदति· अर्धरात्रे तु योगोयं तारापत्युदये तथा· रोहिणीसहिता कृष्णा मासि भाद्रप
देष्टमी· अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत्· तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः। वह्निपुराणे· स
प्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि· भविष्याष्टमीपुण्या यावच्चंद्रदिवाकरौ· तथा सप्तमीयोगेतु रोहिण्या नि
शीथे राजसत्तम· समजायत गोविंदो बालरूपी चतुर्भुजः। तस्मात्तं पूजयेत्तत्र यथा वित्तानुसारतः इति· यदा तु दातु
उत्तरेद्युरेव निशीथे रोहिणीयुक्ता पूर्वेद्युस्तु निशीथगापि केवलाष्टमी दिनद्वयेपि वा निशीथे रोहिणीयुक्ता तदोत्तरैव
केवलाष्टमीस्यायात्· यदा तु पूर्वेद्युरेव निशीथात्पूर्वमुत्तरं वा रोहिणीयोगस्तदापि चैवं दिनद्वयेपि निशीथे १९

ष्टमीसत्वं पूर्वेद्युरेव परेद्युरेव वा· तत्रापि योः कृत्स्नयोः पूर्वैव योष्या तदुक्तमग्निपुराणे· तस्मात्कृष्णाष्टमी
पूर्णा सप्तम्यां न परसत्तम रोहिणीसंयुता योष्या सर्वा पौघविनाशिणी। अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भ
वेत्· जयंती नाम सा प्रोक्ता सर्वपापविनाशिनी· पद्मपुराणे· कार्या विद्धापि सप्तमी रोहिणीसहिताष्टमी। तत्रो
पवासं कुर्वीत तिथिभांते च पारणं। विष्णुधर्मे च· जयंत्यां शिवरात्रिश्च कार्ये भद्राजयान्विते कृत्वोपवासं तिथ्यं
ते तद्धां कुर्यात्तु पारणं· भृगुरपि· जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च· पूर्वविद्धैव कर्तव्या तिथिभांते च पारणं·
तृतीयेतूत्तरैव· गुणभूतकृष्णानुरोधेन मुख्यकालरवर्त्तिप्रधानभूताष्टमी वार्धयोगात्· वर्जनीया प्रयत्नेनेति पूर्वो
दाहृत ब्रह्मवैवर्तवचनाच्च· यदा तु परेद्युरेव निशीथेष्टमीसत्वं परेद्युरेव वा पूर्वेद्युरेव वेति· तत्रापि नवयोः पक्षयोर्दि
ना ये वो योष्या· वर्जनीयेति ब्रह्मवैवर्तवचनेपि शब्देनाकृष्टायाः अपि सप्तमीसंयुताष्टम्या निषेधात्· तृतीयपक्षेतु
पूर्वैव· अष्टमीयाधान्यस्य तस्यां च निशीथरूपमुख्यकालसत्वेनग्रास्यत्वस्य स्थापितत्वेन गुणभूतत्वादहतोरि
हापि साम्यात्। अन्यथा यस्मिन्वर्षे दिनद्वयेपि न रोहिणीयोगः। किंतु पूर्वेद्युर्निशीथोत्तरं कृत्स्ने परेद्युश्च निशीथात्स्वा

२० गेवतत्समाप्तिर्बुधसोमपरेरन्यतरश्च वारस्तदापरेद्युरवोपवासापत्तिः। कृष्णयोगवद्वारयोगस्यापि प्राचच्चदर्शिते
पाप्रवचने प्राशस्त्याभिधानात्. यदातु पूर्वेद्युर्निशीथादूर्ध्वं परेद्युश्च प्राङ्निशीथादिति दिनद्वयेपि रोहिणीयोगस्तदापि त्रै
विध्यं दिनद्वयेपि निशीथेष्टमीसत्त्वं परेद्युरेव वा पूर्वेद्युरेव वेति. तत्राद्ये पूर्वोक्तस्य योर्द्वितीये वोपोष्या. तदुक्तं स्कंदपुराणे.
सप्तमीसंयुताष्टम्यां भूत्वा कृष्णं द्विजोत्तम. प्राजापत्ये द्वितीयेह्नि मुहूर्तार्धं भवेद्यदि। तदाष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः
पुरा। मुहूर्तेनापि संयुक्ते तिप्रदर्शितया प्रवचनाच्च. यत्तु कैश्चित्स्यापमित्यलेखि. पूर्वविद्धाष्टमी या तु उदये नवमी दिने. मु
हूर्तमपि संयुक्ता संपूर्णा साष्टमी भवेत्. कलाकाष्ठामुहूर्तापि यदा कृष्णाष्टमी तिथिः। नवम्यां सैव साग्राह्या सप्तमीसं
युता। नहीति। तदप्येवंविध एव विषयो योजनीयं. सप्तमीसंयुक्ताष्टम्या नवमीदिने उदयावच्छेदेन मुहूर्तादिसंयुक्तत्वस्य
संभवात्. तृतीयपक्षे तु पूर्वैव. गुणभूतेत्यादि पूर्वोक्तहेतोः। अन्यथेत्यादि पूर्वोपन्यस्तत्रिपक्षबाधकाच्च। प्राजापत्य
र्क्षसंयुक्ता मुहूर्तमप्यहोरात्रे इत्यादि पूर्वोपन्यस्तविष्णुरहस्यादिवचनानुग्रहाच्च। तथा जयंतीवाक्यान्यपि सर्वाणि तथा
सति स्वानुष्ठितार्थानि भवंति. नचेदृशमनन्यगतिवचनमस्ति यदादृशोपि विषये परेद्युरेवोपवासं विदध्यात्. यत्तु २०

माधवेन स्कांदमिति हेमाद्रिणा च ब्रह्मकैवर्तपमित्यलेखि उदये चाष्टमी किंचिन्नवमी सकलापदि. भवेत्तु बुधसंयु
क्ता प्राजापत्यर्क्षसंयुता। उदयेतारापत्युदये मध्यरात्रे इति यावत् तस्मिन्काले किंचित्स्यष्टमात्र्यप्यष्टमी ततः परं तु
सकला च नवम्येवेति. ततश्च मासि भाद्रपदेष्टम्यामिति भविष्योत्तरेण प्रेतयोनिमिति पाद्मेन च समानार्थेन यैकमूल
कल्पना यदा भवति: एवंच कृष्णो सति समस्तवर्तिनो मध्यरात्रगतस्य कृष्णयोगस्य कल्पभेदेन च बुधवारस्याभि
धाने न अपि चर्वशातेनेति अलभ्यस्तद्वाराश्रितप्राशस्त्यप्रतिपादनं युज्यते यद्वा उदयस्तस्य सूर्योदयपरत्वेपि एवं
योज्यं किंचित्स्यस्यमपि प्राजापत्यर्क्षेण संयुक्ताष्टमी सा चेदुदये न तु मध्यरात्रे स्यान्नवमी वसकला ततः परं प्रवृत्ता
सती सूर्योदये यावत्स्याद्बुधश्चवारस्तन्यतो लभ्येति अथ वा उदये कृष्णसंयुक्तास्यष्टमी किंचित्स्यात्सैव न तु मध्या
रात्रगतास्यान्नवमी च सर्सैकला ततः परं प्रवृत्ता सती मध्यरात्रं व्याप्य सूर्योदयपर्यंतास्यादिति. अथ वा उदये याष्टमी
स किंचित्स्यात् असंतस्यापि मध्यरात्राच्चर्वमेव समाप्ता न तु अहोरात्रांतं यावत् नवमी तु सकला अहोरात्रांतं यावदित्यव्य
वहितान्वयेनैव योज्यं. न तु उदये किंचिदिति व्यवहितान्वयापत्तेरिति अस्मिंश्च व्याख्यात्रये यत्सत्या परात्वसंतस्यपादि

दित्यनुपदमेवाभिधास्यमानः। सप्तम्यष्टम्योश्चास्य वाक्यस्य विषयः स्वविषयशोधः। यदि तेनैवं न्यायेन व्याख्यायते तदा यथाश्रुत
वाक्यबलात् यदा पूर्वेद्युर्निशीथेऽष्टमीमात्रसत्त्वमुत्तरेद्युश्च निशीथात् पूर्वं भाविन्यष्टमी रोहिणीयुक्तापि च सती यदा बुध
वारस्तदैवोत्तरा स्यान्न तु बुधाभावे। यावद्वचनं वाचनिकमिति न्यायात्। यदि तु बुधाभावेऽपि रोहिणीयोगमात्रेणैतद्वचन
वशादुत्तरोच्यते तदा रोहिणीयोगाभावेऽपि बुधयोगमात्रादुत्तरा स्यात्। अन्यतरापायेऽप्येतद्वचनप्रवृत्तेः स्वीकृतत्वात्। ऋ
क्षयोगवद्वारयोगस्यापि प्राशस्त्यहेतुत्वाच्च। अतोऽर्धजरतीयं स्यात्। किंच यथा पूर्वेद्युर्निशीथेऽष्टमीमात्रसत्त्वे उत्तरेद्युश्च
निशीथात् पूर्वं ऋक्षयोगे बुधसत्त्वे चैतद्वचनादुत्तरेद्युर्व्रतं। एवं पूर्वेद्युर्निशीथे सऋक्षाष्टमीसत्त्वेऽप्युक्तेद्युर्बुधयोगाधिक्या
दुपवासापत्तिः। यत्तु पूर्वेद्युर्निशीथरूपे मुख्यकाले जयंतीसत्त्वात् तत्त्यागे फल वाक्यसंकोचापत्त्या बाधीयते। रितं हेयाद्विना
तत्पूर्वेद्युर्निशीथेऽष्टमीमात्रसत्त्वे उत्तरेद्युश्च ऋक्षादियोगसत्त्वेऽपि समानमिति पुनरर्धजरतीयापात्तमोक्षः। तस्मादस्य दुरुक्तैक
वाक्यवाक्यस्य गतिरिति। अपरे त्वेवमाहुः। मासि भाद्रपदेऽष्टम्यामित्यादीनां निशीथे विद्यमानाया अष्टम्या यास्य तत्पराणां
भविष्योत्तरादिवाक्यानां द्वितीयदिने रोहिण्यादिविषयत्वेनापि सावकाशत्वादस्य च वाक्यस्योपवासशब्दाश्रयणा

दुर्लभ्यत्वाभिधानेन प्राशस्त्यमात्रपरत्वाच्च पारणादिनविहितदानपूजादिविषयत्वेनापि सावकाशत्वाद्बलाबलावि
शेषेऽपि प्रकृते भविष्योत्तरादिवचनानां भूयस्त्वादेकस्य चैकत्वाद् भूयसां स्यात् स्वधर्मत्वमिति न्यायेन बहूनां संकोचा
ख्यबाधस्यायोगान्निशीथवर्तिन्या अष्टम्याश्च पूजाकालस्य बाधे कालवाक्यस्यापि बाधापत्तेरिदं वाक्यं पूर्वेद्युर्निशी
थेऽष्टमीसत्त्वे परेद्युश्च रोहिणीयोगे तस्योपवासविषये बाधितत्वात् पारणादिनकर्तव्यदक्षिणादानपूजादिविषयत्वेनै
व तिष्ठते। एवं च पूर्वाण्हे दैविकमिश्रादिवाक्यानुगुण्यमपि भवति। न चैवं वैयर्थ्यमिति वाच्यं। रोहिणीबुधवारनवमी
योगप्रयुक्तफलविशेषबोधनेन सार्थक्यादिति सर्वमनवद्यं। यदा तत्संलक्षणा पूर्वेद्युर्निशीथादूर्ध्वमष्टमी रोहिणी च
प्रवृत्ते द्वितीये वाह्नि प्रागेव निशीथात् समाप्ते तदोत्तरे पोष्या। संकल्पकाले सत्त्वात्। सप्तमीसंयुताऽष्टम्यामित्यादिरुक्तं
दात्। मुहूर्तेनापि संयुक्तेति पाद्माच्च। पूर्वविद्धाष्टमी या तु निमाधयत्तिश्चितपाद्माच्चेति। इति। विविधनिबंधास्मार्त
पौराणवंधानपि गुरून्कुलगम्यं संप्रदायं विचिंत्य। हरिजनिदिनमष्टम्याख्यमद्यापि कैश्चिन्नविदितमिति सम्यक्कृतं
करोति निर्णितायं इत्थं निष्ठमलध्यस्य तिरपि पूर्वसूरिमतेभ्यः। ते धेऽष्टमी गतं द्राकुशंकरः पंचाननः स्मार्तः॥ ॥

२२ इति श्रीमत्कृष्णजन्माष्टमीसंशयोच्छेदपरिच्छेदः॥ ॥एकादशीवेधविवेको धनिर्णीतस्या व्रतस्नानमतः समाव
न्·निबंधकृद्भिः प्रतिपत्तिभूमिर्विशोध्यते शंकरसूरिणेह॥१॥ तत्र कालादर्शे हेमाद्रिमाधवलिखितवाक्यनिचयस्ता
वल्लिख्यते·भविष्यपुराणे·अरुणोदयकाले तु दशमी यदि दृश्यते सा विद्धैकादशी तत्र पापमूलमुपोषणं·तथा अरुणो
दयवेलायां दिशागंधो भवेद्यदि·दुष्टं तु तु प्रयत्नेन वर्जनीयं नराधिप·गरुडपुराणे·दशमीशेषसंयुक्ता यदि स्यादरुणोदयः
नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतं·सौरधर्मेषु·आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता·सैकादशी तु संपूर्णा वि
द्धान्या परिकीर्तिता॥स्कांदे·उदयात्प्राक्तनस्तु नाडिकाऽरुणोदयः।तत्र स्नानं प्र॥शस्तं स्यात्स हि पुण्यतमः स्मृतः॥
गरुडपुराणे देवीरहस्ये च·उदयात्प्राक् चतुर्विद्धा मुहूर्तद्वयसंयुता·संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही।भविष्ये
वर्ते·कीदृशस्तु भवेद्वेधो योगो विप्रेंद्र कीदृशः।योगे वेधे ममाचक्ष्व याभ्यां दुष्टमुपोषणं।चतस्रो घटिकाः प्रात
~~र्वर्ते·कीद~~ररुणोदयनिश्चयः।चतुष्टयविभागोऽत्र वेधादीनां किलोदितः।अरुणोदयवेधः स्यात्सार्धं तु घटिका
त्रयं·अतिवेधो द्विघटिकः प्रभातदर्शनाद्रवेः।महावेधोऽपि तत्रैव दृश्यते कौंन दृश्यते।तुरीयस्तत्र विहितो यो २२

गः सूर्योदये सति·स्मृतिरित्युपन्यस्ता हेमाद्रौ·निशीथांते तु यामार्धे देवादिदिवसादने·सारस्वतानध्यपते वारु
णोदय उच्यते·स्कांदे·प्रतिपत्सभ·मिश्येनाउदकादोदयाद्रवेः।संपूर्णा इति विख्याता हरिवासरवर्जिता इति।अत्र
कालादर्शे अरुणोदयवेधाद्यौ पपृस्तितस्मिन्सति वैष्णवैर्नोपोषितव्यमिति मतौ व्यावर्णयं।तीतिपरमतमुपन्यस्त
निरस्तं च·इमं पक्षं परमयोगी वितानेत्।श्रूयते न मत्स्यते इत्यादिग्रंथेन·तयोरुभावर्ज्ञ नोगतिरुक्ता·उषःकाले तु संप्रा
प्तशौचं कृत्वा प्रयत्नवान्·ततः स्नानं प्रकुर्वीत दंतधावनपूर्वकमिति दक्षवचनादरुणोदये दंतधावनवर्जनकाला
देकादश्यां तु प्रविष्टेरुणोदयकालत्वेन हरिवासरवर्जनोक्तिररुणोदयकालान्वितेकादशीफलाय पर्याप्तेति संपूर्णे का
त्युक्तं·अरुणोदयविद्धैकादश्युपोषणमपि दुष्टं किमुत सूर्योदयोर्ध्वविद्धैकादश्युपोषणमित्येवं परारुणोदयविद्धै
कादश्युपवासनिषेधोक्तिः।अरुणोदयवेधाभावे च वैष्णवानामिति व्यवस्थाप्यनुपपन्ना·पतु वचनं दशी
मीशेषसंयुक्तेतिनरपि कैमुतिकन्यायेनोदयोर्ध्वविद्धैकादश्युपवासनिषेधपरं वैष्णवपदमप्यवैष्णवानामप्यु
पलक्षकमिति।तदिदं कालादर्शजन्मतमयुक्तं।अरुणोदयेत्यादिग्रंथस्य हि कोऽर्थः।किमरुणोदय उपविद्धैकादश्यु

२३ पवासनिषेधोक्तिः। सूर्योदयोर्ध्वविद्धैकादश्युपवासनिषेधं लक्षयतीति चेन्न सूर्योदयोर्ध्वविद्धैकादश्युपवासनि-
षेधस्तुत्यर्थार्थवादतयेति। नाद्यः लक्षणायां प्रमाणाभावात्। किंच वैपरीत्यमपि सुवचं सूर्योदयोर्ध्वविद्धैकादश्युपवास-
निषेधोक्तिरिव हि अरुणोदयविद्धैकादश्युपवासनिषेधपरेत्यपि शक्यमेव वक्तुं। न द्वितीयः। ब्रह्मवैवर्तवाक्ये ह्युयो-
गारब्धसूर्योदयवेधनिषेधैकवाक्यतयाऽरुणोदयवेधनिषेधस्य तत्स्तुत्यर्थतास्यात्। तदपि विपरीतं कैमुतिकन्यायसंभ-
वात्। यानि तु भविष्यपुराणगरुडपुराणादिवाक्यानि तेषां सूर्योदयवेधनिषेधैकवाक्यताया अभावान्न तत्स्तुत्यर्थ-
तापरत्वेन स्वातंत्र्येणैकवाक्यताधीनत्वस्य न्यायविद्भिरुक्तेः। अतः कालादर्शकृन्मतं तावदयुक्तं। अथेदानीमवशिष्ट-
माधवहेमाद्रिमते। तत्रापीदं तावदुभयोरप्यविप्रतिपन्नं वैष्णवविषयोऽरुणोदयवेधनिषेधः इतरविषयः सूर्योदयवेध इ-
ति। अरुणोदयपरिमाणे तु विप्रतिपत्तिरस्त्यपो। तत्र माधवः दशमीवेधसंयुक्तो यदि स्यादरुणोदयः। नैवोपोष्यं वैष्णवेन त-
द्दिनैकादशीव्रतमिति गरुडपुराणवाक्यमुपन्यस्य अरुणोदयस्य प्रमाणं स्कंदपुराणनारदाभ्यामुक्तं उदयात्प्राक्चतस्र-
स्तु नाडिका अरुणोक्तास्तस्मिन्नरुणोदये वेधा बहुधा तेय प्रश्नोत्तराभ्यां ब्रह्मवैवर्ते दर्शिता इत्युक्त्वा ब्रह्मवैवर्तवाक्य २३

मुपन्यस्य तस्यार्थमाह। अयमर्थः। वेधातिवेधमहावेधयोगाश्चत्वार उपवासस्य दूषकाः। तत्र रवेः प्रभासदर्श-
नात् सूर्यसार्धं घटिकात्रयमेकादश्या व्याप्तं ततः प्राचीने घटिकाद्वयेऽरुणोदयसंबंधिनि दशमीसत्त्वे वेधस्तु स्या-
त्। यदा घटिकाद्वयमुपरितनमेकादश्या व्याप्तं पूर्वं तु घटिकाद्वयं दशम्या व्याप्तं तदानीमतिवेध इत्युच्यते। यदा सूर्य-
स्य दर्शनादर्शनकाले एकादशी व्याप्नोति ततः प्राक्कृत्स्नोऽप्यरुणोदयकालो दशम्या व्याप्तस्तदा महावेधः। यदा सू-
र्योदयेऽस्पष्टे सति पश्चादेकादशी प्रवृत्ता ततः प्राच्यामुदयवेलायां दशमीविधत्वेन तदा योगाख्यो दोषो भवतीति स-
र्ववेधापेक्षया तुरीयो भवतीति। अतएवोपसंहरन्ते परे एते वेधातिवेधमहावेधयोगाख्या वेधाः। इत्युक्तास्तु त्रयो-
रुणोदयवेधाश्चतुर्थ उदयवेध इति॥ तदिदं माधवमतमप्यपेशलं। तथा हि। आदित्योदयवेलायाः प्राङ्मुहूर्तद्वया-
न्विता। सैकादशी तु संपूर्णा विद्धान्या परिकीर्तितेति सौरधर्मवाक्ये रव्युदयात्प्राङ्मुहूर्तद्वयसत्त्वेन ततः प्राक् दशम्याऽन्व-
यस्य सत्त्वेऽपि विद्धत्वं पर्युदस्तं न स्यादरुणोदयवेधस्यानुक्तावपि किंविषयं तत्स्यादिति वीक्षायां उदयात्प्राग्यदा विप्र मु-
हूर्तद्वयसंयुताः। संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही इति स्कांदादुपवासविषयस्य निश्चयेन स्यारुणोदयवेधाः

२४ त्वावश्यंभावान्मुहूर्तद्वयस्य च शान्तिमात्रभेदेन चतुस्त्रिंशद्दंडशान्तिमाने सपाददंडचतुष्टयत्वं स्यात्। द्वात्रिंश
द्दंडशान्तिमाने दंडचतुष्टयत्वं स्यात्। एवं कदाचित्सार्धोनदंडचतुष्टयं कदाचित्सार्धदंडत्रयं स्यात्। तन्न्यूनश्च सार्धदं
डत्रयं स्यात्। तन्न्यूनश्च सार्धदंडत्रयमात्रसत्त्वे वेध इति।भो एवमनेन सपाददंडचतुष्टयादिसत्त्वरूपावेधा न संगृ
हीताः स्युरिति तद्वाक्यविरोधः स्यात्। मुहूर्तद्वयवाक्ये चोक्तकालादर्शहेमाद्र्योः संमत इति न निराकरे। एवं नि
शिप्रांते तु यामार्ध इति हेमाद्रिणा लिप्रयाणि केनानिर्दिष्टाकरं तथा विलिखितेन वाक्येन सपाददंडचतुष्टया
दिसत्त्वरूपा अपि वेधा उक्ता। माधवेनान संगृहीताः स्युरिति तद्वाक्यविरोधोऽपि स्यात्। किंच अस्त्वेवं तद्वाक्ये
सार्धत्रिघटिकामात्रैकादशीसत्त्वरूपवेधोक्त्यनंतरं द्विघटिकामात्रसत्त्वरूपः संदिग्धवेधरूपश्चेति द्वेध
यमरुणोदयवेधत्वेन माधवव्यवहृतं यदुक्तं तस्य का गतिः। किंतु दोषाधिक्यार्थमुक्तसार्धत्रिघटिकांतर्गतत्वे
सिद्धस्य दोषस्यानुवादार्थं वाक्यभेदप्रसंगात्। योगवेधो ममाचक्ष्वेति तत्स्तु पक्रमः। आद्यं वेधत्रिधापि अयं यो
गविधापीति वाक्यद्वयमेवात्रानुमन्यते नान्यदपि वाक्यद्वयं द्वितीये तु यथा द्विघटिकावेधवाक्यं संदिग्धवे २४

धवाक्यं च सार्धत्रिघटिकावेधांतर्गतत्वात्सिद्धस्य दोषस्यानुवादार्थं एवं सार्धत्रिघटिकावेधवाक्यमप्यर्था
द्दोषार्थं किं न स्यात्। द्विमुहूर्तवेधवाक्येन रात्रिप्रांतयामार्धवेधवाक्येन च सपाददंडचतुष्टयादिसत्त्ववेधां
तर्गतत्वात्। न चेयमपूर्वा रीतिः सर्वनिबंधकृद्दर्शितेन विज्ञानेश्वरयोगिना सप्तपुरुषव्याप्तिरपि सापिंड्ये नि
रूपिते पंचानीत्यपि तन्नस्त्रीन तांत्यमातृतः। पंचमीं सप्तमीं चैव मातृतः पितृतस्तथैत्यादिना तदंतर्गतैरेवा
द्रिवेधार्थतानस्तावात्स्यर्थनेसुक्ते॥ अत एव हेमाद्रिणा राज्यंत्ययामार्धवेध एवारुणोदयवेध इति मतमु
क्त्वा पक्षांतरस्त्वत्र पि घटिकास्त्वरुणोदये सार्धघटिकात्रयात्माग्दशमीस्पर्शस्य वेधकत्वाभावोऽन्यथा सार्ध
घटिकात्रयोक्तिरिति माधवमतमनूद्य। यन्मतमुक्तं तद्यनेनैव माधवमतदूषणेनापास्तं। पल्लवे तु सकलदोषपरि
जिहीर्षया हेमाद्रिणा मतमुक्तं चतस्रो घटिकाः प्रातररुणोदय उच्यते इति घटिकाचतुष्टयस्य अरुणोदयवे
धः स्यात्। सार्धं तु घटिकात्रयमिति च सार्धघटिकात्रयस्यारुणोदयकालत्वस्मरणे पि निशिप्रांते तु यामार्धे इ
ति राज्यंत्याष्टमभागे चारुणोदयकालत्वस्मृतेर्मकरकर्कसंक्रांतौ सप्तविंशति घटिकामात्रत्वाद्रात्रेस्त

२५ ऽष्टमभागेन सार्धघटिकात्रयस्यापि व्याप्यशक्तेः किंचिदधिकघटिकात्रयव्यापिन्या अपि चैकादश्या दुद
यात्स्याति। घटिकाव्याप्येकादशी यदा। सा द्विधैकादशी नामवर्जयेद्धर्मकांक्षिभिरिवाक्ये त्रिघटिकाव्यापिनी
त्वव्यपदेशाविरोधात् घटिकात्रयव्याप्त्युक्त्यारुणोदयकालीनदशमीस्पर्शलक्षणोपपत्तेः। सार्धघटिकात्रयोक्ति
रप्याविंशतिघटिकामात्ररात्रिविषया। मल्लरास्तु सत्री। विंचघ्नीकस्यचतस्रो घटिका इत्युक्तमिति। तदेतद्धेमाद्रि
मतमप्यापातरम्यमेव न क्षोदक्षमं। तथाहि। किं भवता द्विमिगमक्रमध्वधसिलंपेनरीत्यंतयामार्धवेधवाक्य
मेवाद्रियते न मुहूर्तद्वयवाक्यं प्रस्तुतेदमेवं स्वयं पेकालादर्शकलाचोत्काफरं न पूर्वं किं चाष्टाविंशतिघटिकारूपे
द्वात्रिंशत्घटिकारूपे च रात्रिमानेन तुभा सार्धघटिकात्रयं घटिकाचतुष्टयं च यामार्धं संभवतीति व्यवस्थोप
पत्तेर्लक्षणा न तयोक्ता घटिकात्रयं तु न कदाचिद्रात्र्यर्धयाम इति तत्रार्धयामलक्षणा त्वयोक्ता सा मुहूर्तद्वयारु
णोदयवेधवाक्यादरे पितुः चैव त्वया या मुहूर्तद्वयवाक्यं कथं नेयं। तत्र यदि ब्रूयान्मुहूर्तद्वयेन यामार्धमेव ल
क्ष्यते इत्यांतरत्वात् इति ब्रूयादेवं तन्न व यामार्धेन मुहूर्तद्वयमेव लक्ष्यतां। तथापि किं विनिगमकमिति चेत्॥ श्र २५

णुव्याप्येन व्यापकस्याव्यभिचाराच्छीघ्रं लक्षणा भवतीति सैव युक्ता न व्यभिचारिलक्षणा। अत एव न व्यपदे
शाधिकरणे मत्वलक्षणा गौणीतः प्रबलेत्युक्तं। न च तत्पूर्वपक्षयुक्तिमात्रत्वादनादरणीयमिति वाच्यं सिद्धांतिनापि कृतत्त
यागौणीस्वीकृतेरस्य न्यायस्याभ्युपगमात्। ततश्च प्रकृते यामार्धेन व्याप्येनाव्यभिचाराद्व्यापकमुहूर्तद्व
यलक्षणा युक्ता न व्यभिचारिणा मुहूर्तद्वयेन यामार्धलक्षणा। अपि च। यथा सर्वाधिकसप्तपुरुषावधिकसा
पिंड्ये पंचमात्सप्तमाद्दूर्ध्वं मातृतः पितृतस्तथेत्यनेन निर्णीते सति तदर्वाक्संख्यपुरुषसापिंड्यवाक्यानि सर्वा
ण्यार्षाद्युपपादितानि पुनस्तद्विरुद्धार्थबोधकानीत्युक्तं विज्ञानेश्वरयोगीश्वरादिभिः। एवमत्रापि तत्तद्रात्रि
मानेन तत्तद्यामार्धं रात्रिषोडशांशद्वयरूपमनन्यथासिद्धं मुहूर्तद्वयवेधबोधकवाक्यबोधितमिति पंचद
शांशद्वयादर्वाक्संख्यारूपमिति तद्व्यपमर्वाडिषुधार्थेन पुनर्मुहूर्तद्वयवेधबोधकवाक्यविरुद्धार्थबोधकमि
ति सार्धत्रिघटिकाघटिकाचतुष्टयवाक्ये तु न तद्दर्शनेन रात्रिमाने मुहूर्तद्वयेन तत्परिमाणमेवेति न तत्परं एवं त्रि
घटिकावाक्यं तु यामार्धलक्षकं न वममनु मुहूर्तद्वयपरमिति विशेषः। तस्मान्मुहूर्तद्वयवाक्यमेवार्सएका

२६ दशीव्रतनिर्णयो युक्त्युद्र्स्मनवर्षे॥ ॥इति श्रीमत्° एकादशीव्रतविषयवैष्णवोपवासनिषेधप्रयोजनका
रुणोदयसंशयोऽयं परिच्छेदः॥ ॥अथ चतुर्दशीद्वैतनिर्णयः॥ ॥तत्र मध्ये श्रावणमासस्य शुक्लापातु चतुर्द
शी॥ सा रात्रिव्यापिनी ग्राह्या परा पूर्वाह्णगामिनीति बौधायनवाक्ये रात्रिशब्दश्रवणात्त्रयोदशीदिने अप्रविष्ट
रात्रिमात्रे विद्यमानपि चैत्रश्रावणशुक्लचतुर्दशी पूर्वैव ग्राह्या स्यात्तत्सकलदिनव्यापिन्या परत्वे इति हेमाद्रिमाध
वादिनिबंधालोचनेनावगततः प्रतिभाति· व्याप्यस्यैव निष्कर्षः। नरात्रिमात्रव्यापिनी पूर्वा किंतु पूर्वदिने परात्ह्न
व्यापिनी मुख्या तदभावे त्रिमुहूर्तप्रवेशश्च स्यपि पूर्वा रात्रिमात्रसत्वे तु परैव· अत्रोपपत्तिः॥ पंच विधानिस्य
त्रवाक्यानि·एकं तावत्स्पूर्वमुक्तं। तथा सामान्यतउत्तरविद्धाविधायकं किंचित्· यथा युग्मवाक्यं चतुर्दश्याश्चतत्तु च
तुर्दश्याश्च पूर्णिमेति पूर्णिमायुगात्याश्चतुर्दश्याः शुक्लपक्षमात्रविषयत्वान्नेदं सामान्यवचनं अतः कथं सामान्यं सत्
तृतीयैकादशीत्यनेन विशेषणउपसंहृियत इति— त्· युग्मानि युगभूतानां षण्मुन्योर्वसुरंध्रयोः। रुद्रेण द्वादशी युक्ता
चतुर्दश्या च पूर्णिमा॥२॥ प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलमिति निगमवाक्योक्तं· पूर्णिमेत्यादि। तथा शु २६

क्लचतुर्दशीत्वेनोत्तरविद्धाविधायकं किंचित्· यथा नारदीये· तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी। पूर्वविद्धा न कर्त
व्या कर्तव्या परसंयुतेति· तथा कृष्णचतुर्दशीत्वेन विशेषत एव पूर्वविद्धाविधायकं किंचित्· यथा परस्तंबः। कृष्णपक्षेष्टमी
चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धा तु कर्तव्या परविद्धा न कस्यचिदिति· तथा शुक्लकृष्णोभयचतुर्दश्युपादानेनाऽपरा
ह्णव्यापिन्याश्चतुर्दश्यास्त्रयोदशीविद्धाया विधायकं किंचित्· यथा स्कंदपुराणे। चतुर्दशी तु कर्तव्या त्रयोदश्या युता
विभो। मम भक्तैर्महाबाहो भवेद्या चापराह्णिकी। दर्शविद्धा न कर्तव्या राकाविद्धा कदाचनेति। तत्र शुक्लावाक्येन पर
विद्धाविधायकसामान्यवाक्यं शुक्लाया मुपसंहृियते· तावतात्तु कृष्णचतुर्दश्या पूर्वविद्धात्वं न स्यादिति कृष्णवा
क्येन तत्स्याः पूर्वविद्धत्वमुक्तं। न चैवं कृष्णवाक्यस्यार्थवत्त्वेपि तेन परविद्धासामान्यवाक्यबाधितुं स्वच्छुक्लायामेवाव
तिष्ठत इति शुक्लावाक्यमुपसंहारकमनर्थकं स्यादिति वाच्यं। स्पष्टार्थत्वेनानर्थक्याभावात्· स्पष्टार्थे हि योऽर्थोवा
क्यान्तरेबोध्यते सोऽन्यत्रोपसंहारेण बोध्यत इत्युभयीरप्यर्थवत्ता। एवं च कृष्णा पूर्वा शुक्लोत्तरेति सिद्धं उभे अप्यपरा
ह्णव्यापिन्यौ चेत्स्त्रैव एव कार्ये इति स्कांदेनोक्तं· तत्र शुक्लाया मुत्तरविद्धत्वस्य प्राप्तस्यापवादो भवति· कृष्णायां तु पूर्व

२७. विद्धत्वं प्राप्तमेव तत्रापराह्णव्याप्युक्ता सा मुख्या तदभावे त्रिभिर्मुहूर्तैस्त्रयोदशीदिने प्रविष्टा ग्राह्येति सिध्यति। ए
वं सिद्धे इति विचार्यते रात्रिवाक्ये किं विधीयत इति। तत्र न तावद्द्वयमपि विधीयते सा रात्रिव्यापिनी ग्राह्येति च परापू
र्वाह्णगामिनीति च वाक्यभेदप्रसंगात्। तस्मादन्यतरदेव विधेयं तत्रापि यदि रात्रिव्यापिन्या विधिः स्वीक्रियते तेन तो
मूलोत्तरकल्पनापत्तिः क्वापि स्मृत्यन्तरे तद्विध्यभावादमेकत्र पूर्वोत्तरविद्धयोरेव विधानात्। किंच परापूर्वाह्णगामि
नीत्यस्यानुवादत्वसंभवे पूर्वोक्तविधेः स्यात्। न च तत्संभवति सत्यनुवादः स्मृत्यन्तरसिद्धस्य वा स्यात् रात्रिविद्धाविध्यन्य
थानुपपत्तिसिद्धस्य वा। नाद्यः। स्मृत्यन्तरसिद्धस्य स्मृत्यन्तरे शास्त्रान्तरन्यायेनानुवादायोगात्। अन्यथोपनयनादिष्व
प्यनुवादापत्तेः। अत्रापि शुक्लचतुर्दश्युत्तरविद्धाविधीनां बहूनां स्मृत्यन्तरगतानां हेमाद्र्यादिभिरुपन्यासात्।
न द्वितीयः। न हि चैत्रश्रावणशुक्लचतुर्दश्यो रात्रिव्यापित्वविधिना तदन्यासां चतुर्दशीनां नियमेन पूर्वाह्णव्यापित्वं
सिध्यति। अपराह्णव्यापिन्यादेरपि संभवात्। किंच। द्वे एव रात्रिव्यापिन्याविति एवं नियमे पूर्वाह्णव्यापित्वं सि
ध्यति। अपराह्णव्यापिन्यादेरपि संभवात्। किंच। द्वे एव रात्रिव्यापिन्याविति यमेऽपि हि अन्या न रात्रिव्यापिनीति २७

व सिध्येन्न त्वन्या पूर्वाह्णव्यापिन्यपराह्णव्यापिन्यहर्व्यापिनी वेत्यादि। अनूपतां तर्हि रात्रिव्यापित्वाभा
व एव तल्लक्षणया परापूर्वाह्णगामिन्या स्वनेनेति चेन्न सर्वत्र हि तिथेः खंडत्वे पूर्वापरत्वादितिथेरानियमेन
प्रसंगे ईदृश्येवेति नियमः क्रियते न पुनरियमेवेति तेन परा न रात्रिव्यापिनीत्येतदनुवादो लक्षणयेत्यप्ययुक्तः।
अथ परेत्युत्तरत्र तिथ्यंतरोपादानमेव नानार्थग्राहकं नेह पक्षि व्यापिन्येवेति नियमः किंतु द्वे एव रात्रिव्यापिन्या
विति। तेन परा न रात्रिव्यापिनीति लक्षणयानुवादो युक्त इति चेन्न। एवं तर्हि मूलांतरकल्पनेनानापादकोपमेव
पक्षो युक्तः। परापूर्वाह्णगामिनी सा यमेयविधिः शास्त्रान्तरन्यायेनोत्तरविद्धां विधत्ते तत्र च न पूर्वाह्णगामिन्ये
वेति नियमः किंतु परयैव तिथ्यंतरोपादानेन नानार्थग्राहकत्वादरे वेति नियमः। सा रात्रिव्यापिनी स्वत्र च रात्रिव्यापि
त्वस्य परापूर्वाह्णगामित्वविधिना नियमतो सिद्धेर्दक्षएम्भा पूर्वाह्णगामिन्यानावण चानुघत्से स च किं रात्रि
व्यापित्वेन वा स्यात् त्रिमुहूर्तप्रवेशेन वा अपराह्णव्यापित्वेन वेति वीक्षायां स्कांदवाक्येनापराह्णव्यापिन्या
स्त्रयोदश्या युक्ता याः शुक्लाः कृष्णा विहितत्वात्तादृश्येव चैत्रश्रावणशुक्लचतुर्दश्योर्ग्राह्या। ननु सर्वस्या अपि

२५ शुक्लाचतुर्दश्यामीदृक्कोनयोर्विशेष इति चेत् शृणु। इतराऽपराह्णव्याप्त्यभावे परविद्धा ग्राह्या परा पूर्वा
ह्णगामिनीति विधिवलात् तु पूर्वदिने त्रिमुहूर्तप्रविष्टापि अनयोस्तु द्वयोः परेति विशेषणेन व्यावर्तनेः सा
र्थक्यात् पूर्वाह्णगामित्वनिषेधेनाप्यसत्यपि अपराह्णव्याप्त्यभावेन परविद्धयोर्ग्रहणं किंतु पूर्वदिने त्रिमुहूर्त
प्रविष्टेऽप्यनुकल्पत्वेन ग्राह्यत्वात्। तथा चाह माधवः प्रतिपत्प्रकरणे पार्वणनिर्णये· सायाह्णस्यापि कर्मका
लत्वं क्वचित् स्मर्यते· दिनान्ते पंच नाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः। उदये च तथा पित्र्ये दैविके चैव कर्मणीति। न
न्वेवं परविद्धानिषेधे प्रबलादेव सायाह्णव्याप्त्या अथ भावे रात्रिव्यापिनी किमिति न स्यादिति चेत्· दैवकर्मत्वा
हस्यविधिविता रात्रिव्यापिन्या अयोग्यत्वात्· सा रात्रिव्यापिन्यमिति तु न विधिरिति युक्तमेव। परविद्धानिषेधस्त्वा
र्थिकः। पूर्वविद्धासत्त्वे एव। तदभावे तूत्तरापि न दुष्यति। किं च· यथाश्रुतरात्रिव्यापिन्याग्रहणे यत्रौ त्रयोदश्या
मुहूर्तं घटिकार्धघटिकं वा प्रवेशेऽपि पूर्वा न स्यात्· यथाश्रुतत्यागेन रात्रियुक्तत्वमात्रग्रहे तु रात्रौ त्रयोदशीघटि
काषट्कप्रवेशे परदिने षड्दंडतिथि च स्याद्रात्रौ द्वादशदंडं चतुर्दशीप्रवेशेऽपि पूर्वैव ग्राह्येति न्यायप्रसत्त्येत। तथा २५

हेमाद्रिमते यथा मासशिवरात्रे रात्रिव्यापित्वोक्तेः पूर्वरात्रिव्यापिनी सैव पूर्वापरा वा ग्राह्येत्युक्तं एवमिदमपि
चतुर्दश्या दर्शपूर्वरात्रौ उत्तरप्रहरद्वये विद्यमानं उत्तररात्रौ च किंचिन्न्यूना प्रहरद्वयपर्यंतमपि विद्यमानं वह्नु
रात्रिव्यापित्वात् पूर्वमेव स्यादिति सकलशिष्टाचारबाधः। इति रात्रिविद्धाविचारः। अत्र माधवेन स्कंदवाक्ये शुक्ल
पक्षोभयचतुर्दश्यौ रात्रौ परा ह्यक्तो त्रयोदशी विद्धयोर्ग्रहणं यम भक्तैरिति शिवभक्तविषयत्वलिंगात् तद्विषयमिति सु
क्तं युक्तं चैतत्। संदिग्धेषु वाक्यशेषादिति न्यायात्· तेन सामान्यतो हेमाद्र्युक्तैः रूपरो हे च ता सर्व वर्णनीयमिति
सर्वं सुस्थं॥ ॥इति श्रीभट्टशंकरकृतश्चतुर्दशीद्वैतनिर्णयः॥ ॥अथ नृसिंहचतुर्दशीनिर्णयः॥ ॥नृसिं
हप्रसादे नृसिंहपुराणे॥ ॥वैशाखस्य शुक्लपक्षस्य चतुर्दश्यां विवस्वति। अस्तं गामिनि सर्वेषां दुरत्नभस्य मध्यतः प्र
वभूव महाविष्णुर्नरसिंहाकृतिर्नृप· तस्यो व्रतं नरैः कार्यं महाविघ्नारतिप्रियं। शनिवासरयोगेन स्वाति योगे
न भूमिप। महाजयेन ता विरूयाता दुर्लभा व्रतिना मिहेति· तथा च भविष्यपुराणेः रापेषु शुक्लचतुर्दश्यां शुद्दे व निज
वा सुभे· मंदवारे नृसीहो भवेत्तौ यां चादि कस्यके· सायंकाले सदसदस्तिरक्षोदमनकारणात्· एवपुण्यामतमो

२९ योगो दिव्यसिंहोदयाह्वयः। कालः सुदुर्लभतरो धर्मकामार्थमोक्षदः। अर्धोदयानामयुतं न चास्याः ईति वैक
ल्यं। प्राधान्येन तिथिः पुण्या किंतु स्वात्यादिसंयुता। चतुर्णामपि वर्णानां व्रतेस्मिन्नधिकारितेति। तथा टोडरानंदे
स्कांदे। वैशाखस्य चतुर्दश्यां सोमवारे निशार्धके। अवतारो नृसिंहस्य प्रदोषसमयेऽभिजाः इति॥ अत्रायं निर्णयः नृ
सिंहपुराणे सामान्यतः कालउक्तस्तेरुक्तः· विवस्वति अस्तंगामिनीति· घटिकापरिमाणानुक्तेः तस्य स्कंदेन निर्णयः।
तत्र हि प्रदोष उपात्तः। प्रदोषस्य लक्षणं हेमाद्रौ स्कांदे त्रिमुहूर्तः प्रदोषः स्याद्रवावस्तंगते सतीति तस्यापि संकोचः।
भविष्यपुराणे· तत्र सायंकाल इत्युक्तेः। नक्षत्रदर्शनात्संध्या सायं तत्परतः स्थितमिति· अत्र यद्यपि सायंशब्दे
न परावधिर्नलभ्यते तथापि प्रदोषशब्देन परावधिलाभात्सायंशब्देन च पूर्वावधिलाभात्त्रिघटिकात्मकसायंसंध्या
त्रिघटिकात्मकस्तदुपरि भाग्यतः। ऊर्ध्वं घटिकात्रयं प्रदोषसायंशब्दाभ्यां परस्परं विशेषणाल्लभ्यते· जन्मकालत्वेनेति तत्का
लव्यापिनी नृसिंहचतुर्दशी युक्ता। उभयदिने तत्कालव्यापित्वे तदसंस्पर्शे तु स्वातीयोगस्य संस्पर्शे स्वातीयोगाच्छनिसोमा
न्यतमयोगास्तिद्वयोर्वणिजकरणयोगास्ता शास्त्रोक्तेर्निर्णय इति॥ ॥ इति श्रीमत्शंकरभट्टतनौ नृसिंहचतुर्दशी २९

निर्णयः॥ अथ शिवरात्रिव्रते हेमाद्रिमाधवयोर्विप्रतिपत्तिः तत्र हेमाद्रिमाद्रिः तत्र यदा चतुर्दशी पूर्वदिने
निशीथमात्रव्यापिनी उत्तरदिने तु प्रदोषमात्रव्यापिनी निशीथस्यापि व्यापिनी वा तदार्धरात्रात्पुरस्ताच्चेज्जया
योगो यदा भवेत्· पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति वचनात्पूर्वा उत प्रदोषव्यापिनी ग्राह्या शिवरा
त्रिचतुर्दशी रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेदिति वचनादुत्तरेति संदिह्याह· उच्यते यद्यप्यर्धरात्रादि
ति वाक्ये द्वितीयदिने प्रदोषव्याप्त्यभावेऽपि सावकाशं प्रदोषवाक्यं चार्धरात्रादुपरि जयायोगेऽपि सावकाशं तथा
प्येवंविधे विषये द्वितीयचतुर्दशीग्रहणे प्रागुदाहृतपूर्वविद्धशिवरात्रिप्रतिपादकबहुवाक्यसंकोचः प्रसज्ये
त· पूर्वशिवरात्रिग्रहणे तु तदभाव इति सैव ग्राह्या· किंच· पूर्वा बहुकर्मकालव्यापिनी उत्तरा तु न तथेति सैव
ग्राह्येति· तदिदमयुक्तं· तत्रापस्तववदायोविशेष उक्तः· द्वितीयचतुर्दशीग्रहणे प्रागुदाहृतपूर्वविद्धेत्यादिना· तत्र
किंविस्पपदं त्रिमुहूर्तात्मकवेधपरमुतयोगमात्रपरमुत रात्रिवेधपरमथ निशीथवेधपरं· नाद्यः· उत्तरदिनेप्यवया
प्रदोषव्यापिनीत्वेसां त्रिमुहूर्तत्रयोदशीवेधाभावेन पूर्वविद्धा शिवरात्रिविधायकवाक्यानामप्रवृत्तत्वात्

३० न द्वितीयः तानि द्विवाक्यानि कानि चिद्योगं वदंति कानिचिद्वेधं तत्रोपसंहारन्यायेन योगसामान्यं वदताम
पि वेधाख्यविशेषपरमेव नतु विपरीतं तत्तश्च प्रागुदाहृतेत्याद्यदीपोक्तार्थे हेमाद्रिग्रंथे विद्धपदं योगमा
त्रपरमिति द्वितीयपक्षोनुपपन्नः अस्तौ तु पक्षो हेमाद्रिणा शिवरात्रिप्रकरणे जन्माष्टम्येकादश्यादिवेधेत
रानिरूपणादेवाः पास्तौ एवं तावदाद्यदोषउत्तरं शिवरात्रिग्रहणे उक्तो न युक्तः परस्तु किंचेत्यादि द्वितीयदो
षउक्तः सोप्ययुक्तः तत्र पूर्वा बहुकर्मकालव्यापिनीत्युक्तंतत्रापि किं कर्मशब्देन किं जागरणमुच्यते उतोप
वासः नाद्यः जागरणोपवासयोरन्योन्यकालविरोधेस्य यमेव पूर्वमुपवासकालव्यापकत्वस्योक्तत्वात् न
द्वितीयः अपिच्योपवासस्याहोरात्रव्यापकस्येति ग्रंथेन दिनरात्रिबिमुक्त्या याउपवासकर्मकालत्वस्योक्तत्वादु
त्तराया एव बहुकर्मकालव्यापित्वात् तत्तश्च द्वितीयदोषोप्ययुक्तः एवं हेमाद्र्युक्तदोषद्वयोद्धारे सति प्र
दोषव्यापिनीतिवाक्यं नोत्तरंग्रहणमेव युक्तं अर्धरात्रात्पुरस्ताच्चेदितिवाक्यं तु द्वितीयदिने पि प्रदोषव्या
प्त्यभावे ज्ञेयं नच प्रदोषव्याप्तिवाक्यमेवार्धरात्रात्पुरस्ताज्जयायोगात् प्रवर्त्ततामिति वाच्यं सामान्यविशे ३०

षत्वावकाशनिरवकाशत्वाद्यादिविनिगमकांतराभावे व्याकांक्षितानाकांक्षितविधानयोराकांक्षितविधानं ज्या
यस्त्विति न्यायस्य विनिगमकत्वात् यदा त्वन्यतरदिने प्रदोषव्याप्तं तदाने नैव निर्णयः तत्रापि तु परादिनद्वयेपि च
तुर्दशीसत्त्वे द्वितीयदिनेच प्रदोषव्याप्तिर्नास्ति न च प्रदोषव्याप्तिपक्षवत् यथा पूर्वविद्धत्वबोधकान्निनियामका
नीति हेमाद्रिणोक्तं यथा च दिनद्वयेपि प्रदोषव्याप्तौ त्रयोदशीयदादोषे दिने मुक्तिप्रमाणतः जागरे शिवरात्रिःस्या
न्निशि पूर्णा चतुर्दशीति पद्मपुराणमपेक्षितविधानादेव नियामकमेवं दिनद्वयेपि प्रदोषव्याप्त्यभावे अर्धरात्रात्पुर
स्तादिति वाक्यं नियामकमाकांक्षितविधानादेवेति हेमाद्रिलिखितवाक्यमात्रालोचनेन निर्णयो न्याय्यो वक्तुं त
स्मादुपेक्ष्य स्वल्पत्वात् पूर्वोक्तो निर्णय इत्युपरम्यते माधवनिबंधे तु नानावाक्यानि निशीथव्याप्तचतुर्दशीग्रह
णप्रमाणानि स्पष्टानि लिखितानि तदनुरोधेन तत्कृतस्तु निर्णयो न चतुराननेनाप्यन्यथयितुं शक्यते तस्माद्धेमाद्रि
कृतनिर्णयदूषणं कृत्वा तल्लिखितवाक्यमात्रालोचनेन योस्माभिर्न्याय्यो निर्णयः कृतः स माधवकृतनिर्णयसं
वादेवेतिन कोपि दोष इत्यलं भूयसा लेखनपल्लवनेनेत्युपरम्यते इति शिवरात्रिव्रतनिर्णयः सावित्रीव्रते पूर्णमा

३१ स्वां वि[illegible]पत्तिः तत्र माधवः पूर्वविद्धैव सावित्रीव्रते पंचदशी तिथिरित्युक्त्वा पूर्वदिने द्वादशदंडचतुर्दशी स
त्वेऽपराह्ने नाड्यो द्वादश भूतस्य स्युश्चेत्तत्र परेहनीति· तत्र मूलं स्कांदे· नागो द्वादशनाडीभिर्दिक् पंचदशभि
स्तथा· भूतो द्वादशनाडीभिर्दूषयत्युत्तरां तिथिमिति· हेमाद्रौ तु सावित्रीव्रतमंतरेण भवतो मायौर्णमास्यो परे
इति पूर्वविद्धा सावित्रीव्रते पूर्णिमा उक्ता मनु पूर्वदिने द्वादशदंडचतुर्दश्या सत्वे पवादउक्तः तद् स्कांदे विप्रतिप
त्तौ माधवमतमयुक्तं· नागविद्धा न कर्त्तव्या षष्ठी चैव कुहूः च न इति स्कांदे न एकादशी न कर्त्तव्या दशमीसंयुता
विभो इति स्कांदेनं भूतविद्धा न कर्त्तव्या दर्शपूर्णिमा कदाचनेति ब्रह्मवैवर्त्तेनिषेधात् पूर्वविद्धनिषेधं एकादश्या
दशमाविद्धापाविधंपूर्णिमायाश्च तु तुर्दश्याविधाया निषेधपनन्यानागो द्वादशनाडीभिरित्यादिना षट्घटिका
पयादेन द्वादशघटिकापरिमाणमात्रविधिरभ्युपगस्यतेऽसाघयात्· पश्चागउत्तरां तिथिं षष्ठी दूषयतिनद्वाद
शनाडीभिरपद्दिगुत्तरां तिथिमेकादशी दूषयति तस्पंचदशनाडीभिर्यदूतउत्तरां तिथिं पूर्णमासीं दूषयतीनद
द्वादशनाडीभिरिति· माधवमते तु भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमित्यस्य सावित्रीव्रते प्रयस्य ३१

गीकारे तत्र पूर्वविद्धायाविधिरेयास्तिन तु विषेधइत्यनंतरोक्तवचनव्यवस्थायोगाद्विशिष्टविधिरापद्येत
भूताष्टादशनाडीयुक्ता पूर्णमासीनग्राह्येति तथा सत्य गौरवं स्यात् तन्नायुक्तं पूर्वापरविरुद्धश्च माधवग्रं
थः षष्ठीप्रकरणे हि यदि कदाचित्तिथिक्षयवशादुत्तरविद्धा न लभ्येत तदा स्कंदव्रतवदन्यान्यपि व्रतानि नागवि
द्धायां कर्त्तव्यानि· तदाहवशिष्ठः· एकादशी तृतीया च षष्ठी चैव त्रयोदशी· पूर्वविद्धानुकर्त्तव्या यदि न स्या
त्परेहनि इत्युक्त्वा नागो द्वादशनाडीभिरित्युदाजहार· तद्ग्रंथे दूषय
त्युत्तरां तिथिमिति यावद्विरुद्धविधिशेषत्वमंगीकृत· पूर्णमासीप्रकरणे चेतद्विरुद्धं सावित्रीव्रते प्रसक्त
पूर्वविद्धानिषेधकत्वं स्वीकृतमिति पूर्वापरविरोधो माधवस्येति· ननु नागो द्वादशनाडीभिरित्यस्यैकादश्यंशेनो
वस्पंचदशनाडीविद्धोत्तरैकादशीनग्राह्येति विशिष्टविधित्वमभ्युपेयमेव· अतएव माधवेन एकादशी
प्रकरणं तदुक्तं यानि तु सत्यंत्राण्येकभक्तनक्तोपवासाख्यानि तानि तेषां मध्या[illegible]दिव्यापितिथिग्रहण
प्रासौ दशमीविद्धा निषिध्यते· द्वादशी कस्मै पूर्णाविद्धा दिनाधिनं दां पूर्णमपि त्यजेत्· यदा छेदास्त्र संलग्नं

३२ नियमेषु चतुर्थ्यपि· नोपोषितं च नक्तं चैकभक्तमेवायाचितं इति· दिनार्धेन सार्धसप्तमुहूर्त इत्यर्थः· एतत्
देवाभिप्रेत्य दिक्पंचदशाभिरित्युदाहृतं· इभोन्यूनवेधे खलितिथ्यंतरवन्मध्याह्नादिव्याप्तिर्गृहीतव्येति· एवं
यदन्ये कमूलस्यनोपगपवाद्वादशीकस्य वाक्य यदिक्पंचदशाभिरुक्तथेऽस्यापि विशिष्टविधित्वमेवाभिप्रे
ति· ततश्च वैरूप्याच्छागे द्वादशनाडीभिर्भूतोष्टादशनाडीभिरित्यनयोरप्यंशयोः षष्ठी पूर्णिमाविषयविशिष्टवि
धित्वमेव युक्तमिति अत्रोच्यते· हेमाद्रिः पूर्णाविद्धां दिनार्धेनेत्यत्र पूर्णाविद्धां पक्षार्धेनेति पाठं पठितवान्·
माधवोक्तपाठेपि द्वादशीकस्य वाक्यं नक्तादिचतुष्टयविषयमेवादिक्पंचदशभिरिति वाक्यं तत्रव्रतविष
येपि प्रवर्त्तते तत्र कथमेकमूलकस्यनास्यात्· अथ दिक्पंचदशभिरिति वाक्यस्य द्वादशीकस्य वा वैयनोपसं
हारोभिप्रेतः तन्न भिन्नविषयत्वात्· दिक्पंचदशभिरिति हि पंच्यदशनाडीविषयं द्वादशीकस्य वाक्यं तु दिनार्ध
विषयं दिनार्धं च विष्णुवादेन्यत्र पंचदशनाडीभ्योः कदाचिन्न्यूनं न भवति कदाचिदधिकमितिपि· अतो ल
क्षणयैकविषयत्वं कल्प्योपसंहारेण वाच्यः नच लक्षणायां प्रमाणमस्ति नच तत्राविनिगममैम कँस्ति पंचदश ३२
म

शब्देन वा दिनार्धलक्ष्येण दिनार्धेन वा पंचदशसंख्येति· अतः स्वतंत्रयोरेवोभयोः स्वस्वविषये प्रवृत्तिर्युक्ता·
तस्माद्वैरूप्याच्छागो द्वादशनाडीभिरित्यादिवाक्यं च यत्तदपि पूर्वविद्धानिषेधानुवादेन घटीपरिमाणलक्ष
कयैवविशेषविधिपरमेवेति युक्तं· ननु षष्ठ्येकादशी पूर्णिमास्तपक्षे पूर्वविद्धानिषेधाः संति तत्रोत्तरविद्धावि
धयोपि संति तत्राष्टादशदंडन्यंतु दृश्यते स्वायेग्य पूर्वाविद्धनिषेधव्यवस्थापकं स्यात्यर्थं न्यूनत्वेप्युत्तरवि
द्धापरात्वग्राह्यस्यादिति चेदत्र षष्ठ्यादिनोत्तरं वदामः यथाहि षष्ठेऽपत्तियाबैमाषाश्चैणकाः कोद्र
वाश्चेति निषेधो। व्रीह्यादिविषयमेवं माषादिव्यावृत्तिसिद्धौ व्यर्थः सन् प्रतिनिधित्वेन निषेधतो प्युक्तं एवमि
हाप्युत्तरविद्धायाअसंविधिप्येव पूर्वविद्धाव्यावृत्तिसिद्धौ न निषेधो यदा कदाचिदुत्तरविद्धायाअसंभवात्स्म
रव्ध्य(?) वत्स्य चाचश्य कर्त्तव्यत्वेन तत्कोपोपयोगादनुकल्पत्वेन पूर्वविद्धा प्रसक्तावत्र पूर्वविद्धानिषेधोर्थवान्·
एवं सर्वत्र तिथ्यंतरेपि उत्तरविद्धाविधिपूर्वाविद्धानिषेधेषु पूर्वविद्धाविध्युत्तरविद्धानिषेधेषु च· तवेव(?)
च्चाष्टादशदंडैरेव विध्यानुकल्पत्वेन नन्दम्यास्यान्यूनानुग्यास्येयेत तदर्थं मतोष्टादशनाडीभिरित्यादिवचन

३२ मिति॰ अयमेव न्यायः श्रावणपूर्णिमादिष्वपि बोध्यः तस्मिंद्धेमाधवमतमयुक्तं हेमाद्रिमतमेव तु न्या-
य्यमिति॰ ननु नागादिवाक्यस्य पूर्वविद्धानिषेधानुवादेन परिकापरिमाण विशेषमात्रविधित्वाभ्यु-
पगमेन विशिष्टविधित्वाभावात्सावित्रीव्रतादावप्रवृत्तिरितिचेन्माधवमतदूषणं किमर्थं कृतं॰ हेमाद्रिणा वि-
शिष्टविधित्वांगीकारेणापि विषयांतरे तस्याः सावित्रीव्रतादावपि प्रवृत्तिसिद्धेर्माधवमतनिरासोपपत्तेः तथा
हि हेमाद्रिणोक्तं॰ युग्मनाग्नो द्वादशनाडीभिरित्यादिवाक्यस द्दिनद्वयेपि कर्मकालव्यापित्वे तद्व्यापित्वे च दृष्ट-
व्यं उपवासविषयता तु नमुख्नः अविद्धानिषेधेश्च न खर्व्यं नेदिनादितु॰ मुहूर्तैः पंचभिर्विद्धाम्याद्यैवैका-
दशी तिथिः तदर्धतदर्धरिद्धान्यन्यानि दिनान्युपवसेन्नरः अपिध्यानामलाभेतुपयोदधिपूर्णानिया॰ सखंडे-
वाल्पपश्चायाद्युपवासस्तु संभवेदिति कृष्ण्यश्रृंगवचनात्॰ उपवासे च घटिकामात्रनिषेधोद्वेधोपि दू-
षणस्तुत्तरातिथिमिति वचनांतरसिद्धं॰ न चैतत्रकैकभक्तायाचितविषयं तेषां प्रदोषादिव्यापिन्यां तिथौ
विधमेन कर्तव्यतोक्तेर्दिनाद्येहनिच तदसंभवेतल्लोपः प्रसज्येतेति॰ तदेतद्धेमाद्रिमतमप्ययुक्तं विशिष्टविधि- ३२

गौरवापत्तेरेव॰ न चैव युग्मयदिने कर्मकालव्यापित्वे तद्व्यापित्वे वा निर्णयप्रसंगः अन्यतिथिवदुपपत्तेः
तदुक्तं हेमाद्रावेवास्मात् पंथात् प्राक् तथा चैवं व्यवस्था यदा दिनद्वयेपि कर्मकालव्यापिन्यास्तिथेरसंभवः
संभवो वा तदिवसं युग्मादिवाक्येण कौदिष्टादिकर्मकालव्यापिन्यास्तिथेः संभवे॰ संभवे च ह्रासवृद्ध्यादि-
वाक्यमिति॰ तस्मादस्मदुक्ते नागादिवाक्यार्थाभ्युपगमेनैव माधवमतदूषणं सूक्ष्ममिति॥ ॥इति सावित्री-
व्रतपूर्णिमाश्रावणपूर्णिमादैवनिर्णयः॥ ॥अथ सावित्रीव्रते पर्यनिर्णयः संक्षेपतः माधवः सावित्रीव्र-
ते पूर्णिमायाः पूर्वविद्धत्वं व्रतांतरेचोत्तरविद्धत्वमुक्त्वा सावित्रीव्रते त्वष्टादशदंडचतुर्दशीविद्धोत्तरविद्धे-
त्यो र्यसाह॰ हेमाद्रिस्तु अष्टादशदंडचतुर्दशीवेधउभयत्रापि कर्मकालव्याप्तिविषयमिति वदन् तथाष्टादशदंड-
चतुर्दशीविद्धापि पूर्णिमा सावित्रीव्रते पूर्वैव सभिमेति॰ तत्र हेमाद्रिमतमेव न्याय्यं॰ तथाहि॰ भूतोष्टादशना-
डीभिरिति वाक्यं पूर्वविद्धाविधेः शेषः उत्तरविद्धाविधेर्वा पूर्वविद्धानिषेधस्य वोत्तरविद्धानिषेधस्य वा॰ न
तावदाद्यः सावित्रीव्रतेष्टादशदंडचतुर्दशीविद्धाया एवमात्रस्यैवत्वापत्तेः नो सः पूर्वविद्धाद्युद्देसस्मिन्

३४ एतस्मात्पक्षे तच्छेषत्वात्सावित्र्याः सबलत्वात्‌ · न द्वितीयः उत्तरविद्धाविधिर्विशिष्टधर्मोत्तरैः एकादश्यष्टमीषष्ठीपौ
र्णमासी चतुर्दशी · अमावास्या तृतीया च उपोष्याः स्युः परान्विता इति · एतच्छेषत्वे च सावित्रीव्रतव्यतिरि
क्तोपवासादिकार्येषु भूतविद्धा दर्शादेश्चतुर्दशी । विद्धा न ग्राह्या किं तूत्तरैवेत्यर्थः स्यात्‌ न तु तत्र सावित्रीव्रते न कार्य
मित्यर्थो लभ्यते · तस्मात्पूर्वविद्धानिषेधशेष एव · स च प्रसक्त एवेति · पूर्वविद्धा न कर्तव्या अमावास्या च पूर्णिमा
वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति · तच्छेषत्वे च सावित्रीव्रतातिरिक्तेषु भूतविद्धा दर्शादेश्चतुर्दशी विद्धा न
कार्येत्यर्थः स्यात्‌ न तु सावित्रीव्रते ईदृशी न कार्येत्यर्थो लभ्यते · अथ स्यात्‌ तर्ह्यमेव भूतविद्धाया अस्या ईदृशी दुष्टेति ·
तदा च सावित्रीव्रते त्वसावप्रसक्तेति तद्विषयत्वं लभ्यते इत्युच्यते तत्र तथा सति निषेधान्तरकल्पना गौरवा
पत्तेः हेमाद्रिस्तु पूर्वविद्धत्वप्रतिपादनमुखेन पूर्वविद्धा न कर्तव्येति पूर्वोक्तनिषेधशेषत्वया संलग्नस्य सत्त्व एव
एतादृशी पूर्वविद्धा न कर्तव्या उपसंहारस्यायोगात्‌ · उभयत्र कर्मकालसत्त्वे तूत्तरविद्धाविधिनैव निर्णयः अन्य
था च कर्मकालसत्त्वे कालशास्त्रादेव निर्णयः तस्माद्दर्शे दर्शादेश्चतुर्दश्या युक्ता पूर्णिमा सावित्रीव्रते न ३४

ग्राह्येति माधवाचार्यसिद्धान्तो दुष्ट इत्यलम्‌ इति सावित्रीव्रते द्वैधनिर्णयः ॥ ७ ॥ अथोपाकर्मनिर्णयः ॥
प्राचीनेषु निबंधेषु निर्णीतं यदं जसा · तन्निर्णेतुमयं यत्नो मम नैनागमार्थता १ याज्ञवल्क्यः अध्यायाना
मुपाकर्म श्रावण्यां श्रवणेन वा · हस्तेनौषधिभावे वा पंचम्यां श्रावणस्य तु · अध्याया वेदाः श्रावण्यां पौर्णमा
स्यां श्रवणेन युक्ते हनि वा हस्तेन युक्तायां पंचम्यां वा अपरे तु हस्तेन युक्ते हनि वा पंचम्यां वेति व्याचक्षते ओष
धिप्रादुर्भावे इति श्रावणस्येति च सर्वैः संबध्यते · आश्वलायनः अथातोऽध्यायोपाकरणमोषधीनां प्रादुर्भा
वे श्रवणेन श्रावणस्य पंचम्यां हस्तेन वेति · बौधायनः श्रावण्यामाषाढ्यां वोपाकृत्य तैष्यां माघ्यां वोत्सृजेत्‌ ·
कात्यायनः उपाकृत्योदगयने ततोऽधीयीत धर्मवित्‌ उत्सर्गश्च तथा तैष्यां माघ्यां प्रोष्ठपद्यपि वा · गोभिलः प्रो
ष्ठपदी हस्तेनोपाकरणं · प्रोष्ठपदीं प्राप्य स्वाध्यायारंभः तेन भाद्रपदशुक्लगते हस्ते सामगानामुपाकर्मेत्यर्थः म
नुः श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि · युक्तश्छंदांस्यधीयीत मासान्‌ विप्रोऽर्धपंचमान्‌ · अपि शब्दे
न भाद्रपदश्रवणहस्तपंचमीनामुपादानं · अत एवाश्वलायनः तु वार्षिकमित्याचक्षते इति · वर्षाकाले भवं वा

३५ र्षिकमित्येषा समाख्या वर्षाकालश्च श्रावणभाद्रपदौ· तत्रैतत्समाख्यावचनमन्यार्थं·च्छ्रावणे साक्षाद्वि
धिनैव सिद्धेर्भाद्रपदविध्यर्थं· मासश्च विहितो मासांतरमेव बाधते न श्रावणपंचमीहस्तान् प्रत्युतापेक्षत एव
तातिति भाद्रपदगतश्रावणहस्तपंचमीनामपि सिद्धमुपाकर्मकालत्वं· एतेषां च वैकल्पिकानां कालानां स्व
स्वगृह्यानुसारेण व्यवस्था· तत्राप्यनन्यप्रयोजनत्वपाक्रमोपादानमाकांक्षावशेन सति संभवे सागायोगात्
विवक्षितं न तु यस्य कस्य चित्क्रमस्यावर्जनीयत्वमपि विवक्षितं· तेन बह्वृचानां स्वसूत्रानुरोधाच्छ्रावणे प्रथमं
श्रावणे तच्च ग्रहसंक्रांत्यादिदुष्टे हस्तयुक्तपंचम्यां ततः केवलपंचम्यां केवलहस्ते चेति· एवं याजुषाणां पौर्णमा
स्यादिक्रमः· सामगानां हस्तादिक्रमः· क्वचित्सूत्रे विपर्यस्तोपादानेपि उपाकर्म कुर्वंति क्रमात्सामर्ग्यजुर्वि
दः· यदह संक्रांतियुक्तेषु हस्तश्रावणपर्वस्विति व्यवस्थितस्याशक्तकालविशेषविधिना क्रमकल्पविधिबाधा
त्· तत्रापि श्रावणपौर्णमास्यां ग्रहसंक्रांतिदुष्टायां याजुषेषु वाजसनेयिहिरण्यकेशिभिर्बह्वृचैश्च श्रावणग
तपंचम्यामेवोपादेयं· तथा च स्मृतिमहार्णवे· संक्रांतिर्ग्रहणं वापि यदि पर्वणि जायते· तन्मासे हस्तयुक्तायां ३५

पंचम्यां वा तदिष्यते· अत्र च हस्तयुक्तायामित्यत्र विशेषणाकांक्षायामुपस्थितायाः पंचम्या एवाध्याहारेणा
न्वयात्र पंचमीपदावृत्तिदोषः· तेन हस्तयुक्तपंचम्यां केवलायां वेति विकल्प इति केचित्· न च हस्तयुक्ताया
मन्यस्यां तिथौ पंचम्यां वेति विकल्पः· अन्यतिथेरनुपात्तत्वेन विशेष्यत्वासंभवात्· यदि स्याच्छ्रावणे पर्व
ग्रहसंक्रांतिदूषितं· स्यादुपाकरणं शुक्लपंचम्यां श्रावणस्य तु· तिथिवाक्यस्य पर्वणो ग्रहसंक्रांतिदोषे पंच
मीमात्रे उपाकर्मविधायकस्यास्य पिपक्षे संकोचप्रसंगाच्चेति· अन्ये तु पंचम्यां वेति पंचम्यास्तिथ्यंतरेणैव
विकल्पप्रतीतेस्तद्विशेषापेक्षायां हस्तयुक्तायामित्यस्य तद्विषयत्वेनैव युक्ता· पदेनैवोपस्थितिस्तत्र त्रं·
एवं च पक्षद्वयेपि बुद्धिस्थस्यैवाध्याहारे स्वास्मिन्पक्षे पंचमीपदे यथाश्रुत भवति· भवत्पक्षे तु हस्तयुक्त
त्वाभावविशिष्टपंचमीपरमिति विशेषः· एवं च विकल्पे स्थिते संकोचेपि बलादापतितः स्त्री क्रियते तस्मात्स
पंचम्या हस्तयुक्तत्वेतरेण विकल्पः· तत्रापि हस्तयुक्ताया असंभवे केवलेति· अत्र हेमाद्रिः· एतच्च योज
सनेयिविषयं· तथा च स्मृतिमहार्णववचनमोत्तरं· संक्रांतिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत्· उपाकृतिस्तु

३६ पंचम्यां कार्या वाजसनेयिभिः अत्र केचित् पूर्ववाक्यस्थाधारण्याद्वाजसनेयिपदस्योपलक्षणतां मन्वाना
स्तैत्तिरीयाणामपि पंचम्यामुपाकर्मेच्छंति। तदयुक्तं। लक्षणाप्रसंगात्। लक्षणा तथ्योपसंहारस्य युक्तत्वात् प
दि च पूर्ववाक्यस्थाधारण्यादनूलक्षणा ततः पुरोडाशं चतुर्धा करोतीत्येतस्माधारण्याद् आग्नेयं चतुर्धा करोतीत्य
त्र लक्षणाप्रसंगः। तिष्ठतु वा वाजसनेयिवाक्ये तथापि न पूर्वस्माद्वाक्याद्धस्तसंक्रांतिदोषे तैत्तिरीयाणां पंचम्या
मुपाकर्म प्राप्नोति। तथाहि। अत्रोपाकर्मणि स्मृतिषु नानाकाला विहितास्तेषां तत्तद्गृह्यानुसारेण व्यवस्थितविक
ल्पोपपत्तौ नाव्यवस्थितविकल्पाश्रयणं युज्यते। न च तैत्तिरीयगृह्ये पंचम्यामुपाकर्म श्रूयते। येषां गृह्ये पंचम्य
पि श्रूयते तेषामव्यवस्थितविकल्पस्य प्राप्तौ पद्धत्या प्राथम्यात् संचमी तदसंभवे कालांतरमिति व्यवस्था प्राप्तौ इदं वचन
मुपतिष्ठते। एवं चापेक्षितविधिर्भवति। ननु तैत्तिरीयाणामप्राप्तपंचमीविधौ। तस्माद्वाजसनेयिनामेव य हस्तसंक्रां
तिदुष्टायां श्रावण्यां श्रावणशुक्लपंचम्यामुपाकर्म। तैत्तिरीयाणां तु प्रौष्ठपद्यामेवेति। तदेतद्धेमाद्रिमतमयुक्तं। यत
एतत्येतत्सामान्यवाक्यं सूत्रोपात्तपंचमीकालव्यवस्थापकं। अतएवाग्नेयवाक्यवैषम्याद्वाजसनेयिवाक्येपि तै ३६

त्तिरीयाणामपि मध्ये येषां सूत्रे पंचम्युपात्ता तेपि लक्षणया वाजसनेयिपदेन संग्रहस्यात्। उपात्ता च हिरण्यकेशिनाम
पि सूत्रे पंचमी। एवं च स्मृतिमहार्णववाक्ययोः पर्वपौर्णमासीग्रहणं श्रवणस्याप्युपलक्षणं। वाजसनेयिपदं च बहवृ
चानामपि तद्वाक्ययोः सूत्रोपात्तपंचमीव्यवस्थापकत्वात्। इदं च बहवृचवाजसनेयिहिरण्यकेशिनां हस्तयुक्तायां
पंचम्यामुपाकर्म तदसंभवे केवलायां तस्यां हस्तयुक्ततिथौ वेति। हिरण्यकेशिभिन्नतैत्तिरीयाणां तु प्रौष्ठपद्यां इति।
बौधायनानां श्रावण्यां हस्तसंक्रांत्यादिदुष्टायामाषाढ्यामुपाकर्म। श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य सर्व
दीक्ष्याधीयीतेति बौधायनोक्तेः सर्वेषां चैषामोषधीप्रादुर्भावाभावे नाशौचेनान्यथा वा कथंचित् श्रावणमासा
तिक्रमे यथायथं भाद्रपदगतश्रवणपर्वण्योस्तत्रचासंभवे श्रावण इव पंचम्यां हस्ते वेति। तथा च बह्वृचगृह्यप
रिशिष्टकारिका। अत एवौषधयस्तस्मिन्मासि तु न भवंति चेत्। तदा भाद्रपदे मासि श्रवणेन तदिष्यते इति। अत्र
श्रवणेति भाद्रपदगतहस्तपंचमीपर्वणामुपलक्षणं। तद्वार्षिकमित्याचक्षते तद्रूपेनेन श्रावण्यां प्रौष्ठपद्यां वेति म
नुवाक्यगतापिशब्देन च एषामुपाकर्मस्य साधितत्वात्। गौतमेन च श्रावणादि वार्षिकं प्रौष्ठपदीं वोपाकृत्याधी

यीतद्वंद्वांस्यर्थपंचमान्मासान्मितिश्रावणमादिं कृत्वा इत्युक्तत्वाच्छ्रावणातिक्रमएव भाद्रपदगतानामेषां
विधानस्य व्यवस्थावगमादपेक्षितविधिलाभाच्च· एवं चापेक्षितविधिलाभादेवाशौचेनान्येन वानिमित्तेन श्रा
वणमासातिक्रमेप्येतएव भाद्रपदगताः काला इति व्यवस्थासिद्धौ बह्वृचगृह्यकारिकायामोषधिप्रादुर्भाव
ग्रहणे निमित्तांतरेणापि श्रावणमासातिक्रममात्रोपलक्षणं· अतश्च यच्च गुरुशुक्रास्तादौ प्रथमोपाकर्मनि
षेधाच्छ्रावणातिक्रमतस्त्वाप्यपेक्षितविधिबलादेव भाद्रपदगतश्रवणपर्वहस्तादीनामुपादानं· यथादि
संक्रांतौ ग्रहणे चैव सूतके मृतके तथा· गणस्नानं न कुर्वीत नारदस्य वचो यथा· तन्निषेधविषये भाद्रपदगत
श्रवणादिविधिः प्रवर्त्तते· पेक्षितविधिलाभादेवं गुरुशुक्रास्तादौ प्रथमो प्रथमोपाकर्मनिषेधाच्छ्रावणाति
क्रमेप्यपेक्षितविधिलाभाद्विशेषास्त्रवर्त्तनो मनु यथा निःसहोमाग्निहोत्रादेर्गौणकालेप्यारंभः यथा दर्शपूर्ण
मासादेर्द्वितीयादिचतुर्दश्यंते गौणकाले एवं भाद्रपदगतश्रवणपर्वादेर्गौणकालत्वान्तत्रोपाकर्मारंभो
युक्तः न च गौणत्वमसिद्धं· यो हि यदसंभवे विधीयते स गौण इति तल्लक्षणात्· दिवोदितानि कर्माणि प्रमा ३७

दादकृतानि वै· शर्वर्याः प्रथमे यामे तानि कुर्याद्यथाक्रममिति वत्· उच्यते· न ब्रह्मयज्ञादौ रात्रिंदिवयोर्वैक
ल्पिकं विधानमस्ति· किं तु दिवैव तेन रात्रेर्गौणत्वं युक्तं इह तु वैकल्पिकत्वेपि वसर्वे कालाः स्मृतिषु विहितास्तेषां
चाव्यवस्थयैव केवलापेक्षितावच्छिन्नोत्तरैः क्रियते न तु गौणकालांतरमप्राप्तं कालांतरासंभवे विधीयते· तेन श्रा
वणेपि श्रवणपर्वादिर्ग्रहसंक्रांतिदोषे बह्वृचयजुःसनेस्याद्धानां पंचमा विधिर्यथा प्रथमोपाकर्मनिषेधोपि
एवं भाद्रपदगतश्रवणादिविधिरप्यपेक्षितसूतकादिनेव प्रथमोपाकर्मणि गुरुशुक्रास्तादिनिषेधेन श्रा
वणातिक्रमेपि प्रवर्त्तत एवेति सिद्धं· स च निषेधः प्रयोगपारिजाते मनुः· शुक्रे मूढे प्युपाकृत्यं विद्या विना
शनं· आयुःक्षयमवाप्नोति तस्मात्तत्कर्म वर्जयेत्· कश्यपोपि· गुरुशुक्रतिरोधानो वर्ज्यं यच्छ्रुतिचोदनात्· इत्या
ह भगवानत्रिः· श्रावणं तु परिशोध्यतः ॥ एतत्प्रथमोपाकर्मविषयं· तथा च संग्रहे· गुरुभार्गवयोर्मौढ्ये बाल्ये वा वा
र्द्धके पि वा· तथाधिमासे संसर्पमलमासादिषु द्विजाः प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृत्· प्रजापतिर
पि मलमासनिषेधमाह· उपाकर्म च होत्सर्गं च कथं पर्वोत्तमे तथा· उत्तरे नियतं कुर्यात्सर्वं तन्निष्फलं भवेत्·

३९ ज्योतिःपराशरोपि। उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः। मासवृद्धौ पराः कार्या वर्जयित्वा तु पैतृकमि
ति। प्रसवाहोत्सवो जातेष्टिः तज्जातकर्म तदाभ्युदयश्राद्धं यथाश्राद्धं वा जातनामानि ये च संस्कारसत्ताः मलिम्लुचे
पि कर्तव्या इति स्मृतिविरोधात्। अभिषेकादिवत्सुधीनां न तु कृष्णे युगादिषु। यत्तु ऋष्यशृंगः दशहरासु नोत्कर्षश्च
तुर्थ्यपि युगादिषु। उपाकर्म महाषष्ठ्योरुत्सर्गे तद्विष्वं वृषादितः तच्छंदोगविषयं। अयं स्यसार्थः दशहरादन्नाम्ना ज्येष्ठेव
षार्कउक्ता। ज्येष्ठमासि सिते पक्षे दशम्यां बुधहस्तयोः गरानंदे व्यतीपाते कन्याचंद्रे वृषे रवौ। दशयोगे नरः स्नात्वा
सर्वपापैः प्रमुच्यते। महाषष्ठी कार्त्तिके वृश्चिकार्के उक्ता। कालादर्शमात्स्ये। वृश्चिकार्के शुक्लषष्ठी भौमवारे
ण्युपस्थिता। महाषष्ठी सा प्रोक्ता सर्वपापहरा तिथिः तस्यां स्वपिति चेद्वन्हिः पूर्वं चोपोष्य वै दिनेषु षष्ठ्यां वन्हिं सम
भ्यर्च्य कुर्याद्वन्हिमहोत्सवं। यात्तु भविष्यत्पुराणे। या षष्ठी शुक्लपक्षस्य मार्गशीर्षे हरिप्रिया। महाषष्ठीति सा प्रो
क्ता यस्यां जातो हुताशन इति सेह न ग्रस्यत्वेनस्याः सौरमानानुक्तेः उपाकर्म भाद्रपदे सिंहार्के छंदोगानामाह
गार्ग्यः सिंहरवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः छंदोगा मिलिताः कुर्युरुत्सर्गं सर्वछंदसां। शुक्लपक्षे तु ह ३९

स्तेन उपाकर्मापराह्णिकं। अत्र सिंहे रवाविति सुभाभ्यां उपाकर्मोत्सर्गाभ्यां संबध्यते। ननु युगादयो न क्वापि
सौरमानेनोक्ताः प्रत्युत चांद्रमासवचनं वैशाखादिपुरस्कारेण। तथा च ब्रह्मपुराणे। वैशाखशुक्लपक्ष
स्य तृतीयायां कृतं युगं। कार्त्तिके शुक्लपक्षे तु त्रेता च नवमेऽहनि। अथ भाद्रपदे कृष्णत्रयोदश्यां तु द्वापरं। मा
घे तु पौर्णमास्यां तु घोरं कलियुगं तथा। युगारंभास्तु तिथय इति। स्कांदभविष्यपुराणयोः नवम्यां शुक्लपक्ष
स्य कार्त्तिके निरगात्कृतं। चैत्रासिततृतीयायां त्रेता वै समपद्यत। दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगं। कलिः
कृष्णत्रयोदश्यां नभस्ये मासि निर्गतः। युगादयः स्मृता ह्येता दत्तस्याक्षयकारिकाः। अत्र कल्पभेदेन विरोधः प
रिहरणीयः। देवलस्तु नक्षत्रयोगे प्राशस्त्यमाह। तृतीयायां रोहिण्यां युक्ता वैशाखस्य सिता तु या। माघाभिः स
हिता कृष्णा नभस्ये तु त्रयोदशी। तथा स्मृतिः माघासिते पंचदशी कदाचिदुपैति योगं यदि वारुणेन। नक्ष
त्रेण कालः स परः पितॄणां न ह्यल्पपुण्यैर्नृप लभ्यते सा विति। वारुणं शतभिषा। अतः कथं युगादीनामनु
त्कर्षः कालवृद्धौ। अत्र समाहितं हेमाद्रिणा मतान्तरेणोनिरस्य। वयं ब्रूमः यद्यपि वैशाखादिशब्दाश्चां

४१ द्रमासवचनादेवेतिनिरूपितं तथापि प्रागुदाहृतयुगाद्युत्कर्षनिषेधकवचनपर्यालोचनया स
कलजनप्रसिद्ध्यानुगुण्यादनुष्ठानादराच्च सौरमासगता एव युगादयो ग्राह्या इति तस्याशयः यथाच
तुर्गृहीतान्याज्यानि भर्जितानि तस्याप्यनुपाजानूपक्ष्यन भवतीत्यनुपाजाभावस्यासिद्धत्ववद्धेतुतो ऽङ्गिरसा
प्रभृतिगृह्यकारोपदेशेष्टपदस्य लाक्षणिकत्वतुष्टिवदविषयतास्वरूपापादिका एवमिहापि स्वल्पदृष्ट
वषादितइति सौरमासोपजीवनस्यसिद्धवत्वेनुत्वकीर्तनबलादेवयुगाद्युपदेशकवचनगतवैशाखा
दिशब्दानां लाक्षणिकसौरमासविषयतास्वरूपमुन्नायते · तेन मेषार्केसितत्ततीयासिंहार्के कृष्णत्रयो
दशीतुलार्केशुक्लनवमीकर्केमावास्या इत्येता एव तिथयो युगादय इत्यर्थः अतः कालवत्स्यावासोनोत्क
र्षः इत्याहुरादिपुरुषस्यैतत्तदुपदर्शितस्मृतिसिद्धमेवे सौरमानोपजीवनमनुत्कर्षहेतुत्वेनेहाकृष्यते ·
तस्माच्छन्दोगानामिव गार्ग्यतनितां हार्कएवोपाकर्मविधानादुपाकर्मनुत्कर्षस्तद्विषयएवोत्कर्षः
कालत्वं स्थोस्याद्युपाकर्मादिकर्मणोतिस्यायान्यतःकालायनोक्तासूत्कर्षोन्यविषय इति सिद्धं · न ३१

नुनिगमेश्रावण्यां श्रावण्यां कर्म यथाविधि समाचरेत् · उपाकर्मणु कर्तव्यं कर्कटस्थे दिवाक
रेः हस्तेनश्रुक्रपंचम्यां श्रावण्यां श्रवणेन वेति सामान्यतः कृकीके उपाकर्मविधानादन्येषामपि
श्रावण्यादिकृत्कथमुत्कर्षः उच्यते · प्रयोगपारिजाते पुनर्वचनं वेदोपाकरणे प्राप्ते कुलीरे संस्थिते र
वौ · उपाकर्म न कर्तव्यं कर्तव्यं सिंहयुक्ते रविति तद्देशान्तरविषयमित्युक्तं तथा च बृहस्पतिः नर्म
दोत्तरभागे तु कर्तव्यं सिंहयुक्ते कर्कटे संस्थिते भानावुपाकर्म तु दक्षिणे इति · तत्र पूर्ववाक्ये सौ
नरत्राक्येनविषयसदातादेतरयावयमेवचिंतनीयः किं बव्हृचादिसर्वविषयमुतच्छन्दोगविषयमिति
तत्र केचिदाहुः सर्वविषयमिति तत्र ब्रूमः प्रदेयतः सिंहकर्कयोरुपाकर्मव्यवस्थापकमिति तावत् निर्विवा
दं · तत्र सिंहार्केस्तावदुपाकर्मच्छन्दोगानामेव प्राप्तं बव्हृचादीनां त्विति भाष्यतदिधावायोरवा
प्यत्तेर्नर्मदोत्तरभागव्यवस्थाताव सिंहार्कसंबंधाच्छन्दोगोपाकर्मानुत्कर्षः न्याय मुद्रामुद्रितत्वाच्छ
न्दोगविषयैव तत्सापेक्षप्रवृत्तित्वेन च कर्कटे संस्थिते भानावित्यपि छन्दोगविषयमेव व्यवस्थार्थत्वेयो

४० त्रयोः समानविषयत्वावश्यंभावे असंदिग्धेन पूर्वपक्षेण च संदिग्धस्योत्तरस्य च निर्णयौचित्यात्· संदि
ग्धत्वाच्चोत्तरस्य कर्कटे उपाकर्मणो विधायकेन निगमवाक्येन कर्तृविशेषसंबंधाबोधनात्· असंदि
ग्धत्वाच्च पूर्वस्य सिंहे उपाकर्मणो विधायकेन गार्ग्यवाक्येन छंदोगसंबंधबोधनात्· अतश्च नर्मदादक्षि
णे कर्कटे उपाकर्मव्यवस्थापकेन बृहस्पतिवचनेन पूर्वोत्तरयोरुभयोर्व्यवस्थार्थतया एकविषयत्वावश्यं
भावाच्छंदोगविषयेण सतोर्थादुपसंहारस्य नानेकार्थता दोषः व्यवस्थामात्रस्य शास्त्रत्वात्। तद्यथा वार्त्र
घ्नी पौर्णमास्यामनूच्येते इत्यत्र पौर्णमास्याममावास्यायां च क्रमप्रकरणाभ्यां प्राप्ते वार्त्रघ्नी पौर्णमास्यामे
वेत्युपसंहारः पौर्णमास्यामे ~~मावास्यां च क्रमप्रकरणाभ्यां प्राप्ते वार्त्रघ्नी पौर्ण~~ व च वार्त्रघ्न्यौ वृधन्वत्यौ श्चा
व्यवस्थापकादाचित्कत्वेन प्राप्तयोर्वार्त्रघ्नीवृधन्वत्योः अन्यथा विनिव्यवस्था प्रक्रियते तेन आर्थिक उपसंहारः
व्यवस्थैवानुभाष्यते इति तथात्रापि भविष्यतीति· न च सिंहे यदुपाकर्म तन्नर्मदोत्तरे कर्के यदुपाकर्म तद्दक्षिणे
इत्युद्देश्यविशेषणविवक्षानिमित्तवाक्यभेदापत्तिः यदग्नये च प्रजापतये च सायं जुहोतीत्यत्र सूर्याय च प्र ४०

जापतये च प्रातरिति देवताव्यवस्थापरे वाक्ये ऽग्निहोत्रस्यैव प्रकरणे प्राप्तस्येहोपाकर्मणो ऽनुवादेनोभयपदार्थ
योरेव संबंधात्· यथा दृष्टांतेप्यग्नये च प्रजापतये च सूर्याय च जुहोतीत्येतावतैव व्यवस्थितदेवगमात्तदुपप
त्तये सायंप्रातरर्थयोर्विवक्षितत्वाद्विशिष्टोद्देश्यतैवाभ्युपगम्यते यथा तथेहापि नर्मदाया दक्षिणोत्तरे उपाक
र्मव्यवस्थार्थस्योपाकर्मविधिनैव प्राप्तेः कृत्स्ये तद्वचनानर्थक्यापातात् तत्परिहाराय व्यवस्थापरत्वावगमात्तदुप
पत्तये सिंहकर्कयोर्विवक्षितत्वाद्विशिष्टोद्देश्यतैवाभ्युपगम्यत इति न मीमांसामांसलमतीनां दृशानि दूषणानि
भाषयंति· प्रत्युत बृहस्पतिवचनस्य सर्वविषयत्वे यदनस्तवैव नर्मदोत्तरभागस्य सिंहस्य च छंदोगातिरिक्तान्
प्रत्यप्राप्तस्य विधानाद्वाक्यभेदः। एवं द्वितीयवाक्येपि दक्षिणस्य छंदोगान्प्रत्यप्राप्तस्य कर्कस्य विधानाद्वाक्यभे
दः· अथैतद्दोषपरिहाराय विशिष्टविधित्वमनयोराश्रयते एवं पर्वण्यौदयिके कुर्युरित्यत्र वक्ष्यमाणन्यायेन· तथा
प्यनेकविशेषणविधिकल्पनां विनाप्युपपत्तौ तत्कल्पनागौरवलक्षणो वाक्यभेददोषापरिहार एव· किंच बृहस्पति
वाक्यस्य बह्वृचादिसर्वविषयत्वे निगमवाक्येन कर्के उपाकर्मविधिरपि बह्वृचविषयः स्यात्· ततश्च दशाहरा

४१ स्थितिकृष्णश्टंगीयस्योपाकर्मानुत्कर्षवचनस्य हेमाद्र्यादिसर्वनिबंधकृदुक्तं सर्वविषयं छंदोगविषयत्वं प्रत्युक्तिषेत· न
हि नृसिंहोपादानमस्ति वृषादित इत्यादिशब्देन तु तस्य संग्रह इष्टः गार्ग्यवाक्ये छंदोगान्प्रति सिंहार्के उपाकर्मविधेः
प्रमाणेतर प्रसिद्धत्वात्· प्रमाणांतरप्रसिद्धस्यैव तत्कर्कस्याप्यविशिष्टं निगमवाक्येन छंदोगातिरिक्तान्प्रति कर्कार्के
प्युपाकर्मविधानात्· तेन वृषादित इत्यादिशब्देन सिंहस्येव कर्कस्याप्युपसंग्रहापत्तेः सोऽरमाम्नोपजीवनरूपस्य हेतो
श्छंदोगांस्तदितरांश्च प्रत्याविशेषादुपकर्मानुत्कर्षस्य सर्वविषयत्वापत्ते· र्कृष्णश्टंगवाक्यस्य छंदोगमात्रविषयत्वे
प्रतिपादकैः सर्वनिबंधैः सह भवतो विरोधः तथा उत्कर्षः कालबध्योऽस्या दुपाकर्मादि कर्मणीति सर्वनिबंधृत्तिरिति
कातीयवाक्यमुपाकर्मोत्कर्षप्रतिपादकं निर्विषयं स्यात्· तस्मात्कर्के उपाकर्मविधिर्देशविशेषे सामगविषय एवे
तीतरेषां कालद्वयस्याप्युपाकर्मोत्कर्षः सुस्थित इति सिद्धं· यत्तु कालादर्शे देशभेदेन सिंहकर्कयोर्व्यवस्थान्योक्ता किंतु
सर्वेषामेव बह्वृचादीनां श्रावणे सिंहार्के श्रवणादिषु यथायथमुपाकर्म श्रावणे तु सिंहार्काभावे भाद्रपदे व्यवस्थया
श्रवणादिषु कुर्युरिति· अध्यायानामुपाक्रमं श्रावण्यां तैत्तिरीयकाः बह्वृचाः श्रवणे कुर्युः सिंहस्थेर्काभवे यदि· अ ४१

सिंहार्के प्रौष्ठपद्यां श्रवणेन व्यवस्थयेति लदस्पेनमेव निष्प्रमाणकं स्वयमेव व्याख्याने मूलानुपन्यासादिति· अत्र
केचिदाहुः पर्वणि ग्रहणे संनिचतुर्दश्यास्त्वेपि श्रवणे उपाकर्म न कार्यं· त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवं· मां
गल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोरिति वचनात्· प्रकारांतरेणापि वेधोप्यत्र दर्शितः द्वादश्यादिस्तृतीयांतो वेध इ
दुग्रहे स्मृतः एकादश्यादिकः सौरे चतुर्थ्यंतः प्रकीर्तितः खंडग्रहेतयोः प्रोक्तमुभयत्र दिनद्वयं· दिनद्वयं पूर्वोत्तरं· ग्रह
खंडग्रहेतयोरिति वचनात् इति· तदयुक्तं नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु वा उपाकर्मणि चोत्सर्गे ग्रहवेधो न
विद्यत इति वचनात्· हस्तश्रवणपर्वाणि च्याचौदपिकानि ग्राह्याणि· तथा च परिशिष्टे· धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋ
क्षसमन्वितं· श्रावणं कर्म कुर्वीरन्नृग्यजुःसामपाठकाः। व्यासः· श्रवणे न तु यत्कर्म उत्तराषाढसंयुतं· संवत्सरकृतोध्याय
स्तत्क्षणादेव नश्यति· निगमः। ग्रहणो गोगुरुं हंति संक्रांतिः शिष्यघातिनी· तयोर्हि स्युत्तराषाढा उपाकर्मणि वेधमे· ध
निष्ठामिश्रितं कार्यमुपाकरणसंज्ञितं· कालिकापुराणे· चतुर्दश्यां समुत्पन्नाव सुरौ मधुकैटभौ· वेदान्स्यौ कुर्वतः पद्म
योनेस्तौ जुहतुः श्रुतीः। हत्वा ताव सुरौ देवः पातालतलवासिनौ। आहृत्य ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयं· अभ्र

४२ स्त्वध्यश्रुत्वा ब्रूयात्पर्वण्यौदयिके पुनः अतो भूतप्रत्येतस्मिन्नोपाकरणमिष्यते॰ आसुरं वर्जयेत्कालं वेदाह
रणशंकया॰ वृद्धस्त्वचेताः भवेदुपकृतिः पौर्णमास्यां पूर्वाह्ण एव तु॰ ब्राह्मणभोजयेत्तत्र पित्रनुद्दिश्य देव
ताः भविष्योत्तरे॰ संप्राप्ते श्रावणस्यांते पौर्णमास्यां दिनोदये॰ स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः ततो
देवान् पितॄंश्चैव तर्पयेत्परमांभसा॰ उपाकर्म दिवैवोक्तमृषीणां चैव तर्पणं॰ कुर्वीत ब्राह्मणः श्राद्धं वेदानुद्दिश्य
शक्तितः॰ अत्र चौदयिके पर्वण्युपाकर्मविधिस्तैत्तिरीयविषय एव॰ तथा च बह्वृचपरिशिष्टकारिका॰ पर्वण्यौदयि
के कुर्युः श्रावणे तैत्तिरीयकाः बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांतिवर्जिते॰ श्रवण इत्यत्राप्यौदयिक इत्यनुषज्यते॰ इतर
याजुषाणां तु पूर्वविद्धमेव पर्व॰ श्रावणी दुर्गनवमी तथा दूर्वाष्टमी च या॰ पूर्वविद्धा च कर्तव्या शिवरात्रिर्बलेर्दिन
मिति स्मृतेः॰ ननु पर्वण्यौदयिके इत्यत्र भविष्योत्तरप्राप्तौदयिकत्वविशिष्टपर्वविशिष्टोपाकर्मोद्देशेन तैत्तिरीयक
एवेति कर्तृनियमविधानादुद्देश्यविशेषणविवक्षानिमित्तवाक्यभेदात्तैत्तिरीयपदमविवक्षितमितीतरेषामप्युप
लक्षणीकृत्य सर्वयाजुषान्प्रत्यौदयिकत्वमात्रं विधीयतां॰ न चौदयिकत्वमात्रविधावपि पर्वविशिष्टोपाकर्मोद्दे ४२

शाद्वाक्यभेदात्तमो कृत इति वाच्यं॰ पर्वरूपविशेषणस्याप्यविवक्षायामुपाकर्म औदयिके ऽर्थात्स्वे स्वे काले इति विधिः
स्यादेतावतैव च बह्वृचान्प्रत्यप्यौदयिकत्वविधिसिद्धेर्बह्वृचा औदयिके श्रवणे कुर्युरिति वाक्यानर्थक्यापत्ते
स्तत्परिहाराय पर्वविवक्षाया अवश्यवाच्यत्वात्॰ श्रावणी दुर्गनवमीत्यस्य तु कर्मविशेषानुपादानाद्धिरण्यगर्भप
दिवारोपणं विषयः॰ उपाकर्मांगमाभ्युदयिकं प्रचरणाकर्म चेति॰ मैवं॰ विशिष्टविधिरेवायं॰ गृह्यादिविहितस्यापि च पुन
र्विधिर्ग्रंथकर्तृभेदात्॰ अन्यथा एकविषयानेकस्मृत्युक्तेदापत्तेः न च विशिष्टविधौ गौरवापत्तेस्तैत्तिरीयपदे लक्षणा
राज्ञा राजसूयेनेत्यादावपि त्रैवर्णिकाधिकारसिद्धेस्तल्लक्षणाप्रसंगात्॰ न च यथा वैश्वदेवेन यजेतेत्यत्र देवतान्तद्धित
प्रत्ययैश्वदेवपदस्य कथंचिदेकदेशे पि प्राप्तिसंभवे लक्षणयाप्यनुवादकत्वमेव स्वीकृतं न विधित्वं गौरवादेवं तैत्तिरी
यपदेपि स्यादिति वाच्यं॰ तत्रानुवादस्य सार्थक्याद्गौरवतो लक्षणया एव स्वीकृत्यमुपेयत्वात्॰ इह तु लक्षणयानुवादत्वेपि
तैत्तिरीयपदवैयर्थ्यापत्तेस्तत्रो विधिगौरवस्यैव स्वाभ्युपेयत्वात्॰ अन्यथा यन्यायो राजवदेप्यतिप्रसज्येतेति यथा हित
सेप्यप्रसिद्धत्वान्नयमिभ्रष्टवर्षं ब्राह्मणमुपनयीतेति तत्सत्वास्य रूपानुवादयोग्यता साक्षिकानुवादस्य च क्वचिद्दृष्टत्वमभ्यु

पगमालक्षणावश्यंभावेप्यतस्तसचर्षादिलक्षणायांप्रमाणाभावात्समभिव्याहारगम्यविशिष्टोद्देश्यपरतैवान
न्यगतिकत्वपाष्टवर्षपदोपादानबलादभ्युपेयते एवं तैत्तिरीयपक्षादिष्वपि विकल्पतन्त्रापत्तिविशेषादिति न्यायात्तस्मादेवं
व्यवस्था· यद्येकस्मिन्नेव दिने कर्मकालव्यापितः पर्वश्रवणहस्तास्तदा सर्वेषां तत्रैवोपाकर्म· यदा तु दिनद्वयेपि क
र्मकालव्यापित्वेन वा तदा तैत्तिरीयऋग्वेदिच्छंदोगानामौदयिकेषु पर्वादिषु अन्येषां त्वग्रे इति· कर्मकालस्तु साम
गानां तावदपराह्णः गार्ग्यवाक्ये छंदोगा मिलिताः कुर्युरुपाकर्मापराह्णिकमित्युक्तेः यत्तु बह्वृचेतराः भवेदुपा
कृतिः पौर्णमास्यां पूर्वाह्ण एव स्थितिः एतद्याजुषविषयं· पौर्णमास्यां योपाकृतिः सा पूर्वाह्ण इति विधेः। बह्वृ
चानां तु यद्यपि नात्र किंचिदप्युक्तं तथापि पूर्वाह्णे दैविकं कार्यमिति सामान्यवाक्यादेव पूर्वाह्णसिद्धिः अनेनैव तु
याजुषाणामपि पूर्वाह्णसिद्धेर्नित्यवदनुवादसंभवान्न पञ्चेतो वाक्ये पूर्वाह्णो विधीयते· स्मृत्यंतरं तथा कर्म विधिरे
व गार्ग्यवाक्यैरेव पूर्वाह्णापवादत्वापराह्णविधिरिति तत्त्वं· यत्तु गोभिलः अध्यायानामुपाकर्म कुर्यात्काले परा
ह्णके· पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति तद्गार्ग्यवाक्येन छंदोगविषयं उपसंह्रियते· अतः कात्या

दर्शेउपाकर्मापराह्णे स्यादुत्सर्गः प्रातरेवचेति सामान्यतउपाकर्मणोपराह्णकालिकत्वाभिधानं तदुपेक्ष्यं
छंदोगविषयमेव वाच्यारभ्येयं· अत एव हेमाद्रिणा सर्ववेदिभिः कालनिर्णयकारैः सामान्यत उक्तं अस्य च वि
धेः पूर्वाह्णकालः स्मृत इति· यत्तु परिशिष्टवाक्ये शेषो ग्रहसंक्रांतिवर्जित इति· एवं स्मृत्यंतरीयोपि पूर्वोपन्यस्त
स्तोग्रहसंक्रांतिनिषेधस्तत्र विशेषः प्रयोगपारिजाते वत्समनुः अत्रार्धरात्रादर्वाक्चेद्ग्रहः संक्रम एव वा· नो
पाकर्म तदा कुर्याच्छ्रावण्यां श्रवणेन चेति· कात्यायनोपि· अर्धरात्रादधस्ताच्चेत्संक्रांतिर्ग्रहणं तदा· उपाकर्म न
कुर्वीत परतश्चेन्न दोषकृदिति· यत्तु बह्वृचाः श्रवणे कुर्युरित्युक्तं तत्र विशेषः स्मृत्यर्थसारे· श्रवणे आदौ घटि
काचतुष्टयमभिजिन्नक्षत्रांशं वर्ज्यमिति· वेदुपिधमिवेधाबद्धीन्प्रथिस्वार्थसारामृतमिति विधुधानो शंकरसू
पनित्यं· कुमयपिमतिदोषेराविलत्वेनिरस्तोनयगतमथपूर्वैरर्थजातं निधाय· ॥इत्युपाकर्मसंशयोच्छेदप
रिच्छेदः॥ फाल्गुनपूर्णिमाहोलिकादीपनतत्पूजनोपवासादौ पूर्वविद्धाग्राह्या· युग्मवाक्यस्वश्रावणादुर्गेन
वमीदूर्वाच्चैव कुलाधानी· पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनमिति बृहद्यमवचनेन विरोधे उपसंहारात्·

४४ होलिकादीपनस्य च प्रदोषः कर्मकालः निशागमे तु पूज्येत होलिका सर्वतो मुखैरिति पृथ्वीचंद्रोदये दुर्वासो
वाक्यात् अत्र भद्रासत्वे तन्न कार्यं भद्रायां दीपिता होलिका राष्ट्रभंगं करोति वै नगरस्य च नैवेष्टा तस्मात्तां परिवर्ज
येदिति पुराणसमुच्चयात् भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा श्रावणी नृपतिं हंति ग्रामं दहति फाल्गु
नीति स्मृत्यंतराच्च भद्रायां विहितं कार्यं होलिकायाः प्रपूजनमिति निबंधाभासवाक्यं तु निर्मूलं तेन पूर्वविद्धाप्र
दोषे भद्रासत्वे तदंतोपरि रात्रौ लभ्यते तदा निशीथात्परमपि होलिकादीपनादिकार्यं प्रदोषातिक्रमेपि सा कार्या
महत्पापादूर्ध्वे च चतुर्दश्यां यदा भवेत् होलां भद्रावसाने च निशीथांते विदीपयेदिति भविष्योत्तरात् दिनार्धात्पर
तोपि स्यात्फाल्गुनी पूर्णिमा यदि रात्रौ भद्रावसाने च होलिकां तत्र दीपयेदिति पुराणसमुच्चयाच्च एवं सति
मध्यरात्रमतिक्रम्य विष्टेः पुच्छं यदा भवेत् प्रदोषे ज्वालयेद्वह्निं सुखसौभाग्यदायकं प्रदोषान्मध्यरात्रौ तं हो
लिकादीपनं शुभं मित्यादिनिबंधाभासवाक्यं हेयं यदा तु पूर्वविद्धा रात्रौ भद्रारहितः कालो न लभ्यते उत्तरदिने च
सूर्यास्तात्पूर्वमेव पूर्णिमा समाप्ता तदा भद्रापुच्छे ज्योतिषिकप्रसिद्धे पूर्वरात्र्यामेव तत्कार्यं पृथिव्यामिति यानि का ४४

र्याणि शुभानि स्युः शुभानि च यानि सर्वाणि सिध्यंति विष्टिपुच्छे न संशय इति लल्लवचनात् यदा त्वस्मिन्नेव
विषये उत्तरा पौर्णमासी सार्धयाममात्रमिता ततोधिका या प्रतिपत्त्वोत्तरदिने व्यापिगामिनी तदा पौर्णमास्यु
त्तरप्रदोषव्याप्तिप्रतिपन्मध्येपि होलिकादीपनीया न तु पूर्वरात्रौ विष्टिपुच्छे तदुक्तं भविष्योत्तरे सार्धयाममत्र
यं पूर्णा द्वितीये दिवसे यदा प्रतिपद्वर्धमाना तु तदा सा होलिका स्मृतेति तथाचैषा पूर्वप्रदोषे सत्यपि उत्तरदि
न प्रदोषे पि तत्रैव यावत्कृत्स्नेन देकदेशे वा वर्तते तदा सा सुतरामुत्तरा ग्राह्या पूर्वरात्रे भद्राव्याप्तत्वादुत्तरत्र प्र
दोषे लाभाच्च पूर्वोक्तं च पूर्वविद्धाग्राह्यत्वं उत्तरत्र प्रदोषास्पर्शे व्याप्यभावे च न च कालव्याप्तिशास्त्रादेतत्सिद्धे
व्यर्थं पूर्वविधिशास्त्रमिति वाच्यं फलविशेषार्थत्वात् यत्तु केनचिदुक्तं पूर्वदिने प्रदोषास्पर्शे प्रतिपद्वृद्ध्यभा
वे च सार्थकात् तत्र पूर्वरात्रौ भद्रारहितदीपनकालालाभात्प्रदोषव्रतस्य पुनरुक्तभोजनादिषु तत्पूर्वभाविनः सा या
ह्नस्य गौणकालत्वदर्शनात्प्रतिपत्क्षये प्युत्तरादिने तेत्स्य सक्तेः सत्वात् तत्र पूर्वरात्रावेव भद्रापुच्छे तदलाभेपि वात

४५ स्कर्त्तव्यस्यार्थ पूर्वविद्धाग्राह्यवचनमिति एतद्विषयमेव च दिवा भद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा·
सा भद्राभद्रदा यस्मात् भद्रा कल्याणकारिणीति ज्योतिषिकवचनमपीति तन्मंदं· श्रावणीति वाक्ये सायंका
लीनत्रिमुहूर्त्तसत्त्वस्यैव पूर्वविद्धापदेनोक्तेः योगमात्रपरत्वे तु योगो पातेषु बलिदिनांतेष्वपि रात्रियोग
ग्राह्यत्वापत्तेः सकलनिबंधविरोधो दुष्परिहरः नच सायंतनत्रिमुहूर्त्तसत्त्वेन पूर्वविद्धायाः पूर्वरात्रिप्र
दोषेऽसत्त्वं संभवति· यदप्युक्तं पूर्वरात्रौवेघभद्रापुच्छे तदलाभे चेति· तदपि भद्रापुच्छालाभेपि भद्रापुच्छग्रा
ह्यत्ववाक्येन यथा उत्तरात्रप्रसक्तिरुत्ववाध्यमेन तथा दिवाभद्रा यदा रात्रावितिवचनेनैव तत्र दुक्तोत्तरा प्रसक्ति बा
धे पुनः पूर्वविद्धावाक्यवैयर्थ्यापरिहारात्· तस्मात्स्फुट एव विरोधोऽर्थमेव तदिति साधीयः नच यदा द्वे पूर्वा रात्रिः
सर्वा भद्राव्याप्ता उत्तरदिने प्रदोषश्च पौर्णमासीशेषयुक्तोऽपि ग्रस्तचंद्रोदया दा त्रिप्रथमघटिकायामेव या
चंद्रग्रासा ग्रहणकाले तत्र तदा सर्वेषामेव वर्णानां सूतकं राहुदर्शने इत्यशुचित्वात्कथं तत्र तदनुष्ठानमि
ति वाच्यं· तदुत्तरमेव स्नात्वा कर्माणि कुर्वीत अस्तमनेऽपि वर्जयेदित्युक्तेः स्नानोत्तरं नित्यनैमित्तिकेषु ४५

धिकारात्· नच तत्र ग्रहणनिमित्तकानामेव कर्मणां ग्रहणं· स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतक
इतितत्र सर्वस्मार्त्तावश्यककर्मणां प्रतिप्रसवात्· राहोः सूतकादन्यत्रेति हेमाद्रिः अतो ग्रहणे वेध
प्रभृति भोजनं ग्रहणं तरितप्कौ वयोगश्चानिषिद्धो नान्यत्किंचित्· काम्यानि महादेवपूप्रभृत्येव नि
षिद्धानीति॥ ॥इति होलिकासंशयोच्छेदपरिच्छेदः॥ ॥होलिकापौर्णमासीरूपपर्वनिर्णयानंत
रं संक्रांतिरूपपञ्चपर्वांतर्गतपर्वनिर्णयः क्रियते· तत्र संक्रांतिनिर्णयः तत्रमाधवाचार्याः वसि
ष्ठः रात्रिसंक्रमणे भानोर्दिनार्धं स्नानदानयोः अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रियाऽऊ
र्ध्वसंक्रमणे चोर्ध्वमुदयात्प्रहरद्वयं· पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः प्राहुर्दिनद्वयं पुण्यं मुक्त्वा
मकरकर्कटौ· अनेन सामान्यवचनेन मकरकर्कटद्वयपुण्यतासस्तहितेन संक्रांति इत्येकदेवनिर्णयउक्ते
मकरकर्कटयोः कथमित्याकांक्षायां भविष्योत्तरे वचने· मिथुनात्कर्कसंक्रांतिर्यदि स्यादंशुमा
लिनः प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः कार्मुकं तु परित्यज्य द्रहणं संक्रमते रविः प्रदोषे

४५ वार्धरात्रे वा स्नानं दानं परेह्नि इति । एतेन हिरुद्रदेवलवाक्यतपोक्तं आसन्नसंक्रमं पुण्यं दिनार्धं
स्नानदानयोः रात्रौ संक्रमणे भानोर्विषुवत्सयने दिवेति । अत्र हि आसन्नसंक्रमे दिवा दिनमयने पुण्यपु
ण्यमित्यर्थप्रतीतेर्विरोधः प्रतिभाति तदन्यथा योजितं । रात्रौ भानोः संक्रमे विषुवन्नामके जाते संक्र
मप्रत्यासन्ने दिनार्धं पुण्यं पूर्वरात्रसंक्रमे पूर्वदिनोत्तरार्धमपररात्रसंक्रमे परदिने पूर्वार्धमिति वि
षुवतो संततर्थ्य ख्यापअयने दिवेति दिवेति विरुध्यं १ व्याख्या सैव यतोऽयने तु दिवैव जाते सति यथा
योगं तद्दिनार्धं पुण्यं । कर्कटपूर्वार्धं मकरे उत्तरार्धं । एतच्च मध्ये दिनायनविषयं । उदयास्तमयप्रत्यास
न्ने खे यत्ने पूर्वोत्तरभागग्राह्यत्वबाधया कृत्स्नदिनपुण्यत्वं पूर्ववदोक्तमिति । इदमेव कालादर्शेऽपि हे
मादौ तु देवस्य चाक्रमे वयततपार्श्वबाधयस्त्वेनोक्ता विषुवत्सासन्नसंक्रमे दिनार्धं पुण्यमयने त्वासन्नसं
क्रमे वदिनं पुण्यमिति स्पष्टार्थमुक्त्वादिनद्वितीयार्थे व्याख्यातं दिने रात्रौ वा संक्रमणे विषुवदयनयो
द्वयोरपि दिनार्धमेवासन्नसंक्रमे पुण्यमिति । तदिदं व्याख्याद्वयं संगृहीतं कालनिर्णयदीपिकायां अथा ४५

यनमधः पश्चान्निशार्धादा भवेत् । यद्यासन्नमहस्तदर्धमथवा पुण्यमिति । यत्तु माधवेन भविष्योत्तरीय
तद्यायनविषयं विशेषवाक्यमुदाहृतं नन्तुस्यार्थे अस्तं गते यदा सूर्ये झषं याति दिवाकरः प्रदोषे वार्धरात्रे वा
तदा पुण्यं दिनान्तरमिति वोधायनवचनमुपन्यस्य यथाश्रुतेऽर्थे दोषोक्तिपूर्वकं व्याख्यातं । अस्मिन् वचने प्र
दोषेवोऽस्य नेनयदि प्रदोषजालाद्याः मकरसंक्रांतेः परदिने भोगः प्रतिपाद्येत तदा यज्ञपार्श्वविचनेन धनु
मीन्नावतिक्रम्य कन्यां च मिथुनं तथा । पूर्वापरविभागेन रात्रौ संक्रमते यदा । दिनांते पंच नाड्यस्तु तदा पुण्य
तमाः स्मृताः उदये च तथा पंच दैवे पित्र्ये च कर्मणीति स्कांदवचनेन संपूर्णे अर्धरात्रे तु उदये स्तमयेऽपि च । मा
नीर्धे भास्करे पुण्यमपूर्णे शर्वरीदल इति देवीपुराणवाक्येन च विरोधः प्रसज्येत । असंगतइति वाक्ये चासं
गतत्वस्य नेनैव प्रदोषार्धरात्रयोर्लब्धत्वात्तस्य ग्रहणमनर्थकमित्यपरो दोषः तस्मादेतद्वचनमेवं व्याख्येयं ।
प्रदोषे वेत्यत्र वाशब्दो यथार्थे वा उपमाने विकल्पयोरिति निघंटुस्मरणात् । तदयं दृष्टांतदार्ष्टांतिकयोरर्थः यथा
प्रदोषे पूर्वदिनार्धं पुण्यं तथार्धरात्रे परदिनं पुण्यं । द्वितीयो यं वाशब्दस्तथार्थे । अव्ययानामनेकार्थत्वादिति ।

४७

अनेनैव कार्मुकं तु परित्यज्य झषं संक्रमते रविः । प्रदोषे वार्धरात्रे वा तदा भोगः परेहनीति स्मृत्यंतरे इति कल्पलि
खितत्वात् । एवमेवानंतभट्टकालनिर्णयेपि । तदिदं हेमाद्रिमतं न सम्यगिति प्रतिभाति । यथा तथाशब्दयोर
प्रतीयमानार्थत्वकल्पनाप्रसक्तेः । तथा पूर्वदिनार्धमित्यध्याहारापत्तेश्च । तस्मादेतद्बौधायनवाक्यानुरोधे
नैव प्रस्तुतपराशरवाक्यव्याख्या माधवकृता युक्ता । नहि तत्र कस्यचिदध्याहारो न वाप्रसिद्धार्थकल्पना ।
परमाधवव्याख्याने आसन्नसंक्रममिति नाधिक्यं च । एवं च व्याख्यांतरमपि घटते । अयने रात्रौ संक्रमणे
दिनं पुण्यमिति । तत्र किं दिनमित्यपेक्षिते आसन्नसंक्रममित्यस्यान्वयः स्यात् । यदि बौधायनवाक्येन स्या
त् तदा शास्त्रोत्तरमेव दिनं पुण्यमित्यासन्नस्यान्वयो न भवतीति । तदेवं हेमाद्र्युक्तमाधवदूषणं नावदुष्टं ।
यत्तु स्कांदवाक्यविरोध इति द्वितीयं दूषणं तदपि न बौधायनवाक्यानुरोधेन स्कांदवाक्यस्यैवान्यथाव्याख्या
संभवात् । तथाहि । अत्र हि चतस्रः संक्रांतय उपात्ताः द्वे विषुवे द्वे अयने । तत्र चतसृष्वपि प्रत्येकं पूर्वापरपद
योरन्वये प्रत्येकमेव च दिनांते पंच उदये पंचेत्यनयोरन्वये विरोधः स्यात् । तादृशान्वयप्रसक्तौ तु बौधायनवा ४७

क्यबलेन विषुवयोरेव प्रत्येकं तदन्वयः । अयनयोस्त्वेकैकान्वय एव । रात्रौ धनुरतिक्रम्य पूर्वभागे संक्रमे उद
ये पंच नाड्यः । तथा रात्रौ मिथुनमतिक्रम्य पूर्वभागे संक्रमे दिनांते पंच नाड्य इति । अयं चानयोरेकैकान्वयो यु
क्तः सामान्यतः पुण्यत्वप्राप्तावेव पुण्यतमत्वोक्तेः । अयं चाध्याहाराप्रसिद्धार्थकल्पनातः साधीयानिति न
बौधायनवाक्येनोरोधो युक्तो स्याकर्तुमिति । यत्तु देवीपुराणवाक्यविरोध इति तृतीयं दूषणं तदपि न । न वा
पाहि संपूर्णउभयोर्द्वयमिति देवीपुराणवाक्येन सह बौधायनवाक्यीयार्धरात्ररूपोत्तरदिनबोधपाहि सं
पूर्णउभयोर्द्वयमिति देवीपुराणवाक्येन सह बौधायनवाक्यीयार्धरात्रे पुण्यतोक्तिर्विरुद्धैव । अथ समा
धत्से । देवीपुराणवाक्ययनयोरनुपात्तत्वात्सामान्यवाक्यं तद्बौधायनवाक्येन विशेषश्रयत्वेण वाध्यत इति ।
यद्वा देवीपुराणतुल्यार्थवसिष्ठवाक्ये मुक्तामकरकर्कटाविति पर्युदासेन देवीपुराणस्यापि तदेकार्थतया
यनेतरसंक्रांतिविषयत्वाद्बौधायनवाक्यीयार्धरात्रकृपोत्तरदिनपुण्यतोक्तिरविरुद्धेति सत्यं परं तु एत
त्समाधानद्वयं प्रदोषउषःप्युत्तरदिनपुण्यतोक्तौ तुल्यमिति वसिष्ठवाक्येनैव देवीपुराणवाक्येनाप्यवि

४९ ।परोधः यत्तु अस्तंगतेऽस्तनेनैव प्रदोषार्धरात्रयोर्लभ्यत्वात्स्वग्रहणमनर्थकमिति चतुर्थदूषणं तदपि
न तद्बाधितस्यार्धरात्रेऽस्तनेनैव रात्रेर्लभ्यत्वादस्तंगतेत्यनर्थकं· प्रस्तुतमाधवमतेऽस्तंगतइत्यस्यैवोक्तपररात्रए
वरिम्नांतरस्य तुल्यत्वोस्यास्त्वस्यासत्त्वेऽस्तन्माभूदिति प्रदोषार्धरात्रग्रहणमर्थवदेवेति· कार्मुकेतु परिसज्येति
वाक्येतु नैव चतुर्थदोषावसर इति· तस्मादिदं वाक्यं मिथुनात्कर्कसंक्रान्तिरिति च वाक्यं लिलिखात्रेमार्ध
रात्रसंक्रान्तयोर्मकरकर्कटयोर्दिनद्वयेन पुण्ये किंतु मकरसंक्रान्तौ परदिने· कर्कटे च पूर्वदिने पुण्यमिति हेमा
द्र्युपसंहृतं मतं न सम्यक् किंतु माधवमतमेवेत्यलं भूयसा॥ ॥इति संक्रान्तिदिननिर्णयः॥ ॥ छ ॥ ॥
एवं पंचपर्वान्तर्गतसंक्रान्तिनिर्णयानन्तरं पौर्णमास्यारूपपर्वगतग्रहणदिननिर्णयः· माधवाचार्यैः पापक्ष
यकाम्यो ग्रहणदिनमुपवसेत्· तदाह व्यासः· अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः· अहोरात्रोषितः स्नातः स
र्वपापैः प्रमुच्यत इति· काम्योपवासमुक्त्वाह· पुत्री तु नोपवसेत्· तदाह नारदः· संक्रान्त्यामुपवासं च कृष्णै
कादशीवासरे· चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृही इति· यस्मात्तस्मात्तु पुत्रिणो ह्युपवास एव· अहो ४९

रात्रेण भोक्तव्यं रात्रिभोजनप्रतिषेधात्· इति· एवमेव कालादर्शेऽपि· हेमाद्रिस्तु ग्रस्तास्तमेव सूर्यग्रहे तु नाश्नीयात्पू
र्वं यामचतुष्टयमिति दिवाभोजननिषेधात्तथामकृयोरस्तगयोर्दृष्ट्वा स्नानं परेऽहनीति रात्रौ भोजननिषेधात्तथा आदि
त्येहनि संक्रान्तौ ग्रहणे चंद्रसूर्ययोः· उपवासो न कर्तव्यो गृहिणा पुत्रिणा तथेति पुत्रवद्गृहस्थस्योपवासनिषेधात्किं
कार्यमित्याशंक्य सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनं· अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे इति मा
र्कण्डेयवाक्यात्प्रहरद्वयसत्त्वे भोक्तव्यमिति सिद्धान्तयामास· तदिदं हेमाद्रिमतं न सम्यगिति प्रतिभाति· तथाहि
आदित्येहनि संक्रान्तौ ग्रहणे चंद्रसूर्ययोः· पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही इति तन्निमित्तोपवासनिषेधोये
प्युदाहृतः· नानुषंगकृतोऽन्यस्योपवासोनिसमुपोषणमिति जैमिनिवाक्यशेषेण पुत्रवद्गृहस्थस्य रविवारादिनिमि
त्तकोपवास एव निषिध्यः· एवं च संक्रान्त्यामुपवासं च कृष्णैकादशीवासरे· चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवा
न्गृहीत्यादिनारदादिवाक्ये श्रुतः· कृष्णैकादश्युपवासनिषेधोऽपि जैमिनिवाक्योपात्तसंक्रान्तिग्रहणमध्यप
ठितत्वात्तन्निमित्तोपवासपर एव तन्निमित्तकस्य च न तेषु निमित्तेषु पिहितत्वात्ः न हि रविवारसंक्रान्तिग्रहण

४९ निमित्ताः सामान्यतउपवासा विहिताः अतस्तेषु कालेषु विहिता ये उपवासास्तेतन्निमित्तोपवासास्तेच का
म्याएवेति ग्रहणे विहितस्य काम्योपवासस्यैव तदुपन्यस्तो व्यादित्येहन्नीत्यादिनिषेधो न तु वेद्रादिप्रयुक्तभोज
नद्वयनिवृत्तिरूपोपवासस्यापि निषेध इति पस्तास्तेप्युपवासएव युक्तो माधवोक्त इति· अथैवं हेमाद्रेराशयः
तन्निमित्तत्वं न तत्र विहितत्वमेव किंतु कथंचित्तत्वेतु कत्वेन तत्प्रयुक्तत्वमिति यावत्· अतएवाह कात्यायनः त
त्प्रयुक्तोपवासस्य निषेधो यामुदाहृतः प्रयुक्तांतरयुक्तस्य न विधिर्न निषेधनमिति उपवासशब्दश्चास्माकं दु
र्दिनक्रोधज्वरगदिवशादुपोषणमित्यादिप्रयोगाद्भोजनद्वयनिवृत्तिमात्रेरूढः एकादश्यादिप्रकरणेतु व्रतश
ब्दसामानाधिकरण्यादुपवासव्रतेपि ग्रहणनिमित्तोपवास सत्येमित्यादिवाक्ये निषेधो युक्त इति· अत्र ब्रूमः
नानाकाम्योपवासेषु तत्र तत्र व्रतशब्दसामानाधिकरण्याभावेन संकरस्यापि सिध्यापत्तेः तथा तन्नोपवासादि
पुण्यकमिति कौशेपि व्रतयाचि पुण्यकशब्दसामानाधिकरण्याद्व्रतएवोपवासशब्दोरूढः न भोजनद्वयनि
वृत्तिमात्रे· दुर्दिनज्वरादिप्रयुक्तभोजनद्वयनिवृत्तावेव तूपवासशब्दप्रयोगो लाक्षणिकः अन्यथाच हेमाद्रे ४९

रेवपूर्वोत्तरग्रंथविरोधः स्यात्तथाहि· तेनैकादशीनिर्णये संक्रांत्यामुपवासंच कृष्णैकादशीवासरे· चं
द्रसूर्यग्रहेचैव न कुर्यात्पुत्रवान्गृही इत्यादीनि नारदादीनि वाक्यान्यपि लिखितानि· तत्रच कृष्णैकादशीनिषे
धस्य तत्रैव लिखितजैमिनिवाक्योपात्ततन्निमित्तोपवासविषयसंक्रांतिग्रहणमध्यपठितत्वात्क्वचिच्च
सहपठितत्वाद्वै तन्निमित्तोपवासनिषेधविषयत्वमेवावगम्यते· तच्च सोपि कृष्णैकादशीनिमित्तोपवास
निषेध उपवासशब्दस्य भोजनद्वयनिवृत्तिवाचित्वे हेमाद्रिणा एकादश्यां व्रतविधितः पृथक्निषेधाभ्यु
पगमात्तद्वशेन भोजनद्वयनिवृत्तावपि कृष्णैकादशीनिमित्तोपवासत्वेन प्रवर्तेत· न चैवं तथा हेमाद्रेरिष्टं
तेन भोजननिषेधस्य कृष्णैकादश्यामप्यंगीकारात् तन्निमित्तोपवासनिषेधस्य च व्रतविषयत्वांगी
कारात्· तस्मान्माधवमतमेव सम्यक्· हेमाद्रिमतमित्यलं भूयसा इतिग्रहणद्वैतनिर्णयः आशौचं
त्रिविधं· तत्र ग्रहणनिरूपणेन तदाशौचोपस्थित्याशौचोत्तरयोरप्युपस्थितौ यत्र यत्र संशयस्तत्र निर्णय उ
च्यते· तत्रस्याशौचद्वैतनिर्णयः तत्र शुद्धिविवेके आजन्मनस्तु चूडांतं यत्र कन्या निपद्यते· सद्यः शौचंभ

५० वेत्तच्च सर्ववर्णेषु नित्यशः ततो वाग्दानपर्यंतं यावदेकाहमेवीहानि ब्रह्मपुराणवाक्यं लिखित्वोक्तेः· अ
पमत्रतात्पर्यार्थः सर्ववर्णानां द्वितीयवर्षं तियावत् कन्यामरणे सद्यः शौचमिति· एवमेव तेषामितिथिः दंते
जातेनजाते च कृतचूडे च संस्थिते रस्य ऊरुतचूडः कालस्य लक्षणार्थः सच कालोच प्रविष्टे तृतीय इत्येषः पक्षपाते
वकेऽपि कोचूडा तथापि तद्दुःखलया सादंतजन्मनेति बाध्यते इत्युक्तेः तथास्त्रीणामसंस्कृतानामित्यत्राहस्त्व द
दत्तकन्याविषये एकाह आचूडादेव व्यवस्थित इत्युक्तेः विज्ञानेश्वरस्य तु तृतीयवर्षांतं यावत्कन्यामरणे सद्यः शौ
चमितिमतं तेनत्युक्ते यल्लंगारोवचनं यप्रकृतचूडो वैजातदंतस्तसंस्थितः दाहपिंडदानतथाप्येनमाशौचं त्र्यह
मास्यवरेदिति तद्वर्षत्रयादूर्ध्वं कुलधर्मापेक्षणचौलाल्कर्षे वेदितव्यं ॥ विप्रेन्यून त्रिवर्षेषु मृतेशुद्धिस्तु नैशिकी
तिते नैवोक्त्वादिति· नचेदं पुमपत्यमरणे लिखितेनत्लकथं कन्यामरणविषये उक्तार्थसाधकं सत्सं· तथापि
तेनानूपत्याशौचे पितृतीयमंगिरोवाक्यं लिखितं· अविशेषेण वर्णानामवांकसंस्कारकर्मणः त्रिरात्रं तु भवे
च्छुद्धिः कन्यासुत्र्यहा विधीयत इति अतश्चागमत्रमिताक्षरायः त्रीण्यमूत्यंगिरोवाक्यानि तत्रपूर्ववाक्यदयेपुं ५०

त्त्वं श्रुतमप्युविवक्षितं उद्देश्यविशेषणत्वात्· तत्कस्य च पुंविषयत्वस्य कन्यासु त्र्यहा विधीयत इति कन्या
विषये विशेषवाक्येन बाधे सत्यर्थात्सिद्धेः अन्यथा च त्रिवर्षादूर्ध्वं कन्यायादाहोपि न स्यात्· ततश्चापवाक्ये
नापदूर्ध्वनापत्यमात्रे वर्षत्रयात्प्रागेकाहे विहिते द्वितीयवाक्येन तदूर्ध्वमेव त्र्यहे अपत्यमात्र एव विहिते तृ
तीयवाक्येन एकस्मृतितया पुनस्त्र्यहविध्यसंभवात् अहमनूद्यैवोत्तरावधिसमर्पणे सति उपनयनविवाहरू
पसंस्कारद्वयावधि अपत्यमात्रे मृतौ वर्षत्रयोर्ध्वं त्रिरात्राशौचविधेः पर्यवसितस्य योयमपवादः कन्यासु त्र्यहा वि
धीयत इति सोप्यपवादत्वात् ततरार्थ्यां अपवादत्र्यहाशौच समानविषय एव प्रतापत इत्यनेन कालोपलक्षणेऽपि
तृतीयवर्षांतं यावद्द्रक्ष्यति सा विधीयते तेन प्राच्यमतं न सम्यक् किं तु विज्ञानेश्वरमतमेवेप्सितं भूयसा· माधवाद
यस्त्वत्र च च नमात्रमाति प्रोचुर्न तु किं तु किंचित्स्वमतमाविश्चक्रुरिति स्फोदक्षममिताक्षराकारमताभिप्रायो गो
वत्कृत्यावर्णनीयः इति स्त्र्याशौचहेतुनिर्णयः अथ सन्निपाताशौचनिर्णयः यत्र त्रिरात्रशावमध्ये दशाह
सूत्याशौचपाते किं शेषेण शुद्धिर्न वेति तथा दशाहसूत्याशौचनवमाहोरात्रे त्र्यहशावाशौचपाते किं पूर्वेणैव शु

द्भिर्नवेति तन्नाघ इति विज्ञानेश्वरमतं पूर्वशेषेण शुद्धिर्नेति । तेन हि अंतरा जन्ममरणे शेषाहोभिर्विशुध्यती
ति पातत्वं न्क्यवाक्योक्तस्योत्सर्गस्य तस्याशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि । न पूर्वेण विशुद्धिः स्या
त्स्वकालेनैव शुध्यति । उशनोवाक्येनापवादमुक्त्वा सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकं । तत्राधिकृत्य
मृतकं शौचं कुर्यान्न सूतकमित्यंगिरोवाक्यशावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् । शावेन शुध्यते सूति
र्न सूतिः शावशोधनीति षड्विंशन्मतं चनौशनसस्यापवादः किंतु तद्वत्तदपवादस्योत्तरेत्सुत्सर्गस्यैवापवा
द इत्युक्तं । तेनेदं तन्मतं गम्यते । यदीदं द्वयमौशनसस्यापवादः स्यात्तदा तस्य तस्य पूर्वाशौचे प्रवृत्तेरपवा
दस्यापि तत्रैव प्रवृत्तेः पूर्वचिरात्रशावशेषेण तदंतःपातिदशाहसूतकस्याशौचशुद्धिः स्यात् । अंगिरःषड्विंशो
क्तं तरेत्यस्यापवादस्तेन तस्य तस्य पूर्वाशौचे तयोरप्रवृत्तिः । अतरेत्येतदपवादत्वादेव च मृतके त्वथ सूतके शावेन
शुध्यते सूतिरित्यंशांवनूद्यते स्वस्य पूर्वविषयत्वे हि विधिः स्यात्तदभावे त्वनुवादावेव । अंतरेत्युत्सर्गतया वसि
ष्ठविधि । न्येचमृत्यंतरकस्यनापत्तेः इदमेव हृदये धृत्वांतरेत्येतदपवादत्वमिच पूर्वसूतकशेषेण शा ५१

वाशुध्यापधौमिरः षट्त्रिंशपोक्ता सर्वमुक्तं विज्ञानेश्वरेण अत्र चांतराजन्ममरणगर इतिपद्यप्यविशेषे
णोक्तं तथापि न सूतकांतर्वर्तिनः शावस्य पूर्वाशौचशेषेण शुद्धिरिति । माधवोपि विज्ञानेश्वराशयमिमं
विदित्वैव यदा जनने निमित्तदशाहाशौचमध्ये मरणमापतति तदा मरणमारभ्य दशाहं कार्यमित्युक्त्वांगि
रःषड्विंशत्रेउदाजहार । मदनोप्येवं । रुद्रधरस्तु अपानायोगपयेतु नेयाशुद्धिर्गरीयसी । मरणीत्यत्ति योगेनुग
रीयो मरणं भवेदिति कौर्मे पूर्वार्धापवादत्वमुत्तरार्धस्यांगीकृत्य लघुपूर्वाशौचेन दीर्घसूतकस्याविनिवृत्ति
रित्याह । तन्मंदं । नोत्तरार्धं पूर्वार्धापवादः किं त्वाद्यार्धेन साजात्ये वैजात्ये च वैषम्ये महता शुद्धिरुक्ता । उत्त
रार्धेन तु वैजात्ये साम्ये पूर्वाभ्यासुत्तरभाविवाधाशावमेव शोधकमित्युक्तं । साजात्ये तु साम्ये स्मृत्यंतरान्निर्णयइ
सविरोधः अन्यथोत्तरार्धस्य मृत्यंतरकस्यनापत्तेः साम्यविषयत्वेनत्तरार्धस्य न मृत्यंतरकस्यनापत्तिः मरण
स्य पूर्वभाविन्ये अंतरेत्यनेनैकमूलत्वात् । उत्तरभावित्वे तु न सूतिःशावशोधनीत्यनेनैकमूलत्वादिति । यत्तु
माधवो गुरुलघुत्वे तु समानजातीययोः कालापेक्षया विजातीययोः स्वरूपेणैवेति भिन्नपानोभिसस्यासर्य

५२ माहतदापविजातीययोः साम्यमिति स्यात्स्येयं मूलांतरकल्पनापत्तेरेवेति· अतएव द्वितीयद्वैतेप्ययं निर्णयः
दशाहस्त्र्यहाशौचयोर्नवमाहोरात्रे त्र्यहशावाशौचपातेपि पूर्वशेषेणैव शुद्धिः शावेन शुद्धिप्रतिपादका
नां साम्यशावाधिक्यविषयत्वे नैरन्यथा मूलांतरकल्पनापत्तेरिति चोक्तेः अतनैवव्यायेनत्रिरात्रसूतको
पात्ते पक्षिण्येकाहशावपाते पूर्वशेषेण शुद्धिरिति· अथाशौचसन्निपाते द्वैतांतरनिर्णयः तत्रास्थ्याशौ
चशेषेण किंवाप्यंतरापतितदीर्घाशौचस्य शुद्धिर्न उतकेप्यं स्त्रीति· तत्र विज्ञानेश्वरमतेनास्त्येवेदशौविषयः
माधवस्त्वाह देवलः परतः परतो शुद्धिरघवधौ विधीयते· स्याच्चेत्संचतन्मादन्तः पूर्वेणैयात्रशिष्यतइति· प
र्वाशौचात्परतो दीर्घाशौचे परतरते नैव परेणाशुद्धिर्विधीयते· पराधेनदपचादः तेच्चपरतः परतो मृषु पदान्यनु
वृत्त्यपीत्यं· अत्र पूर्वेणैवान्येनाप्यशुद्धिः शिष्यतेविधीयते· कृष्णे स्याह पूर्वं चेत्परतः परस्यपंचपतन्मादन्तः प
रतो नंतरमनुवृत्तं स्यात्· पंचेतिक्षत्राद्याशौचार्धवउशादेरप्युपलक्षणं· अयमर्थः मध्यपतितदीर्घाशौचा
र्धाधिकपूर्वाशौचशेषेण मध्यपातिदीर्घस्यापि शुद्धिरिति· शुद्धिविवेके पितुअर्घंभाग्यसूर्यंथा वस्त्रत ५२

कस्यतुल्यत्वके· द्वितीये पतिते चाद्यात्सूतकाच्छुद्धिरिष्यते· अतएव ऊर्ध्वे द्वितीयात्तु सूतकांताच्छुचिता स्मृता· एवमेवा
विच्चार्यं स्यान्मतके मृतकांतरइतिमाधवाद्यलिखित्वब्रह्मपुराणवाक्यानुरोधेन देवलवाक्ये पूर्वेणाप्यनुशुद्धिशिष्यतेइ
तिपठितापंचतमादन्तः पूर्वाशौचार्धात्परतोपयवस्थौसजातीयपूर्णाशौचपातेपरतः परेणाशुर्न तु पूर्वेणेतिपादद्वयं
व्याख्यायपंचतमादन्तः पूर्वेण पूर्वाशौचार्धमध्येयवस्थौ पूर्वेमृतकांतरे पीति· इत्याशौचद्वैतनिर्णये सन्निपाते चतुर्थद्वै
तनिर्णयः अथतत्रैवपंचमद्वैतनिर्णयः तत्रत्र्यहाद्यसंपूर्णाशौचेतन्मम कालाशौचांतरपाते किं पूर्वशेषेण शुद्धिर्नेति·
तत्रनेतिरुद्रधरः पुनः पाते दशाहात्प्राक्पूर्वेण सहगच्छति· दशमेह्नि पतेद्यस्याहद्वयात्सविशुध्यति· प्रभाते तु त्रिरात्रे
णदशरात्रे छयंविधिरिति देवलवचनस्य सजातीयसंपूर्णाशौचविषयत्वात्· अयवस्थावशौचं तु पक्षिमेन समा
पयेदित्यादीनां तु त्र्यहाद्यसंपूर्णाशौचेपि कुकालाशौचांतरपाते त्रिमेण शुद्धिविधायित्वादिति तन्मंदं· यथा हि देवल
वाक्याभावेप्रतिनिमित्तं नैमित्तिकन्यायादेव प्राप्तं अतएव माधवोतराहुदशाहस्येसेतदेतदपवादत्वेमेवावतार
यातिस्मएवं पूर्वशेषशुद्धेः सामान्यतोविध्यभावेपवादतयासार्थक्याभावात्प्रतिनिमित्तं नैमित्तिकावृत्तेरादेव

भासेरप्यत्र वा· त्रिरात्राद्यनर्थकमेव स्यात्· अंतरा जन्ममरणे शेषाहोभिर्विशुध्यतीति सामान्यवाक्यसत्त्वात्· नचा
स्य देयत्ववाक्ये नोपसंहारः अघवृद्धिवाक्यानर्थक्यापत्तेरेव देवत्ववाक्ये च त्रिरात्रादि संपूर्णाशौचसंग्रहाय दशरात्रा
दिशब्दानामुपलक्षणत्वस्य स्वयाप्यंगीकारात्· तत्र लाघवाद्राशौचमात्रोपलक्षणत्वस्यैव युक्तत्वाल्लोचनेनन्याय्य
त्वात्· तस्मात् त्रिरात्रेपि त्रिरात्रांतरे पूर्वशेषेणैव शुद्धिरिति सिद्धं· अथ तत्रैव षष्ठे दिने धौरवः मातर्यग्रे प्रमीतायामशु
द्धौ म्रियते पिता· पितुः शेषेण शुद्धिः स्यान्मातुः कुर्याच्च पक्षिणीं· अत्र पितृदशाहे मातृदशाहपाते पक्षिण्यधिकोक्ता·
तत्र दशमाहोरात्रे तदंतरायामेव किं रात्रिशेषे द्व्यहाच्छुद्धिर्यद्विशेषे श्रुतिह्यहादित्यनेन पक्षिणी बाध्यते उत पक्षिण्या माता
पितृविषये विशेषशिष्टत्वे निमातापितृव्यतिरिक्तविषयेपि प्रसक्तेः सामान्यरूपत्वस्यापि सत्वान्तये पक्षिणी बाधकता·
अतो नतावदाद्यो कल्प्यो नापि द्वितीयः कल्प्यः विषमकल्पयोस्तद्योगादस्तु मिवक्षि स्यायोगात्· विरुद्धंरवल्वेतत्त्रयो
दशाहाद्राव सोशुद्धो वा शुद्धो वेति· नचव्यवस्था· सा हि यथान्यत्र प्रत्यासन्नत्वात् प्रत्यासन्नत्वादिना भवति एवमिहन
वमदिनांतेयावत्पक्षिणी दशमाहोरात्रे ह्रद्वयस्य वृद्धित्वदत्वयामेनुत्र्यहस्येति स्यात्· नचासौ नियुंतु भक्याऽन्यथा ५२

पि संभवात्· मातापितृविषये रात्रिशेषेपि पक्षिण्येव मातापितृव्यतिरिक्तविषये तु रात्रियामशेषे द्व्यहत्र्यहा
विति· पूर्वोक्तबलाबलासंभवात्तु नात्र विनिगमकं पश्यामः· अतो ऽत्रोभयोर्नित्यं प्रवृत्तिरूपं समुच्चयमेव युक्तं प
श्यामः· अतएव च काद्दशो जैमिनिनोनिर्णीतार्थानदर्थत्वेनादिविषुविनैमित्तिकेषु पूर्वेषामेकनिमित्ते विहितानां वि
कल्पं सिद्धांतयित्वा उत्तरेषां त्वेकनिमित्ते विहितानामुपरागादौ स्नानदानतर्पणश्राद्धादीनामपि वसमुच्चयस्त्वस्त्व
दोषनिर्णीतार्थं द्विरप्यधिकरणे समुच्चये वक्ष्यते· एवं प्रकृतेपि नित्यमुभयोः प्रवृत्तिरूपे समुच्चये सत्यपि पक्षिणीच्चा
हर्दयं चेति सार्धाहोरात्रत्रयं तावच्छौचमनुष्ठेयं· न चांत्ययामे मातृमृतौ पक्षिणी बाहोरात्रत्रयं चेति मिलित्वा सार्धा
होरात्रचतुष्टयमाशौचमनुष्ठेयं· तथासति संख्यांतरोपजननप्रसंगेन पक्षिण्या अपि द्व्यहत्र्यहयोरपि च बाधापत्तेः·
अतएव च द्वादशे जैमिनिना धाने एकादशे पाषद्दे या द्वादशदे या इत्यादि दक्षिणापरिमाणानां समुच्चयं पूर्वपक्षयि
त्वा तथासति संख्यांतरोपजननापत्तेर्नैकापि संख्यानुष्ठिता स्यादित्यनेनैव हेतुना न कापि संख्यानां समुच्चयः· किंतु
विकल्प एवेति सिद्धांतो वक्ष्यते· किंच· पितृमृतिदशमरात्रे मे रात्रिदंत्ययामे वा मातृमृतौ पक्षिण्यासह द्व्यहत्र्यहयोः समु

५४ ञ्चयोसंख्यांतरोपक्रमनेनाप्युच्यमानेमातृमरतिदशमेन्हितर्दस्यैमेवापितृमरणावधिपितुःशेषेणशुद्धिःस्या
दितिविहितेनदशाहेनापिसहद्व्यहस्त्र्यहयोःसमुच्चयस्तथैवापद्येतेति। नन्वेवंतर्हिप्रकृतेउभयोर्निरपेक्षनि
रूपासमुच्चयःकथंनिर्वहतीतिचेदुच्यते। भूयस्त्वासंख्ययास्वसंख्यायाःप्रसंगासिद्धेः। तेनपितृमरतिदशमा
होरात्रेतदर्दस्ययामयोपतितमरणेद्व्यहस्त्र्यहावेवाधिकौकार्यौनान्यथामेवपक्षिण्याःप्रसंगःसिद्धिर्भविष्यतिःअने
वन्यायेनमातृमरतिदशमाहोरात्रेतदर्दस्ययामयोःपितृमरणेनमोदशाहएवपूर्णोनुद्वेपःद्व्यहस्त्र्यहयोस्तुप्रसंग
सिद्धिरितिअधिकसंख्यायाश्चन्यूनसंख्यायाःप्रसंगजैमिनिनासिद्धांतितानन्यथाहि। सप्तमांसेगवामयनेबहुग्रहःसु
गणेषुद्वादशाहस्येतिद्वादशाहालिंगातिदेशःभायुर्गोतिरित्यादिग्रहस्येत्येकाहज्योतिरादिधर्मानामतिदेशेनत
त्राविरोधिनउभयोर्विक्रियन्तेविरोधिषुतुनामातिदेशलिंगातिदेशयोःकतरद्बलीयइतिचिंतापांलिंगातिदेशपा
बल्येनपूर्वपक्षेद्वादशाहातिदिष्टबहुधर्मद्वादशोपसत्त्वामुपादंचतन्न्यलिंगदर्शनमुख्यनामधेयप्राबल्येनचसि
द्धांतमुक्तोसिद्धांतेपिलिंगोपपत्तिरेवमुक्ता॥द्वादशोपसत्त्वमुख्यविरोधेपेद्व्ययोनुग्रहन्यायोक्तेर्गवामयनेद्वादशाह ५४

धर्मकल्पोहः सामुख्यांपृद्वादशोपसत्त्वमेवकार्यंतत्रयेपिच्युपसत्कार्ज्योतिरादयोगास्तेपिनविगुणाभवं
तिद्वादशसुतिसृणामंतर्भावदिति। तदिदंश्रौतमुदाहरणं। स्मार्तमपि। महालयामावास्याश्राद्धयोर्महालयतद
नंतरीनान्यष्टकाश्राद्धयोश्चसहक्रियमाणयोर्महालयसंबाधिबहुदेवत्यपिंडदानंतस्यप्रसंगसिद्धिरिति। तु
स्मात्सितमृतिदशमाहोरात्रेतदर्दस्ययामयोर्मातृमरणेनपक्षिणीतिसिद्धम्। इतिपक्षिणीद्व्यहत्र्यहबलावे
लहैतनिर्णयः। अथाशौचांतरहेतनिर्णयः। रात्रिशेषेद्व्यहात्प्रभृतिर्यामशेषेशुद्धिस्त्र्यहादितिशातातपवाक्ये
नपद्व्यहमाशौचंतन्मध्येसजातीयप्रतेन्नास्वंतरवाच्यदिपततितदाकिंपूर्वशेषेणशुद्धिरुतोत्तरेण प्रमाशौ
चकार्यमितिसंदेहस्तदर्थमिदंचिंत्यते। रात्रिशेषइत्यादिःकिंपूर्वाशौचशेषविधिरुतोत्तराशौचव्यवस्थाविधिरिति।
तत्रकेचिदाहुःएकाशौचेमध्येसजातीयमेनेजात्यंतरंवोत्पद्यतेतदापूर्वाशौचस्यशेषाहोभिरेवद्विनाशौ
चापगमेप्राप्तेद्व्यहतदपवादोरात्रिशेषइत्यादिःतेनरात्रिशेषादौनपूर्वाशौचस्यशेषाहोभिः किंतुपूर्वाशौच
शेषतावदधिकेनोत्तराशौचापगमइत्युक्तेपूर्वाशौचपातात्पूर्वशेषेणैवशुद्धिर्नप्रद्व्यहत्र्यहमध्येपति

५५ तमाशौचांतरं कृत्स्नं कार्यमिति । अत्र ब्रूमः । पूर्वशेषेण शुद्धिरिति चेदह्नि सरूपे गुणे विधीयते । रात्रिशे
षइत्यादिश्च तदपवादः । उत्सर्गापवादयोश्चैकविषयत्वमावश्यकं । अतस्तच्छाभाय रात्रिशेषइत्यादिरपि
उत्तराशौचएव ह्रासापवादाय वृद्धिशेषरूपगुणे विधिः । एवं च तृतीयमाशौचं प्रवृत्तस्य दिनद्वयपर्यन्तमध्यपातितं
न प्रथमाशौचांतःपातियत्तच्छेषेण शुद्धिः स्यात् किंतु रात्रिशेषे याममात्रशेषे वा यत्सन्निहितं द्वितीयाशौचं तदंतः
पाति द्वितीयाशौचं च न दशाहं किंतु राज्यधिकद्व्यहं याममात्राधिकत्र्यहं चेति तस्यान्यस्मान्न्यूनत्वे तच्छेषेण तृतीयाशौचनि
वृत्तिः किंतु कृत्स्नं तद्विधेयमिति । अथाशौचद्वैतांतरे निर्णयः मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता । पितुः
शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीमित्यत्र चतुर्थचरणेन पित्राशौचमध्ये मातृमरणे रात्रिशेषात्पूर्वं
सन्निपाते पक्षिण्यधिका विधीयते मात्राशौचे पूर्वशेषेण शुद्धिप्राप्तौ तदपवादत्वेन पूर्वोक्तन्यायात् तत्राधि
कपक्षिणीमध्ये यदि सपिंडांतराशौचसन्निपातस्तदा मात्राशौचसन्निपातो यदि पित्राशौचद्वितीयाहोरात्रे जा
तस्तदा नवाहोरात्राणि पित्राशौचशेषः पक्षिणी चाधिके सर्वं सार्धदशाहोरात्रात्मकं मात्राशौचं सिद्धं तस्य ३५

चाधिकस्य मध्ये तृतीयं सपिंडांतराशौचं पतितमिति मात्राशौचेनैवाधिकेन ततो न्यूनस्य सपिंडांतराशौ
चस्य सिद्धिः यदि तु पित्राशौचतृतीयाहोरात्रादौ मात्राशौचसन्निपातो जातस्तदोत्तरेतनषट्पंचे सार्धा
न्युक्तरीत्या तत्संनान्यवाहोरात्राणि पित्राशौचशेषः पक्षिणी चाधिके त्येवं सार्धनवाहोरात्रं सार्धषोहोरात्रा
त्मकं दशाहोन्यूनमेव च मात्राशौचं सिद्धं तस्य च न्यूनस्य मध्ये तृतीयं सपिंडांतराशौचं पतितमिति ततो
न्यूनस्य मात्राशौचस्याशेषेणाधिकस्य दशाहस्य तृतीयस्य सपिंडांतराशौचस्य निवृत्तिः किंतु कृत्स्नमेव स
पिंडांतराशौचं कार्यमिति निर्णयः । अथाशौचद्वैतांतरे निर्णयः । यदा एकाहाशौचमध्ये रात्रिशेषे याममात्रशेषे वाशौ
चांतरमापतितं तन्निमित्तकं च द्व्यहे त्र्यहे द्विवारात्रिशेषे याममात्रशेषे वा पुनराशौचांतरमापततितदा किं रात्रिशेष
वृद्धिवाक्यं प्रवर्ततेउतनेति । अत्र सिद्धांतः प्रथमाशौचे रात्रिशेषे याममात्रशेषे वा यदाशौचमापतितं तत्र रात्रि
शेषयत्नस्सार्धाहोरात्रद्वयात्मकं संपन्नं याममात्रशेषेत्वयामाधिकाहोरात्रत्रयात्मकं संपन्नं पूर्वं निर्णयेय च द्वि
तीयाशौचे पूर्वशेषेण शुद्धिप्राप्त्या ह्रासप्रसंगस्तत्रैव रात्रिशेषइत्यादिवृद्धिविधिरिति निर्णीतत्वात् । तत

५६ श्वा या शौचे रात्रिशेषे या मरणे वा यदापतितमाशौचं तत्सार्धाहोरात्रद्वयमाधिकाहोरात्रत्रयात्मकत्वा
त्रदशरात्रमिति स्मृतं· न त्वस्मिन्नेधिकं दशरात्रं तृतीयं यदापतितं तत्र पूर्वशेषेण शुद्धिः प्राप्तेति न ह्यस्य प्रसं
गः॥ अतो न रात्रिशेष इति वृद्धिविधिः प्रवर्त्तत इति वक्तव्यमेव तृतीयप्राशौचं कार्यमिति सिद्धं मूल इति श्वा
स मंद्वाक्यप्रमाणपारावारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरकृते ध
र्मद्वैतनिर्णये आशौचसन्निपातसंशयोच्छेदपरिच्छेदः अथाशौचद्वैतांतरे निर्णयः दत्तकपुत्रमरणे सापिंड्याद्द
शाहमाचरंति तत्प्रतिग्रहीतृतत्सपत्नीनस्तु त्र्यहं नरादयः सर्वे इति शिष्टाचारः न च विरुद्धं यावत्कस्यचिद्वाक्यं यत्रौ
रसेषु पुत्रेषु भार्यास्वन्यगतासु चेति· तत्र विज्ञानेश्वरः अहरित्यनुवर्त्तते· अनौरसाः क्षेत्रिदत्तकादयस्तेषु जाते
षु परेतेषु वाहोरात्रमाशौचं· तथास्वभार्यास्वन्यगतासु अन्यं प्रतिलोमव्यतिरिक्तमाश्रितासु अतीतासु अहोरात्रमे
व नेपुनः सत्यपि सापिंड्ये दशरात्रं· प्रतिलोमाश्रितासु त्वाशौचाभाव एव पाखंड्यनाश्रितवदित्यनेन पतितविधात् ए
तच्च भार्यापुत्रशब्दयोः संबंधिशब्दत्वात्प्रतियोगिकं भार्यात्वं पुत्रत्वं च तत्स्वेवेदमाशौचं सपिंडानामत्वा ५६

शौचाभाव एव· अत एव प्रजापतिः अन्याश्रितेषु दारेषु परपत्नीसुतेषु च· गोत्रिणः स्नानशुद्धाः स्युस्त्रि
रात्रेणैव तत्पितेति· स्वैरिण्यापास्तु पमाश्रितास्तस्य त्रिरात्रमेव· यथाह विष्णुः अनौरसेषु पुत्रेषु जातेषु
च मृतेषु च परपूर्वासु भार्यासु प्रजातासु मृतासु चेति· त्रिरात्रमत्र प्रकृतं· अनयोश्च त्रिरात्रैकरात्रयोः सन्निधिवि
देशस्थापेक्षया व्यवस्था· यदा तु पितुस्त्रिरात्रं तदा सपिंडानामेकरात्रं· यथाह मरीचिः सूतके मृतके चैव त्रिरात्रं पर
पूर्वयोः एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुरिति· अत्र विशेषो माधवीये· गोत्रिणः स्नानशुद्धाः स्युरिति प्राजा
पत्यं समानोदकविषयमिति· वयं तु ब्रूमः बैजिकादभिसंबंधादनुरुंध्यादघं त्र्यहमित्येतत्समानविषयं दत्तकप्रति
ग्रहीतुरेकाहाशौचवाक्यं· तत्सपिंडानां च सद्यः शौचे वाक्यं यत्र जनकसपिंडानो एकाहपक्षिणीविधिस्तत्समान
विषयं· दत्तकप्रतिग्रहीतुस्तु एकरात्रत्रिरात्रयोः सन्निधिविदेशस्थापेक्षयैव व्यवस्था· दत्तकप्रतिग्रहीतृसपिंडानां
तु यएकाहाशौचविधिस्तत्र जनकसपिंडानां त्रिरात्रेण तत्समानविषयं· तेनोपनीतदत्तकप्रायणविषयो न तत्प्रति
ग्रहीतुरेकरात्रत्रिरात्रविधिः किंतु उपनीतदत्तकप्रायणे यथाशिष्टाचारं सापिंड्याविशेषाद्दत्तकप्रतिग्रहीतुस्तत्स

५७ पिंडानां च दशाहादि यथावर्णमेवाशौचमिति सुस्थं इति श्रीमात्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमां
साद्वैतसाम्राज्यधुरंधरश्रीमन्नारायणात्मजभट्टशंकरकृते धर्मद्वैतनिर्णये इतरकालाशौचसंपातोद्भेदाप
रिच्छेदः ॥ अथ देशांतरमृतसपिंडाशौचनिर्णयः विज्ञानेश्वरेण प्रोषिते कालशेषः स्यात् पूर्णे दत्वोदकं शुचिरि
ति व्याख्यातं प्रोषिते देशांतरस्थे पत्रस्थेन प्रथमदिवस एव सपिंडजननादिकं न ज्ञायते तस्मिन्सपिंडे कालस्य द
शाहादेर्वच्छिन्नस्य यः शेषो वशिष्टः कालः स एव शुद्धिहेतुर्भवति पूर्णे पुनराशौचे काले दशाहादिके प्रेतायो
दकं दत्वा शुचिर्भवति उदकदानस्य स्नानपूर्वकत्वात् स्नात्वोदकं दत्वा शुचिर्भवतीत्यदुक्तं [illegible]नि देशांता
तिमरणं श्रुत्वा पुत्रस्य जन्म च सवासा जलमाप्लुत्य शुद्धो भवति मानव इति अस्मिन्नेवार्थे बृहद्वसिष्ठादि
वाक्यानि योजितानि तत्र बृहद्वसिष्ठः मासत्रये त्रिरात्रं स्यात् षण्मासात् पक्षिणी भवेत् अहस्तु नवमादर्वा
क् ऊर्ध्वं स्नानेन शुध्यतीति तथा च मनुः संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यतीति यत्तु न वसिष्ठः
ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रमिति तदूर्ध्वं षण्मासेभ्यो रात्रावन्नवमे यदपि गोतमवचनं श्रुत्वा चोर्ध्वं दश ५७

म्याः पक्षिण्यामिति तन्मासत्रयादूर्ध्वं अर्वाक् च षण्मासात् एवं विज्ञानेश्वरेण एतेषु वाक्येषु देशांतरशब्दा
भावादसंनिधापितं देशांतरं न गृह्यते किंतु पत्रस्थेन प्रथमदिन एव सपिंडजननादि न श्रुतं तदा दशसमानदे
श एव प्रवृत्तिरेषां वाक्यानामित्युक्तम् यत्तु नद्यादिव्यवहिते देशांतरे मृतस्य सपिंडानां दशाहादूर्ध्वं मास
त्रयादर्वागपि सद्यः शौचमित्युक्तं तत्र परिभाषितदेशांतरशब्दगर्भस्मृतिः प्रमाणत्वेनोपन्यस्ता दे
शांतरमृतं श्रुत्वा क्लीबे वैखानसे यतौ मृते स्नानेन शुध्येत गर्भस्रावे च गोत्रिण इति एवमेव त्रिंशच्छ्लोक्यां
स्नानमं देशांतरस्थे द्विति पराशरमाधवीये तु परविज्ञानेश्वरमतविरुद्धं सिध्यांतितं तथा हि पराशरस्मृ
तिस्थं श्लोकद्वयमेवं भ[illegible]ग्निमरणे चैव देशांतरमृते तथा बाले प्रेते च संन्यस्ते सद्यः शौचं विधीयते
देशांतरमृतः कश्चित्सगोत्रः श्रूयते यदि न त्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेदिति तत्राद्यश्लोक
स्थं देशांतरमृते सद्यः शौचविधानमसपिंडदेशांतरमृतपरं पृथक् पिंडे च संस्थिते सवासा जलमाप्लुत्य स
द्य एव विशुध्यतीति मनुस्मृतिरुक्तव्याख्यानात् देशांतरस्थत्वेन वा सपिंडो विशेष्यत इति अत्रैव देशां

५८ तरत्वलक्षणमुक्तं वृद्धमनुना· महानद्यंतरं यत्र गिरिर्वा व्यवधायकः वाचो यत्र विभिद्यंते तद्देशांतर
मुच्यते इति बृहस्पतिरपि· देशांतरं वदंत्येके षष्टियोजनमायतां चत्वारिंशद्वदंत्येके अन्ये त्रिंशत्तथैव
चेति· इदमेवं देशांतरमपि प्रेत्य पौनरुक्त्यं निरस्तं तुंदिलीयश्लोकगतस्य देशांतरमृते सद्यःशौचविधेः
सपिंडविषयत्वसंवत्सरादूर्ध्वमरणश्रवणविषयत्वं च व्याख्यायतत्रैव त्रिरात्रादीनां वर्षमध्ये व्यवस्थाप
कान्युपन्यस्तानि· व्यवस्थापि च विज्ञानेश्वरकृतव्यवस्थातोन्यथा कृता· तथा च देवलः· आ~~[illegible]~~त्रिपक्षा
च्चिरात्रं स्यात्[illegible]मासात्पक्षिणी तथा· परमेकाहमावर्षात् ऊर्ध्वं स्नानेन शुध्यति· विष्णुः अर्वाक्त्रिपक्षात्त्रि
निशं षण्मासाच्च दिवानिशं· अहः संवत्सरादर्वाक् देशांतरमृतेष्वपीति· अत्र दिवाशब्देनाहर्द्वयमुच्यते· षण्मा
सात्पक्षिणीति वचनोत्तरादिति· तदेतन्मतद्वयमप्ययुक्तं पक्षांतरमेव तुल्याप्यमिति प्रतीयते· तथा हि· कार्यका
लसंख्यापरिभाषमिति न्यायात् परिभाषितदेशांतरविषयत्वं विष्णुवचनस्य· देशांतरमृतेष्वपीति देशांतरपद
गर्भत्वात्· तत्र च दिवाशब्देनाहर्द्वयं मन्यते प्युचितमेव· यस्तु तत्र हेतुर्माधवेनोक्तः षण्मासात्पक्षिणीति वचनां ५८

तरादिति स न युक्तः तस्य समानदेशविषयत्वात्· न चैवमहर्द्वयविषयत्वे किंमानमिति वाच्यं· षण्मासा
च्च दिवानिशमित्यत्राहर्द्वयाग्रहणे हि अर्वाक्त्रिपक्षात्त्रिनिशं अहः संवत्सरादर्वागिति वाक्यद्वयेनैव
विवक्षितार्थसिद्धौ मध्यमवाक्यमहर्मात्रविधायकं सदनर्थकमेव स्यादत आनर्थक्यपरिहाराय पक्षिणीविधा
तुमहर्द्वयपरता दिवाशब्दस्येति· यत्तु देवलवाक्यमात्रिपक्षात्त्रिरात्रं स्यादित्यादि तत्र यद्यपि देशांतरपदं न श्रू
यते तथापि विष्णुवाक्येन सतात्पर्यंतमर्थसाम्यात् समभिव्याहारस्य च भूयसः समानत्वादेकमूलकत्वेनालो
पवाच्च देशांतरविषयत्वं वत्याप्या· तदा च माधवोक्तोपि हेतुः सद्धेतुरेव· यद्वा देवलवाक्यं देशांतरपदाभा
वात्समानदेशविषयमेवास्तु तदा च मासत्रये त्रिरात्रं स्यादित्यनेन सह पक्षांतरमस्तु· तेन परिभाषितदेशां
तरगर्भविष्णुवाक्यसद्भावे देशांतरमृतेष्वपीति विज्ञानेश्वरोपन्यस्तमपि देशांतरगर्भं तद्विशेषवाक्यबलात्तस्य
यं माधवेनयोपन्यस्तं· ऊर्ध्वं दशाहाच्छ्रुत्वा तेत्वाशौच इत्येतावन्मात्रश्रवणात्सामान्यशास्त्ररूपाणां बाधादे
शांतरे स्नानमात्रमिति तन्न युक्तं· एवं च पदसिद्धवचनं माधवेनोपन्यस्तं देशांतरस्थमृते ऊर्ध्वं दशाच्छ्रुत्वा

५९ एकरात्रमितिनदपिदेशांतरगर्भत्वाद्विष्णुवाक्योक्ताहःसमानविषयं भविष्यति॥ एवंच सति प्राप्ति
तेकाल्पशेषः स्यात्पूर्णेदशोदकं शुचिरितियाज्ञवल्क्यीयं संवत्सरेव्यतीते तु स्पृष्ट्वैवापो विशुध्यतीतिमानवं
श्रुत्वाचोर्ध्वं दशम्याः पक्षिणीमितिगौतमीयं व्यतीते त्वाशौच संवत्सरान्तस्त्वेकरात्रेणातःपरंस्नानेनेति
वैष्णवं अतीते दशरात्रे तु त्रिरात्रमशुचिर्भवेदिति शांखं एषां सर्वेषां देशांतरशवाभावात्सामान्यशास्त्ररूपा
णां देशांतरगर्भविशेषशास्त्रैरास्वविषये बाधात्समानदेशविषयत्वं विज्ञानेश्वरोक्तमेव सम्यक्तत्तु देशां
तरमृतं श्रुत्वा त्वेवेतितन्मतं न सम्यक्॥ किंतु विष्णुवचनमपि माधवोक्तमिति विशेषः एषां तवचनानां
देशांतरगर्भिणामपि देशांतरविषयत्वेन तु व्याख्यानं माधवोक्तमसंगतमेवासमंजसं किंच सामान्यवाक्या वा
नामपि देशांतरविषयत्वे समासमदेशे त्रिरात्रपक्षिण्येकाहप्रापकमेव दुर्लभं॥ अथकैर्मुनिकन्यायात्तसिद्धिः
अपूर्वार्थवत्त्वेषायुक्तिर्यत्सामान्यवाक्यनसिध्यत्कैर्मुनिकन्यायेन साध्यतइति॥ तस्माद्विष्णुवाक्ये वसिष्ठ
वाक्ये चजागरूके देशांतरमृतस्य संवत्सरमध्ये स्नानमात्रमिति विज्ञानेश्वरसिद्धांतोनन्यापाद्यः उभया ५९

सत्वेतु सन्याप्यइति॥ नन्वेवमप्यनुचितमिदं॥ यत्समानदेशेवममासं यावदेकाहः ऊर्ध्वं स्नानमात्रं देशां
तरेतु विप्रकृष्टेपि नवममासादूर्ध्वमप्येकाहः संवत्सरं यावदितिचेत्रैवं॥ अनौचित्यप्रसंगादेव वि
ष्णुदेवलवाक्ययोरहः संवत्सरादर्वाकूपरमेकारुमावर्षादित्तनयोः संवत्सरवर्षशब्दयोर्नवमासात्म
कपादोनसंवत्सरपरत्वात्॥ अनयोर्द्वैवाक्ययोस्त्वयोविधयएकैकस्मिन्नत्राये नत्रिपक्षमध्ये त्रिदिना
शौचविधायकेन देशांतरगर्भसामान्यवाक्यस्य त्रिमासमध्ये त्रिदिनाशौचविधायिनो विरोधाद्वा धेपि
षण्मासमध्ये पक्षिणीविधायकेन द्वितीयवाक्येन देशांतरगर्भस्य सामान्यवाक्यस्य षण्मासमध्ये पक्षिणीवि
धायिनः संवादो यथा दृश्यते एवमनौचित्यप्रसंगपरिहारायतृतीयमपि वाक्यं षण्मासोर्ध्वं नवममासपर्य
न्तएकाहविधायकस्य देशांतरगर्भस्य सामान्यवाक्यस्य संवादितया व्याख्यायते चेत्को दोषः सामान्यवा
क्यत्वादेव तस्य देशांतरेपि प्रवृत्तिर्न्याय्यैव॥ तेनतत्वाससार्थपरत्वेनानौचित्यपरिहाराय तृतीयवाक्यव्या
ख्यानादविरोधाभावेन नतृतीयवाक्यस्य षण्मासादूर्ध्वं वर्षान्तं यावदहर्विधायकत्वशाविरोषवाक्यत्वा

सामान्यवाक्यप्राप्तार्थबाधकत्वेन तावतो विषयप्रसंगइति सर्वमनवद्यं तेनायं सिद्धांतः सन्देशः त्रिपक्ष्यां
त्रिदिनं पक्षिण्यावशानेऽवमावधिः एकाहस्तदनुस्नानं देशांतरमृते स्मृतं त्रिमासांत्रिदिनं पश्चाद्देशांतरवृ
ष्पतेः एकदेशेन तत्स्नानमात्रं देशांतरे मृतौ अविशेषाद्दशाहोर्ध्वमिति सम्यगुक्तं मतं नापि त्रिपक्ष्यां त्रिदिनं
षण्मोर्ध्वं चाहरित्सदः इति श्रीमत्सद्वाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभ
ट्टनारायणात्मजभट्टशंकरकृते धर्मद्वैतनिर्णये देशांतरमृताशौचसंशयोद्धरपरिच्छेदः अथाशौचद्वैतांत
तरनिर्णयः तत्र यद्येकस्मिन्नाशौचे रात्रिशेषे यामशेषे वान्यदाशौचांतरमापतति ततः पूर्वाशौचशेषेण शुद्धि
प्राप्तायां रात्रिशेषे द्व्यहाद्वृद्धिरित्येतत्प्रवर्त्तत इति निर्विवादे विज्ञानेश्वरेणां तु राजन्ममरणे शेषाहोभिर्विशुध्यती
ति व्याख्यातं वर्णापेक्षया वयोवस्थापेक्षया वा यस्य यावानाशौचकालस्तदंतरा तत्समस्य ततो न्यूनस्य वाशौच
स्य निमित्तभूते जनने मरणे वा जाते पूर्वशेषेणाशुद्धिरिति ततस्तदपवादतया गौतमवाक्यं व्याख्यातं तथा
शौचसन्निपातकालविशेषकृतोऽप्यपवादो गौतमेनोक्तः रात्रिशेषे सति द्वाभ्यां प्रभाते तिसृभिरिति गौ

तः अतो रात्रिशेषे यामशेषे वान्यदाशौचांतरसन्निपातेपि शेषाहोभिरिति बहुवचनाविवक्षया शेषशुद्धिविधि
प्रवृत्तेरिष्टत्वात्तेनोत्सर्गेण समानविषयो रात्रिशेषे द्व्यहाद्वृद्धिरित्यपवादोपि प्रवर्त्तत एवेति सिद्धं यत्र त्वेकस्मि
न्नाशौचे रात्रिशेषे यामशेषे वा सत्यहर्मात्रमाशौचांतरमापतति तत्र शेषशुद्धिविधिः प्रवर्त्तत एव तदपवादस्तु रात्रि
शेषे सति द्वाभ्यामिति प्रवर्त्तते वा नेति चिंत्यते तदर्थमिदं चिंत्यं किमयमपूर्वविधिरुत प्रतिप्रसव इति तत्र पूर्वः पक्षः
रात्रिशेषे सति द्वाभ्यामित्ययमपूर्वविधिर्न प्रतिप्रसवः यद्यपि पूर्वमाशौचं प्रबलमेव शेषाहः शुद्धिविधिना चापोदि
दि पुनः प्रतिप्रसूयत इत्याशंक्यते तथापि न प्रतिप्रसवः यद्दिदेशमेव रात्रिरात्रं दशरात्रं वा पूर्वप्रबलमासीत्तद
शमेव पुनर्विधीयते ततः प्रतिप्रसवः स्यात् यथा पूषा प्रपिष्टभाग इति पेषणं चरावतिदेशतो यादृशं प्राप्तमा
सीत्तादृशमेव पुनर्विधीयते न गुणांतरविशिष्टमिति प्रतिप्रसवो भवतीति वाक्यपादोपांत्ये प्रतिपादितं इह
तु रात्रिशेषे सति द्वाभ्यामित्यनेन द्व्यहनियमो विक्रियते आशौचप्रतिप्रसवश्चेत्सशाक्यमेकेन वाक्ये वार्थद्व
यं विधातुमित्यनन्यगत्याऽपूर्वविधिरेवायं तद्यथा कृष्णलं चरौ घृते श्रपयतीति घृतनियमः श्रपण प्रति

६१ प्रसवश्चेत्यर्थद्वयं शक्यमेकेन वाक्येन बोधयितुं इत्युक्तं दशमे। इयांस्तु विशेषः यत्तत्र घृतनियमे उत्सत्तिवि
धिप्राप्त एवानूद्यते श्रपणप्रतिप्रसवमात्रं तु घृते श्रपयतीत्यनेन विधीयते इह तु अहईय नियमो नान्यतः प्रा
प्त इत्यनुवादासंभवादाशौचप्रतिप्रसव एव न भवति। किंत्वपूर्वविधिरेवेति कल्प्यते। तदेवं एत्रिशेषेयामशेषे
वाहर्मात्रं पक्षिणीमात्रं वाशौचांतरमापतितं तदपि शेषशुद्धिप्रसंगे हईयमहस्त्र्य पंचवर्धपितव्यमिति पूर्वः
पक्षः सिद्धांतस्तु रात्रिशेषे द्वाभ्यां प्रभातेतिसृभिरिति नायमपूर्वविधिः किंतु प्रतिप्रसवोऽस्याघवाक्यूषप्रवि
इतान्यापात्। यत्तूक्तं घृते श्रपयतीतिवदत्र शक्यमेकेनार्थद्वयं विधातुं प्रतिप्रसवश्च घहत्र्यहनियमश्चेति। अ
त्र ब्रूमः नात्राशौचस्य प्रतिप्रसवः किंतु घहत्र्यहयोरेव। आशौचं हि रात्रिशेषे प्रभातशेषे च जननादौ प्राप्त
मेव दशाहं नत्र्यहादि तत्तु शेषाहःशुद्धिविधितः शेषकाले एव प्राप्तं तदपवादेन घहत्र्यहयोरेव प्रतिप्रसवः क्रि
यते। तत्रापि यत्र तादृशादशाहाशौचपातस्तत्र दशाहमध्ये घहत्र्यहं च प्रसक्तमासीदेवेति तत्र प्रसवो युक्त
एव। यत्र यामशेषे त्र्यहाशौचपातस्तत्रैव ध। येषां रात्रिं त्रेधा विभज्याद्यभागद्वयं पूर्वाहोरात्रसंबंधि येषां ६१

चरात्रिं द्वेधा विभज्य पूर्वार्धं पूर्वाहोरात्रसंबंधि तेषामुभयेषामपि यामशेषे त्र्यहाशौचपाते त्र्यहमधिकं प्रस
क्तमेवासीदिति तत्र तत्प्रसवो युक्त एव। येषां तु यस्याहस्तस्य रात्रिरिति पक्षस्तेषां नरहोराचे गृहीतेव त्र्यहप्रा
प्तेर्घहमेयाधिकं प्रसक्तमासीत्त्र्यहमिति न तद्विषयोयं प्रतिप्रसवः प्रभातेतिसृभिरिति। तस्माद्यदारा
त्रिशेषे यामशेषे वाहर्मात्रं पक्षिणीमात्रं वाशौचांतरमापततितदाशेषशुद्धिप्रसंगेहद्वयं अहस्त्रयं च न
वर्धनीयमिति सिद्धं॥ इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्री
भट्टनारायणात्मजभट्टशंकरकृते धर्मद्वैतनिर्णये रात्रिशेषयामशेषयुतिनाहर्मात्राशौचे घहत्र्यहवद्धिसं
शयोद्भेदपरिच्छेदः॥ अथाशौचांतरनिर्णयः त्रिंशच्छ्लोक्यां सूतिकानुत्रिंशद्रात्रं न योग्यापितृसुरकरणे विं
शतिं पुत्रसूस्तु इति। दशश्लोक्यां तु मासं पुंप्रसवे तु मासानुरपरस्यैतद्दशाहाधिकमिति। अत्र पैठीनसिवाक्यं
मूलं। सूतिकां पुत्रजननीं विंशतिरात्रेण कर्माणि कारयेन्मासेन स्त्रीजननीमिति। अत्र मिताक्षरादिग्रंथेषु मान
कोपि व्याख्याविशेषः कृतः त्रिंशच्छ्लोकीकारदशश्लोकीकारसमतयो व्याख्ययोर्मध्ये कान्याय्येति चिंत्यते। तत्र

६२ केचिदाहुः दशश्लोकीकारस्तु न एवार्थोन्यथा प्रतीतं तथाहि । आद्यमते पुत्रजन्मन्यां विंशतिसंख्यापूरणं
स्त्रीजनन्याश्च मासपूरणं सपिंडप्रयुक्तदशाहेन कुलेन तथा युक्तं विध्यनुवादविरोधात् । पैठीनसिवाक्ये हि विंश
तिरात्रेणेत्येकैकनैव पदेनाद्यदशाहांशे सपिंडजननवनाशौचविधिनैवासिद्धः कर्मानधिकारोऽनुवादित
व्यो दशाहोत्तरांशे तु असिद्धः कर्मानधिकारो विधातव्यः एवं मासेनेत्यत्राप्याद्यदशाहांशे सपिंडजननाशौ
चविधिनैव सिद्धः कर्मानधिकारोऽनुवादितव्यो विंशत्यहरंशे तु असिद्धः कर्मानधिकारो विधातव्य इति । अ
थैतद्दोषपरिहारार्थं विंशतिरात्रशब्दो दशाहोत्तरं लक्षयेच्चासशब्दश्च विंशतिसंख्यान्यूनान्यहानि लक्षयेत्
ततो लक्षणैव दोषः अतो विध्यनुवाददोषं लक्षणादोषं च परिहर्तुं विंशतिरात्रशब्दः सपिंडाशौचविधित ए
व यस्मिन्दशाहे कर्मानधिकारः सिद्धस्तदनंतरं तद्भिन्नमेव विंशतिरात्रं विधत्ते । एवं मासशब्दोऽपि सपिंडाशौ
चदशाहभिन्नमेव मासं विधत्त इति दशश्लोकीकारोपनिबद्धमेव पैठीनसिवाक्यव्याख्यानं न्याय्यमिति । अ
त्र ब्रूमः स्यादेवं यदि पैठीनसिवाक्ये सपिंडजननाशौचेनानेपि वचनांतरसिद्धतद्दिवसकर्मानधिका ६२

रः स्यतत्त्वेनाविधीयेत न तु स विधीयते किंतु सपिंडाशौचं द्विविधं अस्पृश्यत्वलक्षणमेकमपरं कर्मान
धिकारलक्षणं तत्र कर्मानधिकारस्तु सिद्ध एव तेन विधेयः तमेव तत्र प्रदशमदिनरूपावध्यपवा
देनावध्यंतरमात्रं विधीयते जनने पदस्पृश्यत्वं तु दशमदिनावधिकमेव पुत्रीपुत्रसुवोः यत्तु जनन
निमित्तं कर्मानधिकाररूपमाशौचं तत्रोत्सर्गतः प्राप्तं दशमदिनमेवनावधिः किंतु पुत्रसुवो विंश
तितमं दिनं समास्यावधिः स्त्रीजनन्याश्च त्रिंशत्तमं दिनमवधिरित्यवधिविशेषो जननेन निमित्तं कर्मा
नधिकाररूपमाशौचमुद्दिश्य विधीयते तेन वाक्यविशेषः कर्मानधिकारे विहितो भवतीति विध्यनु
वादविरोधलक्षणापत्तिरूपदोषद्वयोद्धाराद्यथोपपन्नो त्रिंशच्छ्लोकीकारमतमेव सम्यक् पुत्रजनन्या
विंशतिसंख्यापूरणं स्त्रीजनन्याश्च मासपूरणं जनननिमित्तदशाहादिति । किंच विंशतिरात्रेमासे
चपूर्वावध्यपेक्षोपात्ते पैठीनसिवाक्ये जननाशौचसमासेरनुपात्तत्वात् पूर्वावधित्वे दशश्लोकीकार
मते स्यात्तथा युक्तं त्रिंशच्छ्लोकीकारमते तु पुत्रजननी स्त्रीजननीति स्वैताभ्यामुपात्तस्य जनन

६३ स्यैव पूर्वावधित्वमिति पुत्रोत्तरोयं पक्षः । इदं च न केवलं पक्षोक्तमेव प्रयोजनं किंतु क्षत्रियायाः पुत्र
जनन्या द्वादशदिनाशौचाद्दशावेव दिनान्यधिकानि कर्मानधिकारः तस्या एव स्त्रीजनन्या द्वाद
शभ्यो दिनेभ्योधिकान्यष्टादश दिनान्येव कर्मानधिकारः वैश्यायास्तु पुत्रजनन्याः पक्षाशौचादधिकं
पक्षमात्रं कर्मानधिकारः स्यात् स्त्रीजनन्याश्च न किंचिदधिकमिति । नन्वेवं तर्हि पुत्रज
नन्याः शूद्राया मासमध्ये द्विमासापवादेन विंशतिरात्रमेव कर्मानधिकार आपद्येत । मैवं । बाधो नान्यग
त्या स्वीकार्यो यद्बाधेन नोपपद्येत । विंशतिरात्रेण स्त्रीजननीमिति तद्वा स्मरणाद्द्विवर्णत्रये पूर्ववद्द
शाहाद्यवधिककर्मानधिकारस्वरूपाबाधेन तदवधिमात्रबाधेन चोपपन्नं स्याद्द्विविधपक्षेत तत्सामा
न्यतः प्रसक्तः कर्मानधिकारस्तु स्वरूपमपि विंशतिरूर्ध्वं दिने पुत्राबाधेन मासावधिमात्रबाधेनोपप
न्नमिति शूद्राविषये न प्रवर्तते । किंच शूद्राविषये हासंविरुध्यात् । ब्राह्मणादिवर्णत्रयेव द्विजमि
त्तं वैरूप्यमपि तात्पर्यतः स्यात् । अपिच मासेन स्त्रीजननीमिति तावतैव शूद्रायाः प्रकृतत्वेसिद्धत्वा ६३

न्मासं कर्मानधिकारस्यान्यत्र तत्त्वाद्वर्णत्रयविषयविषयमेव निश्चितं । तेन न्यायदर्शनादपि तत्सम
भिव्याहारात्तद्वैरूप्यापत्तेः पुत्रसू विंशतिरात्रेणेत्येतदपि वर्णत्रयविषयमेव । तदुक्तविषये न्यायदर्शनादि
ति । तस्मात्सिद्धमेतत्त्रिंशच्छ्लोकीकारमतमेव न्याय्यमिति सत्यं भूयसा । इति श्रीमत् । पुत्रस्त्रीजननीवि
षयविंशतिरात्रमासावधिककर्मानधिकारसंशयोद्भेदपरिच्छेदः ॥ आशौचं यस्य संसर्गादापतेद्गृहमेधि
नः । क्रियास्तस्य न लुप्यन्ते गृह्याणां च न तद्भवेत् इति । इदं मदनपारिजातेग्निसाध्यकर्मविषयमेव सपिंडा
शौचे प्रसृते ह्यग्निषु क्रिया इति वृद्धस्मृत्युक्तेन तद्युक्तं । क्रियास्तस्य न लुप्यंत इति हि क्रियाणां वैश्वदेवादी
नामलोपमात्रं वदति न साक्षात्कर्तृत्वे । तेन सर्वाशौचेषु प्रवृत्तस्य हावयेन्नतु हापयेदित्यस्यापवादेन ता
त्पर्यवादेदं । किंच गृह्याणां च न तद्भवेदिति पूर्वस्यैव वाक्यशेषोनुवादो वा पूर्वो निषेधः निर्हरणादिनिमित्तस्या
शौचस्य गृह्याणामसंप्रसक्तेः तत्र वाक्यशेषत्वेन नेपास्तस्यार्थवादोनर्थकः । स क्रियास्तस्य न लुप्यंत इत्य
त्र गृह्याणां कर्तृसमर्पकस्यार्थः संदिग्धेषु वाक्यशेषादिति न्यायात् । एवं सति क्रियास्तस्येति मदनपा

६१ द्विजातमतेऽग्निसाध्यक्रियाविषयं सामान्यवचनेनैव सिद्धे पुनर्विशेषवचनमनर्थकं स्यात्। तस्मादनग्नि
साध्यं वैश्वदेवादि यत्सपिंडाशौचादौ निषिध्यते तद्विषयमिदं वाक्यं। तच्चापि वचनसाक्षात्कर्तृत्वपरं किं तु ग
ह्याणामिति वाक्यशेषात् न द्वारे तु स्यादेव। केचित्तु एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः त्र्यहात्केव
लवेदस्तु द्विहीनो दशभिर्दिनैरिति वचनेन सपिंडाशौचादौ सामान्यमवचनस्य प्रसूहे। त्वाग्निषु क्रिया इत्यस्या
पाहराद्रावपवादात्तथैव क्रियास्तस्य न लुप्यंते इत्यनेन निर्हरणाद्याशौचेपवादः क्रियत इति प्रथमादिद्विवते
ऽग्निसाध्यकर्मणां स्वयं कर्तृत्वार्थं क्रियास्तस्येति वाक्यं इतिमदन्नाथ यं कल्पयंति। तदयुक्तं स्वयं कर्तृकत्वार्थमि
त्यंशस्तु निरस्त एव गृह्याणामिति वाक्यशेषात्। हि शब्देनान्यद्वारेव कर्तृत्वं न साक्षादित्युक्तं। तथापि अन्यद्वा
रेवाग्निसाध्यकर्मत्वे याद्याहराद्रावधिकारप्रतिपादनार्थमिदमस्त्वीति चेदत्र केचित्। अनुपलभ्यमानस्म
तिगतानिहिता क्यानि यानि यत्प्रकरणे निबंधकारैर्लिख्यंते तानि तत्प्रकरण एव पठितानि इत्युन्नीयंते।
एकाहाच्छुध्यते इति च मेधातिथ्यादि सर्वनिबंधेषु दशाहं शावमाशौचं सपिंडेषु विधीयत इत्येतद्व्याख्या ६४

न प्रकरण एव लिखितं। अतस्तस्य निर्हरणाद्याशौचप्रवृत्त्यभावात् प्रसूतौ हेत्वाग्निषु क्रिया इत्य
स्य च सामान्यवाक्यस्य हावचेन्न तु द्विपिंडादिस्येन सहितस्य प्रवचनेऽग्निसाध्यकर्माधिकारः प्रथ
मादौ सिध्यत एवेति व्यर्थसत् क्रियास्तस्य न लुप्यंते इत्यत्रोनग्निसाध्येषु वैश्वदेवादिषेवच्या व्यवतिष्ठते
व स्तु नस्तु प्रसूहादिस्य स्यापि एकाहाच्छुध्यते विप्र इति वत्सपिंडाशौचे प्रवृत्तेपैवाग्नेरग्निसाध्ये घनग्नि
साध्येषु च क्रियास्तस्य न लुप्यंत इत्यनेनैवापूर्वोऽधिकारो वोध्यते आशौचशब्देन क्रियानधिकारप्रस
क्तेरित्याहुः। तत्र एवं हि सत्याचार्यगुरूपाध्यायशिष्यत्विग्याज्याशौचे सपिंडाशौचप्रकरणाधीतयोः
प्रसूहेतद एकाहाच्छुध्यते इत्यनयोराशौचयस्य संसर्गादित्यस्य वां प्रवृत्त स्तत्राग्निसाध्यानामपि क
र्मणामनुष्ठानमिष्टं न सिध्येदिति। तस्मात्तथाप्यन्यद्वारेवे सा शंका एवं परिहर्तव्या। प्रसूहेत्वाग्निषु
क्रिया एकाहाच्छुध्यते विप्र इत्यनयोः परिभाषारूपत्वेन प्रकरणं गात्संगी शौचेष्वेव प्रवृत्तिरिष्टैव तथापि
क्रियास्तस्य न लुप्यंत इत्यनेभ्यः सर्वेभ्यो वचनेभ्यः प्राकृप्रवचनमिति निर्विवादं। तत्तस्मात् समपेक्ष्यत

६५ दपवादमात्रार्थतया प्रत्यूहे दैक्षाहादिस्यनयोरिव तत्समकालमेव क्रियासत्त्वस्य नत्सु पोनइत्यस्य प्र
वृत्तौ संभवत्यां प्रत्यूहे दैक्षाहादिस्यनयोः प्रवृत्त्युत्तरकालप्रवृत्तिस्तलश्चे क्षाहादिस्यापवादद्वयस्युक्त
मंगीकर्तुं। यथा हि न हिंस्यात् सर्वभूतानीति निषेधस्य रागप्राप्तिमुपजीव्य प्रवृत्तौ संभवत्यां तदपवादक्र
तुनाग्नीषोमीयविध्युत्तरकाले प्रवृत्तिर्नेष्टा किंतु तत्समकालमेव तथात्रापि। ततश्च क्रियासत्त्वे निप्रत्यूहे
दिस्यनेन तुल्यकाले प्रवृत्तं तन्मूलभिन्नावश्यकत्स्य मूलमत एव तेभानुपपन्नसंहाबीक्रियासामान्यपतिप्र
सवे एव भवतीति युक्तमुत्पश्यामे इत्यलमश्रुतमीमांसान्यायैः संप्रदायानधीनतनिबंधग्रंथजालैः स्वकपो
लकल्पनामात्रेण तत्तत्स्मृत्यर्थाभासमुत्प्रेक्षमाणैः सह विचारेण। इतीत्यादि० संसर्गाशौचसंशयो
च्छेदपरिच्छेदः॥ ॥अथेदानीं ज्योतिष्टोमे चतुर्णां विरणपक्षे अवलोयः संपूर्णआशौची स्यात्तत्स्या
ज्योनवेति चिंत्यते। तत्र केचिदाहुः आरब्धे सूत्रकंनास्त्वास्युक्तेः आरंभो वरणं प्रलेइतिचोक्तेर वृतस्या
ज्याग्व। अत एव श्रीरामांडरिभाष्ये चतुर्णां यधवृतस्यान्यस्याशौचे स्यात्तत्तस्त सकालस्यानेन्यमागम ६६

येदित्युक्तं। अत्रापरे व्यवस्थामाहुः भाष्यग्रंथो यदिनेन स्वीयआयः पदार्थोनिवृत्तस्तद्विषयो भवि
ष्यति। यत्तु अवृतत्वादाशौचप्रवृत्तिरिति तदपि दर्शपूर्णमासादाववृतः स्वामिधेनीरन्वाह होतेत्यु
क्तेर्यदि सामिधेनीषु प्रवृत्तस्तदापि प्रवृत्तस्तदापि स्यान्येः स्यात्। तत्र प्रथमपक्षवादिनः समादधति।
वरणवति कर्मणि वरणमारंभः दर्शपूर्णमासयोश्चेनैव वरणमस्ति तेन स्वपदार्थकरणमेवारंभ इति।
अत्रद्वितीयपक्षवादिनो वदंति। यथा हि वरणवत्येव कर्मणि वरणमारंभो नावरणवति एवं वरणस्यापि क
र्मणि ये वरणवंतस्तान्प्रत्येव वरणमारंभः इतरान्प्रति तु स्वपदार्थकरणमेवारंभ इति। तस्माच्चतुर्णां वर
णपक्षे ये अवृतास्तेस्वीयास्वपदार्थकरणोत्तरमाशौचपातेनत्याज्या इति सिद्धं। किंच ऋत्विजां दीक्षि
तानां च यस्ति यं कर्म कुर्वतामिति वाक्याद्वरणाभावे पि ऋत्विक्त्वेनैवावृतानामपि स्वीयपदार्थकर
णानंतरमाशौचाभावः नचात्र वरणवाक्येन ऋत्विजामित्यस्योपसंहारः परस्परव्यभिचारेण सामान्य
विशेषाभावात्। ऋत्विक्त्वं हि विहाय वृतत्वं चमसाध्वर्युप्रवर्तने वृतत्वं च विहाय ऋत्विक्त्वं चतुर्णां वि

६६ रणपक्षेन्येषु वर्त्तते ततो विलिंगमकाभावान्मात्र पुरोडाशं चतुर्धा करोत्याग्नेयं चतुर्धा करोतीति वदु
पसंहारः तेन कृति कृवाक्येन चतुर्णां विरणपक्षेन्येवास्य पदार्थप्रवृत्यनंतरं दर्शपूर्णमासयोश्चावन
स्य होतुः सामिधेनीषु प्रवृत्तस्याशौचाभाव उच्यते· वरणवाक्येन चैव तानां होत्रादीनामृत्विजाम
त्विजामपि च वरणवतां च मसाध्वर्यूणामाशौचाभाव इति· तस्माच्चतुर्णां वरणपक्षेपि कृतोसौस्या
याधिपदार्थकरणोत्तरमाशौचपाते सति नैव त्याग इति सिद्धं इति यत्र आशौचे द्वैध निर्णयः· अथ सपिंडी
करणकालनिर्णयः तस्याष्टौ कालाः तत्र कालादर्शे माधव्याचाने ग्निरनग्निमतः सपिंडीकरणं सतु स
त्यतस्त्र कुर्यात्· तदुक्तं महाभारते· सपिंडीं कुर्याद्यजमानस्त्वनग्निमान्· अनाहिताग्नेः प्रेतस्य पूर्णेब्दे
भरतर्षभ· द्वादशेहनि षष्ठे वा त्रिपक्षे वा त्रिमासिके एकादशे पि वा मासि मंगलं स्यादुपस्थितमिति· हे
माद्रिस्तु षष्ठ वाना हिताग्नेराह अवृद्धौ तेभ्युदयागमे वेति मुख्यो षण्मासस्त्रिपक्षे कादशाह द्वादशाहौ
अनुकल्पाइति· अनग्निरेवाग्निमतः सपिंडीकरणं तृतीयपक्षे एव कुर्यात्· तदाह लघुहारीतः अनग्नि ६६

स्तु यदा वीरभवेत्कुर्यात्तदा गृही· प्रेतश्चेदग्निमांस्तु स्यात्त्रिपक्षे वै सपिंडनं· अत्र हेमाद्रिः पूर्णे संवत्सरे ष
ण्मासे त्रिपक्षे वेति गोभिलवाक्ये पूर्ण इति षण्मासे त्रिपक्षे वेत्यत्रा प्यनुषज्यते इत्याशयेन व्याचख्यौ प
क्षत्रये पूर्णे इति· तन्न· अनुषंगं विनापि वाक्यपूर्तौ तदयोगात्· पूर्णेब्दे इत्यत्र तु स्तरो न्हितत्तः सपिंडीक
रणवत्सरोर्द्ध्वं ततः स्थितमिति नागरखंडोक्तं· पितुः सपिंडीकरणं वार्षिके मृतिवासरे इत्युशीनः स्मरणाच्च
साग्निकस्य त्रिपक्षेदशाह एव· तदुक्तं भविष्यत्पुराणे· यजमानोग्निमान् राजन् प्रेतश्चोनग्निमान्भवेत्· द्वा
दशाहे तदा कार्यं सपिंडीकरणं सुतैः· अत्र साग्न्यनग्निपदानि आहिताग्न्यनाहिताग्निपराणि· प्रेतश्चेदा
हिताग्निः स्यात्कर्त्तानग्निर्यदा भवेत्· सपिंडीकरणं तस्य कुर्यात्पक्षे तृतीयक इति सुमंतुवचनात्· कात्याय
नः एकादशाहं निर्वर्त्य पूर्वे दर्शाद्यथाविधिः प्रकुर्वीताग्निमान्विप्रो मातापित्रोः सपिंडनं· प्रजापतिः
नासपिंड्याग्निमान्पुत्रः पितृयज्ञं समाचरेत्· नपार्वणं नाभ्युदयं कुर्वन्न लभते फलं· गालवः सपिंडीक
करणात्प्रेते पितृत्वमास्थिते पितृकं पदमास्थिते· आहिताग्नेः सिनीवाल्यां पिंडयज्ञः प्रवर्तते· हारीतः या

६७ तुपूर्वममावास्यामृताहाद्दशमी भवेत्· सपिंडीकरणं तस्यां कुर्यादेव सुतोग्निमान्· तेन साग्नेः सुतस्यापि
त्रोः सपिंडने त्रयः कालाः द्वादशाहः दशाहासरतो यस्मिंश्चिदहः प्राग्दर्शात्· दशाहसरतोमावास्यायेति हेमा
द्रिः तस्य मृताहाद्दशमी या रात्रिस्ततः परा यामावास्येति व्याख्या· फाल्गुदर्शमाधव्योस्तु मृताहादूर्ध्वं दिन
मारभ्य दशमीति व्याख्यानादेकादशाह एवेति· अत्र च गालवपाद्मसुमंतुवाक्ययोराहिताग्निपदमौपा
सनाग्निमतः पिंडपितृयज्ञानुरोधेनैतेषु कालेषु सपिंडीकरणं किंतु पिंडपितृयज्ञोत्कृष्यते दशाहम
ध्यवर्त्तिवत्· आहिताग्निरेव द्वादशादिविधानात्· यथा नाहिताग्नेर्विहितो यदहर्वृद्धिरापयेतेति काल
आहिताग्नेर्नश्ववर्त्तते· आहिताग्न्यनधिकारिकद्वादशाहादिनियमाबाधेनापि पिंडपितृयज्ञसिध्यर्थत्वेनोप
पत्तेस्तेन नियमबाधायोगात्· उभयोराहिताग्नित्वे तु द्वादशाह एव सपिंडीकरणं· साग्निकस्तु यदा कर्ता
प्रेतश्चाप्यग्निमान्भवेत्· द्वादशाहे तदा कार्यं सपिंडीकरणं पितुरिति स्मरणादिति विज्ञानेश्वरमाधव्यो
हेमाद्रिकालादर्शाद्यौस्तु एतद्वाक्यास्वरसनादेतन्निर्मूलत्वमित्यभिप्रायः तेन तन्मते पितुरपि साग्निकस्य ६७

पि सपिंडने साग्निकस्य पिपुत्रस्य न द्वादशाहनियमः किं त्वनियम एव· तथा पूर्वयोरपि मते दितृव्यतिरिक्त
स्य साग्निकस्यापि सपिंडने साग्निकस्यापि पुत्रव्यतिरिक्तस्य भ्रातृतत्सुतादेर्नद्वादशाहनियमः तदुक्तस्मृतौ
पितुरित्युक्तेः न च तदविवक्षा· अप्राप्तोद्देश्यस्य वाप्राप्तस्योद्देश्यविशेषणस्यापि विवक्षायामीमांसान्या
यसिद्धत्वात्· अन्यथा कर्तृसाग्निकत्वप्रेताग्निमत्वयोरप्यविवक्षापत्तेः तथापि पितुरित्युक्तेरेव पूर्वयोरपि
मते द्यापि न द्वादशाहनियमः किं त्वात्रस्तु नाम पितृग्रहणमविवक्षितं तथापि साग्निकर्तृकसपिंडीकरणे पूर्वो
क्तद्वादशाहदर्शादिकालोक्तौ सर्वैर्निबंधृभिः पिंडपितृयज्ञसिध्यर्थतोक्तेस्तेषु वाक्येषु साग्निग्रहणमग्न्यौ ग्र
विशेषणत्वमेवाहनेनूपलक्षणत्वं एवं पि ज्ञानेश्वरोक्तस्मृतावपि तुल्यन्यायत्वात्तथैवोक्तं विज्ञानेश्वरे
ण· तेनास्य विवक्षितं साग्निकत्वमेव नाहिताग्नित्वं तद्वचनप्रवृत्तिरिति· नन्वेवं पस्तु साग्नित्वाभावेऽनग्निस्वि
ति हारीतवाक्ये माग्निपदेन तस्यैव साग्निकत्वस्य प्रत्यभिज्ञापमानस्य व्यतिरिक्तोपोक्तेस्त्रिपक्षनियमोस्त्वि
ति चेन्न· स्मरत्यांतरस्य स्वंतरोक्तप्रत्यभिज्ञाभावात्· न च साग्निपदमनग्निपदे व यभूतमप्यस्तिये न पस्त्ये

६८ भित्तायेतः त्वाष्ट्रं यास्त्यावत्तमालभेते तस्य स्वनुपर्यग्निकृतं पात्नीवंतमिति तेनैव पदेन युक्ताप्रत्यभिज्ञा अ
नभ्याहिताग्नेः पत्न्यो कर्तृत्वं यथा विवक्षितं साग्नि संज्ञास्ति एवमनग्निपदेन विवक्षितं अनग्निपदस्य विद्यमाना
ग्निपरत्वेपि दशाहादि साग्निककालविधायिवाक्यानां क्वचिन्मातापित्रोः क्वचित्सुतैः क्वचित्पितुः क्वचित्सु
त इति श्रवणात् सुतविषयत्वे सति साग्निकपदोक्तः पुत्र एवाभग्निरित्यपि बहुव्रीहिणा प्रत्यभिज्ञायते न त्वपत्नि
यमे हेतुरस्ति येन विशेष्येन प्रत्यभिज्ञापते विशेषणरूपा त्वग्नय एव प्रत्यभिज्ञायंत इति तस्मात्पत्न्या कर्तरि नै
वत्रिपक्षनियमो युक्त इति इत्याहिताग्नेः पत्नीसपिंडने कालद्वैतनिर्णयः अथात्र कर्तृत्वचिंता तत्र पुत्रे प्रव
सत्यपि सत्रवच्चिरकालादपि कुर्यात् भ्रातृन सुतादिः सन्निहितोपि श्राद्धानि षोडशादत्वा कुर्यात्सतु सपिंड
नं प्रोषितावस्तितः पुत्रः कालादपि चिरादपीति वायुपुराणात् तत्रापि ज्येष्ठस्यैवाधिकारः एकादशाद्याः क्रम
शो ज्येष्ठस्य विधिवत्क्रियाः कुर्युर्नैकैकशः श्राद्धमाद्विकं तु पृथक्पृथगिति प्रचेतोवाक्यात् नन्वनेनैकाद
शाहस्यमासिकानामपि ज्येष्ठकर्तृकत्वनियमः प्रतीयत इति चेन्न पूर्वाः क्रियामध्यमाश्च तथा चैवोत्त ६८

राः क्रियाः त्रिप्रकाराः क्रियास्त्वेतास्तासां भेदश्शृणुष्व मे आद्याद्वादशाहाच्च मध्येयाः स्युः क्रियामताः ताः पूर्वा
मध्यमामासि मास्येकोद्दिष्टसंज्ञिताः प्रेते पितृत्वमापन्ने सपिंडीकरणादनु क्रियंते याः क्रियाः पित्र्याः प्रोच्यं
ते तान्नृपोत्तराः पितृमातृसपिंडैस्तु समानसलिलैस्तथा तत्संघातगतैश्चैव राज्ञा वा धनहारिणा पूर्वाः क्रिया
मध्यमाश्च पुत्राद्यैरेव चोत्तराः दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथेति विष्णुपुराणे पराशरवाक्यात् अत्र हि मा
सिमासीत्यविवक्षितं एकादशाहश्राद्धानामपि पूर्वक्रियात्वेनादशाहादित्यवैपरीत्यात् अतः प्रथमावगतद
शाहावधिकत्वबलान्मासि मासीत्यविवक्षित्वा एकादशाहादेः सपिंडीकरणप्राक्कालीनैकोद्दिष्टमात्रस्य मध्यम
क्रियात्वेन सपिंडादीनां नृपसंज्ञानां तत्र कर्तृत्वं तथा ज्येष्ठकर्तृकत्वनियमस्य तत्रापवादे कृते तदुत्तरे सपिंडीकर
णे एव ज्येष्ठकर्तृकत्वनियमो वतिष्ठते सपिंडीकरणोत्तर पित्र्यक्रियारूपोत्तरक्रियासु यद्यपि पुत्राभावे पुत्राद्यैरे
व चोत्तरा इत्यनेन पुत्रः पौत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसंततिरिति निर्दिष्टानां भ्रातृसंततसंतानां दौहित्राणां
च कर्तृत्वमुक्तं तथापि तत्र सपिंडानामवनीपसंज्ञानां निवृत्त्यर्थमनुज्येष्ठे सति इतरेषां कर्तृत्वाय आद्विकं तु पृथ

थक्पृथगिति प्रचेतोवाक्यशेषस्तु विभक्तविषयः अतएवोक्तं मिताक्षरायां भ्रातॄणामविभक्तानामेको धर्मः
प्रवर्तते विभागे सति धर्मोपि भवेत्तेषां पृथक्पृथगिति सर्वैरनुमतं कृत्वा ज्येष्ठेनैव तु यत्कृतं द्रव्येण चावि
भक्तेन सर्वैरेव तु तत्कृतमिति मदनपारिजातलिखितं मरीचिवचनमपि सपिंडीकरणविषयएव व्यवतिष्ठ
ते प्रचेतोवाक्योक्तन्यायात् तथा कनीयसा कृतं कर्म प्रेतशरीरे विहायतु ज्यायसापि कर्तव्यं सपिंडीकर
णं युगपदिति सपिंडीकरणस्य ज्येष्ठकर्तृकायत्तिविधिबलादपि ज्येष्ठैककर्तृतावगम्यते नन्वज्येष्ठकर्तृका
दशाहांतःप्रेतशब्दहोमोक्तेः कनीयःकर्तृकेणापि सपिंडीकरणेन प्रेतत्वविमुक्त्यवगतेरनधिकारिकर्तृकेण चतद
नुपपत्तेः कनिष्ठस्याप्यधिकारसाधकं प्रत्युतेदं वचनमितिचेत्सत्यं विभक्तभ्रातॄणां वृद्धिकामानां पृथक्सपिं
डीकरणमुक्तं तत्र काम्ये सपिंडीकरणे कृते प्रेतत्वनिवृत्तेर्ज्येष्ठस्य प्रेतशब्दरहितपुनरावृत्तिविधिर्युक्तएवेतथा
हिताग्नेः कालत्रयमेव पूर्वमुक्तं तादृशाश्चेत्कनिष्ठस्ततः पिंडपितृयज्ञमुख्यकालपरमुशेधेन कालस्य चानु
पादेयत्वात्तुर्थ्य ज्येष्ठस्योपादेयत्वादुपादेयानुपादेयांगविरोधेचानुपादेयांगबलीयस्त्वस्य मीमांसकैः

पंचमाध्याये उक्तत्वात् दशोपि विषये कनिष्ठस्याधिकारात्तत्कृतेन प्रेतत्वनिवृत्तेर्ज्येष्ठस्य प्रेतशब्दवि
नापुनरावृत्तिर्युक्तेति एवं ज्येष्ठैककर्तृकत्वे सपिंडीकरणस्य स्थिते कश्चित्तदपवादः स्मर्यते तदाहलौ
गहारीतः भ्राता वा भ्रातृपुत्रो वा सपिंड शिष्यएव वा सहपिंडक्रियां कृत्वा कुर्यादभ्युदयं ततः अत्रशूलपाणिमते
अभ्युदये हि देवतात्वयोग्यतासिध्यर्थं सपिंडीकरणं अतःसपिंडीकरणापनेयप्रेतभावाय अभ्युदयिके देवैस्ता
ल्लादृगाभ्युदयिकोपस्थितौ सपिंडीकरणं कार्यं भ्राता चेति वाक्यमपि भ्रात्रपत्यसंस्कारेषूपपन्नं तत्र स्वपितृभ्यः
पितादद्यात्सुतसंस्कारकर्मसु पिंडानोद्वहनात्तेषां तस्याभावे तु तत्क्रमादिति कात्यायनेन भ्रात्राद्यपत्यसंस्कारे सं
स्कार्यपितृभ्यएव श्राद्धोक्तेः अतोयस्य कस्यचित् सपिंडस्य गृहे आभ्युदयिकश्राद्धार्थं येन केनचित्तत्सपिंडेन तस्य
पितुः सपिंडनं कार्यमिति दुराचार एव दाक्षिणात्यानामिति तदेतदयुक्तं कालीय वाक्यस्य हिन्नायव्याख्याहे
माद्रौ दौकृतात तस्यपितुरभावेन क्रमात् तत्र पित्रभावे यः क्रमः पिते वोपनयेत्तु तदभावे पितुः पिते स्यादि पि
तापितामहो भ्राता सकुल्यो जननी तथा कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः इत्यादि श्लोकेन क्रमेण पिता

७० त्मातामहादिः स्वपितृभ्योदद्यात्संस्कार्यपितुः पित्रादिभ्य इति। तदा भ्राता वा भ्रातृपत्नी वेति हारीतवाक्या
त्पितामहादिपित्रादिभ्य आभ्युदयिकदेवताभ्यो व्यतिरिक्तस्यापि सपिंडीकरणं सिध्यति। तेन दाक्षिणात्याचारउप
पन्न एव। नन्वेवमप्यस्मिन्वाक्ये सह पिंडक्रियां कृत्वा कुर्यादभ्युदयं ततः इति तत्र प्रश्नस्य येन समानकर्तृकत्वावग
मान्न तस्य पुत्रादिरन्य एव सपिंडीकरणं करोत्यन्यश्च सपिंड आभ्युदयिकमिति दाक्षिणात्याचारे किंमूलमिति
चेदस्त्विदं चिंतांतरं त्वस्मन्मतं तु निरस्तं अथ स्वमतमुपपद्यसिततः शृणु। भ्राता वेति वाक्यादिदं तावत्सिद्धं आभ्यु
दयिकदेवताभूतस्यापि सपिंडस्य सपिंडीकरणं विनाभ्युदयिके नाधिकार इति तेनाभ्युदयिके देवतात्वयोग्यता
र्थता तावत्सपिंडीकरणस्य नास्ति किंतु कर्तुरेव यो यतार्थं तत्तस्य समानकर्तृकत्वं क्लोक्तम विवक्षित्वा सपिंडस
पिंडीकरणे कृते एव सपिंडस्याभ्युदयिकेधिकार इति हारीतवाक्यार्थः तत्र प्रश्नस्य यस्तु कदाचित्समानकर्तृकस्तेना
प्युपपन्नः यथा श्राद्धानि षोडशादत्वा नैव कुर्यात्सपिंडतामिति तत्र संपराकेणोक्तं यदि कनिष्ठेन षोडशश्राद्धानि
कृतानि ततो ज्येष्ठः सपिंडीकरणमेव कुर्यादिति किंच किंचिन्निर्वर्त्य दत्तं चतुर्मासिकानि ततस्तेन। अयातया ७०

यं मरणं न भवेत्पुनरभ्युदय इति कात्यायनेनाभ्युदयिकोत्तरषोडशश्राद्धनिषेधात्। शातातपेनोक्तं सपिंडीकरणा
दर्वागपकृष्य कृतान्यपि। पुनरप्यपकृष्यंते वृद्ध्युत्तरनिषेधनादिति। अत्र च द्वावप्यपकर्षौ सपिंडीकरणसमान
कर्तृकौ प्रतीयेते। तेन सपिंडीकरणाधिकारिणि पुत्रादौ सति भ्राता वेति हारीतवाक्योक्तकर्तृतरविधिर्न प्रवर्त
त इति हारीतवाक्योक्तस्तु यदह्नि क्रियापद्यत इत्येन तुल्यमूलकः कालविधिः प्रवर्तत एवेति पुत्रादिरेव सपि
डीकरणाधिकारी षोडशश्राद्धापकर्षं कृत्वा सपिंडीकरणं च कुर्यात् सपिंडकर्तृकेप्याभ्युदय इति सिद्धं दाक्षिणात्याचा
रस्य सप्रमाणकत्वमित्यलं भूयसा। इति सपिंडीकरणविषये निर्णयः अथ पिंडदानाधिकारिनिर्णयः शंख
कात्यायनौ। पितुः पुत्रेण कर्तव्या पिंडदानोदकक्रिया। पुत्राभावे तु पत्नी स्यात्तदभावे सहोदरः। पुत्रग्रहणं पौ
त्रप्रपौत्रयोरुपलक्षणं। तथा च विष्णुः पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसंततिः सपिंडसंततिर्वापि श्रा
द्धार्हो नृप जायते। प्रपौत्राभावे चेद्दौहित्रादयः तथा च मनुः सुतश्च प्रतिनिधानार्थः क्रियालोपान्मनीषिणः प्र
शयत्यन्यः पिंडशेषहरस्तेषां पूर्वाभावे परः परः ततः पत्नी तदभावे दौहित्रः तथा च स्मृतिसंग्रहे। पुत्रः कुर्या

७१ सितुः श्राद्धं पत्नी च तदसन्निधौ· धनहार्यथ दौहित्रस्तदभावे तत्सुतः· तदभावे स्वसा स्वसैव अपंच: भ्रातुः
सहोदरो भ्रातेत्यादि· भ्रातुः सहोदरो भ्राता कुर्याद्दौहादि तत्सुतः· तत्सुत्वे सोदरो भ्राता सहोदरी भ्रातेत्यादि·
भ्रातुः सहोदरो भ्राता कुर्याद्दाहादि तत्सुतः· तत्सुत्व सोदरो भ्राता तदभावे तत्सुतः· अत्र धनहारिण एव
दौहित्रस्याधिकार उक्तोपि केवलस्यापि भविष्यत्पुराणे उक्तोधिकारः यथा अनन्योपि सुतः पितुः कुर्यात्क्रि
यां नृप· उदकाद्यां महाबाहो दौहित्रोपि तथार्हति· व्यवहितभ्रातृपुत्रस्याप्यभावे पिता तदभावे माता तदुक्तं
मत्स्यैव· उत्तमं बान्धवं प्रेते पिता भ्राता तथाग्रजः· जननी वापि संस्कुर्यान्महदेदनोन्यथा भवेत्· इह पितुरनं
तरं भ्रातुः पाठेपि पाठक्रमो न कल्प्यते· पूर्वकायदौहित्रानुंतरं भ्रातुस्तत्सुतस्य सोदरस्यैवं क्रमस्यादृष्ट
श्रुतसाबलीयस्त्वाचनमात्· अत एवाग्रे पितामातेति क्रम उक्तः यस्तु कात्यायननिषेधः अपुत्राया· पति
ईघासपुत्रायाः नतु कुचित्· नपुत्रस्य पिता दद्यान्नानुजस्य तथाग्रजः इति तत्स्नेहविशेषाभावे· अत ए
व बौधायनः अपि स्नेहेन कुर्यात्तां सपिंडीकरणं विना· गयायां तु विशेषेण ज्यायानपि समाचरेत्· मातु ७१

रभावे स्नुषा ततो भगिनी सहोदरा क्रमेण· ततस्तत्पुत्र्या सोदरा तनैस्तथैव क्रमेण ततस्तत्सुताः तदाह कात्यायनः
अनुजो वा अग्रजो वा पि भ्रातुः कुर्वीत संस्क्रिया· ततस्तु सोदरस्तद्वत्क्रमेण तनयस्तयोः। तयोः सोदरासोदर
योर्भगिन्योः तदभावे सपिंड समानोदकमातृसपिंड मातुलादि तत्समानोदक ततआसुरादि विवाहोढा
स्त्री क्रमेण· तदुक्तं स्मृतिसंग्रहे· पत्नी भ्राता च तत्पुत्रः पितामाता स्नुषा तथा· भगिनी भागिनेयश्च सपिं
डः सोदकस्तथा· असन्निधाने पूर्वेषामुत्तरे पिंडदाः स्मृताः· विष्णुपुराणे सपिंडसंततिरस्य स्यानंतरं तेषामभा
वे पूर्वेषां समानानां उदकसंततिः मातृपक्षस्य पिंडेन संबद्धा ये जलेन वा· कुलद्वयेपि चोत्सन्ने स्त्रीभिः का
र्या नृपक्रिया· तत्संघातगतैर्वा॥ पि कार्या प्रेतस्य संक्रिया· उत्सन्नबंधोरिक्थेन कारयेदवनीपतिरिति· तद
भावे शिष्य। लिंगाचार्याः क्रमेण: गौतमः पुत्राभावे सपिंडा मातृसपिंडाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचा
र्यौ· तदभावे जामाता सखा च क्रमेण· तदुक्तं मार्कंडेयपु॰ सख्युरुरसंस्तं पधोश्च सखापिश्वशुरस्य च जामाता
स्नेहतः कुर्याद् अखिलं पैतृधिकं· तदभावे स्त्रीहारी धनहारी च क्रमेण· स्त्रीहारी धनहारी च कुर्यात् पिंडादेक क्रि

७२ यामिति कार्म्यास्मिन्निवचनात्· विष्ण्वापस्तंबौ च· पश्चार्थहरः सपिंडो पाति· धनहारी यदि न करोति तदा
राज्ञा कारणीयः· सोपि सजातीय एव न विजातीयो धनहरोपि· तदुक्तं मार्कंडेयपु० सर्वाभावे चेन्नृपतिः कार
येत्तस्य रिक्थतः· तज्ज्ञातीयैर्नरैः सम्यक् दाहाद्याः सकलाः क्रियाः· सर्वेषामेव वर्णानां बांधवो नृपतिर्यतः· अत्र
र्म्यास्मिन्निवाक्ये धनहारिग्रहणस्य विषय उक्तः· रंकापूर्वकालादर्शे· ननु पुत्रपत्न्यादयो वनापतिपर्यंता और्ध्व
देहिकं कुर्युरित्युक्तं तत्र यो दायहरः स कुर्यादुतान्योपि वलिउत यो दायहरः स कुर्यान्नान्यः तदाह्यापस्तंबः पिंड
दो अंशहरश्चैषां पूर्वाभावे परः परः· विष्ण्वापस्तंबौ च· पश्चार्थहरः सपिंडो पाति· ननु वित्ताभावे कथं· उत्तरं। दाया
भावेपि पुत्रपत्नीभ्रातृतत्सुतशिष्यमातृपितृभिरवश्यं श्राद्धं कर्त्तव्यं· तदुक्तं मार्कंडेयपु० पुत्रो भ्राता च तत्सुतः प
त्नी माता तथा पिता· वित्ताभावेपि शिष्यश्च कुर्युरौर्ध्वदैहिकमिति· विष्ण्वापस्तंबौ· पुत्रः पितृवित्ताभावेपि
दद्यादिति· पुत्रग्रहणं द्वादशविधपुत्रपरं· भ्रातृग्रहणं सोदरासोदरोपलक्षणं· तत्सुतग्रहणमपि उभयपुत्रोप
लक्षणमिति· न्याय्यमस्याशयं स्नेव मुन्नयामो चयं खलु· स्त्री हारी धनहारी सा दिवाक्यमस्याभाव इत्यनुक्ताव पिव ७२

सक्रमाणं पुत्रपत्न्यादीनामभावेऽंतेनुवादरूपमिति न्यायात् प्रवर्त्तते· अन्यथा पुत्रादपि प्रथमं प्रवर्त्तेतेति
शंका केन वार्यते· अंतनिवेशे च सति सर्वाभावेन्यन्नृपतिः कारयेत्तस्य रिक्थत इति प्रयोजकव्यापाराविधेः प्रयो
ज्यव्यापाराक्षेपप्रसंगे धनहारिवाक्येनापेक्षापूरणादाक्षेपनिरोधः पशुसोमाधिकरणन्यायेन युक्त एव अतो
पि पुत्रादयुक्तनिवेशः· नन्वेवं तर्हि धनहारिवाक्यस्य पुत्रादिषु वच्छक्रमे यत्प्रवृत्तौ वित्ताभावेपि पुत्रादयः कुर्युरि
त्यपवादः किमर्थः· उच्यते· अस्य वाक्यस्य वत्सक्रमस्य वोपलक्षणत्वेन धनहारिवाक्यांतनिवेशसाधकत्वेव· न्या
यप्राप्तानुवादत्वाच्चैनैवापवादरति· विधिनैवानेन व्याधादंतनिवेशो धनहारिवाक्यस्य· यद्यपि परिगणितमात्र
विषयत्वाद्विधायकतया पवादत्वाय मिति· एवं परः कालादर्शग्रंथस्तदाप्येवं परिहारः· धनहारिवाक्यस्य क्रमसंक्र
माध्यायांतनिवेशवत् क्रमे प्रविलद्बाधेन प्रवृत्तिरिष्टैव तेन पुत्रपत्न्यादिषु उत्तरस्य धनहारिणोपि
नाधिकारो बोध्यस्तेन क्रमबाधप्रसंगात्· इदं तु बोध्यं तत एव द्वयोर्मातुलस्योर्द्वयोर्दौहित्रयोश्च यद्येको धनहरो
ऽपरश्च न तदा धनहर एव कुर्यादिति· एवं तु पुत्रादिष्वपि प्रसक्तं मार्कंडेयवाक्येनापवादः क्रियते· परेकः पुत्रो

७३ धनहरो परश्चैतेषां वत्स्यादयमेतद्वाक्यपरिगणितानामृतदापि सर्वे एव कुर्युर्न धनहरणं चेति नन्वेवम
प्युक्तपशुसोमाधिकरणन्यायेन प्रयोजकव्यापारारब्धप्रयोज्यव्यापाराक्षेपनिरोधकत्ववशोत्तान ए
एव विशेषः स्यात् धनहारित्वाख्यस्येति चेन्नैवं अनेकेषु दौहित्रेषु धनहरणेनैव स्यादिति यमार्थेनैव सता
धनहारित्वाख्येन प्रयोज्यव्यापाराक्षेपनिरोधोपि भवतीति नानेकार्थतापत्तिरापन्नापि विरुध्यते कु
तृविधिता धनहारित्वस्य सर्वाभावेपि नियमविधिरेवानेकेष्वपि च दौहित्रेषु मातुलेषु नियमविधिरेवे
ति न विधिवैरूप्यमपीति नवानेके दौहित्रा मातुला वा युगपन्नियमेन प्रसक्ता येनात्र परिसंख्या सर्वाभा
वे च नियमविधिरिति वैरूप्यं स्यात् पुत्रकृतत्वभावापपत्या दौहित्रादीनामप्यनेकेषां मध्ये ज्येष्ठसन्नि
हितादेरेकस्यैवम सक्तौ कस्य त्यपेक्षायां धनहरस्यैवेत्येव दौहित्रादिष्वपि नियमविधित्वानपायादिति
ननु विभक्तयोः पुत्रयोर्युगपन्नियमेनैव कर्तृता प्रसक्ताएवं तादृशयोर्दौहित्रयोः तथानेकदुहितृजा
नां दौहित्राणां तत्र धनहारित्वं परिसंख्या स्यात् अविभक्तेषु तेकदुहितृजेषु च ज्येष्ठनियमविधि ७३

रिति वैरूप्यापरिहारः उच्यते पुत्रादिवाक्यानि संलोकवचनो बाहितसंनिच बहुवचनं वं लितत्राविभ
क्तानामेकत्वविभक्तानां तु पृथक्पृथगिति व्यवस्थातः प्रागेव धनहारित्वाख्यनियमपरतोलिनदो
षः नन्वेवमपि पुत्रवादे ज्येष्ठपुत्रदौहित्रादेरधनहरत्वात्तत्कनिष्ठस्यापुत्रवादे धनहरत्वे तस्यैवाधिका
रोनिष्टापद्यतेति चेन्न अत्र धनहारिसमभिव्याहारादवैधधनहरस्यैवाधिकारबोधनात्
तस्मात्पंगुपंग्वोर्द्वयोरप्यधिकारः सुरूपः एवं दौहित्रयोर्भ्रात्रोस्तत्पुत्रयोरपि ज्ञेयं सच सर्वाभावे
पितृजेवं धनभागितानदतिरिक्तस्यावैधधनहरत्वादेवाधिकारः सुस्थित इति तदनेनन्यायेन पुत्रो
भ्रातेति पूर्वोक्तमार्कंडेयवाक्येन वापवादास्तु भ्रात्रादिषु धनहारित्वं कुत्सवाधेनतद्बाधेनचोभयु
थापि मप्रवर्तत इति सिद्धं भवन्तीपुलस्त्यो विष्णुपुराणे एवमपत्य्रेधाविभज्याधिकारिव्यवस्था
क्ता पूर्वाः क्रियामध्यमाश्चतथा चैवोत्तराः क्रियास्त्रिप्रकाराः क्रियास्तेतास्तासां भेदान् शृणुष्व मे
आदाहाद्दादशाहाच्च मध्ये याः स्युः क्रियामताः पूर्वास्तामध्यमामासि मास्येकोद्दिष्टसंज्ञितोः प्रेतपि

तत्त्वमापन्ने सपिंडीकरणादनु॰ क्रियंते याः क्रियाः पित्र्याः प्रोच्यंते ता नृपोत्तमः पितृमातृसपिंडैस्तु
समानसलिलैस्तथा॰ तत्संघातगतैश्चैव राज्ञा वा धनहारिणा। पूर्वाः क्रियामध्यमाश्च पुत्राद्यैरेव
चोत्तराः दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथेति॰ तत्संघातगतैरेकसार्थगतैः सर्वाभावे च नृपतिः
कारयेत्तस्य रिक्थतः तज्ज्ञातीयैर्नरैः सम्यग्दाहाद्याः सकलाः क्रिया इति पूर्वोक्तमार्कंडेयपुराणवचने स
जातीयस्यैव क्रियाधिकारोक्तेरात्तश्च प्रयोजककर्तृतायाए वोक्तेस्तदेकार्थतयैव राज्ञा वा धनहारिणेति व्या
ख्येयं॰ राज्ञा धनहारि द्वारा कारणीयमिति व्यधिकरणतृतीयांगीकारेणेति॰ सपिंडीकरणे तु पुत्रसद्भावे तद
सन्निधाने स एवाधिकारी तिच्चिरकालादपि तत्कुर्यान्नान्यो भ्रातृपुत्रादिर्यथाकालमपि॰ तदुक्तं वायुपुराणे॰
श्राद्धानि षोडशादत्त्वा कुर्यान्न तु सपिंडनं॰ प्रोषितो वसिते पुत्रः कालादपि चिरादपि॰ इदं॰ यत्तु मिताक्षरायां
इदं च प्रेतश्राद्धसहितं सपिंडीकरणमसत्स्वासितो पुत्रादिभिर्नियमेन कर्त्तव्यमिति ग्रंथे आदिग्रहणं तत्सुत्रा
सद्भावेन्येषामप्यधिकारायन त्वसन्निधौ॰ इदं च विशेषविधित्वात्सपिंडीकरणविषये पुत्राभावे तु पत्नी ७४

स्यादित्यादिसामान्यविधेर्बाधकं यान्यपि काश्यादिषु गयायां च प्रेतकार्ये तु पत्स्वतं॰ सपिंडैरसपिंडै
र्वा सुतैरेव कृतं भवेदित्यादिवचनानि तानि तावद्धेमाद्रिस्मृत्यर्थसारकालादर्शमदनपारिजातादिनिबंधे
धनादत्त्वादनाकराण्येव साकरत्वे पि यात्रातत्त्वतीर्थप्रेतकार्यप्रशस्तमित्येतावन्मात्रपराणि॰ यद्वा इमानि
सुताभावविषयाणि तस्येषु सुतसत्ता प्रतीयते यत्सुतः सुतैरेव कृतं भवेदिति सुतासत्त्वविषयत्वेऽसु
तसत्त्वविषयत्वं तु वाच्यमिति भिन्नविषयत्वमेवेति भ्रातृपुत्रादिना कृतमपि सपिंडीकरणमनधिका
रिकृतत्वादकृतप्रायमेवेति पत्न्यादिकृतमपि पुनः पुत्रेण वर्त्तनीयं किंच यदा पुत्रेष्वपि कनिष्ठेन
कृतं सपिंडीकरणं ज्येष्ठमात्रकर्तृकत्वाज्ज्येष्ठेन पुनर्वा वर्त्तनीयं तदा पुत्रातिरिक्तकृतं पुत्रेण वर्त्तनी
यमिति किमु वक्तव्यं॰ ज्येष्ठमात्रकर्तृकत्वं च सपिंडीकरणस्य यवीयसा कृतं कर्म प्रेतशावं विहाय तु॰ त
ज्ज्यायसापि कर्त्तव्यं सपिंडीकरणं पुनरिति ज्येष्ठकर्तृकपुनरावृत्तिविधानबलादेवतावदवसीयते॰
तथा मदनपारिजाते एकादशाहादि कर्तुं ज्येष्ठेनैव कर्त्तव्यमित्युक्त्वा लिखितादेकादशाद्याः क्रमशो ज्ये

ष्ठस्य विधिवत्क्रिया इति प्रचेतोवाक्यात्। अत एव यदि षोडशश्राद्धानि कनिष्ठभ्रात्रादिना कृतानि तद्
सपिंडनमेव कुर्यादिति अपरार्के। नन्वेवं सपिंडीकरणस्य ज्येष्ठमात्रकर्तृकत्वे कुतस्त्याय वायसः कर्तृताय
दनुधादेन ज्येष्ठस्य पुनरावृत्तिर्विधीयते तेन न्यायभ्रमेण यवीयसः कर्तृताप्रसक्ता भ्रमेण कृतेपि प्रेतत्वनिवृ
त्त्यभावात् एतत् श्राद्धं विहाय ज्येष्ठस्य पुनरावृत्तिविध्यनुपपत्तेरिति चेन्नैवं। आहिताग्नेः कनीयसो जीवत्पि
तृकतया प्रेतधर्मोर्थ्यपिंडपितृयज्ञस्य जीवत्पितृकाधिकारिकः होमान्तादिपक्षाद्धोमान्तपक्षस्याप्रवृत्तेः
प्रवृत्तेर्दशाहोत्तरदर्शे वश्यकर्तव्यपिंडपितृयज्ञानुरोधेन सपिंडीकरणेधिकारात्। तदाह कात्यायनः। ए
कादशाहमतिवर्त्य पूर्वं दर्शाद्यथाविधि। प्रकुर्वीताग्निमान्विप्रो मातापित्रोः सपिंडताम् इति। तथा। नास
पिंड्याग्निमान्पुत्रः पितृयज्ञं समाचरेत्। न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम् इति प्रजापतिवचना
त्। इमेव वाक्ये न ज्येष्ठमात्रविषये तेन न्यायगत्याहिताग्निकनिष्ठेपि प्रवृत्ते। अन्यथा दर्शस्य पिंडपितृयज्ञस्या
निर्वाहात्। नन्वेवमेकादशाद्यमारभ्य पूर्वो दर्शात् इति प्रचेतोवाक्यादेकादशाहमासिकेष्वपि सपिंडीकरणव

ज्येष्ठमात्रकर्तृताप्रसंग इति चेन्मैवं। एकादशाहमासिकेषु सगोत्रकनिष्ठपुत्रादिकृतेषु ज्येष्ठस्य सपिं
डीकरणवत्पुनरावृत्तिविधानाभावात्। अतः सति संभवे ज्येष्ठ एवैकादशाहाद्यपि कुर्यात् इति एकादशाह
याद्यस्यार्थ इति। तस्मात्पितुः पुत्रेण कर्तव्या पिंडदानोदकक्रिया इति सामान्यवाक्ये नैव पुत्राधिकारः प्राप्तः। पु
त्राभावे तु पत्नीति देशान्तरस्थित्या नाशाद्वा असन्निधिरूपेऽभावे सामान्यतः पत्न्यादेः प्राप्तोधिकारः तस्य प्रो
षितावसितेपुत्रः कालादपि चिरादपानि सपिंडीकरणविषयेण देशान्तरकृतासन्निधिविषयेण च विशेषविधि
नापवादः कृतः। पत्न्यादेः पुत्रनाश एवाधिकारः सपिंडीकरणे। असन्निधौ तु नेति तत्कृतं सपिंडीकरणं न्याय
तो वचनतो वानधिकारिणा कृतमिति पुत्रेणावर्तनीयं। एवं मासिकापकर्षोप्यावर्तनीयः। तत्रापि सपिंडीकर
णाधिकृतस्यैवाधिकारात्सपिंडनार्थत्वे तस्यापकर्षः। अत एव प्रोषितावसितेतरस्य तस्यापकर्षविध्येकवाक्यतया प्या
कर्षस्य सपिंडीकरणाधिकृताधिकारिकताबोधनायैव। एवं ज्येष्ठवाक्यमपि तदसन्निधौ कनिष्ठाद्यधिका
रापवादायैवेति तत्कृतमपि ज्येष्ठेन सापकर्षमावर्तनीयं। आहिताग्नेस्तु कनिष्ठस्य पिंडपितृयज्ञानुपपत्ति

७९ न्यायसहकृतेन एकादशाहं निर्वर्त्य तस्यादिवाक्येनाधिकारात् कृते समासिकाकर्षे सपिंडीकरणे
ज्येष्ठेन पुनः सपिंडीकरणमात्रं वचनबलात् तस्य तेन श्राद्धे विहायावर्त्तनीयं। एकादशाहश्राद्धं तु पुत्रातिरि
क्तेनापि कृतं नावर्त्तनीयं तेन तरां कनिष्ठकृतं नतरामाहिताग्निकनिष्ठकृतं इति। अभ्युदयार्थे त्वाकर्षे कनि
ष्ठेन कृते पुनर्ज्येष्ठेन षोडशश्राद्धानि सपिंडीकरणं चावर्त्तनीयं। सपिंडीकरणादर्वाक् पृथक् कृतान्य
पि पुनरप्यपकृष्यते उत्तरनिषेधनादिति शायायनिर्णयं तदुत्तरं षोडशश्राद्धनिषेधोक्तेः तथा यात
पातेमरणनभवेत्तु नरस्य तु इति सपिंडीकरणस्यापि तदुत्तरमनुष्ठानेनिंदाविशेषोक्तेः अत एव ज्येष्ठमा
त्रकर्तृकत्वबाधवत्पुत्रमात्रकर्तृकत्वबाधोप्यभ्युदयेभयलिलैन पुत्रातिरिक्तेनाप्यभ्युदयार्थे आक
र्षे कृते न पुनर्ज्येष्ठस्यानुष्ठानं शिष्टाचारोप्येवमेवेति। नन्वपुत्रादेरेवचोत्तरादुस्यत्र दौहित्रेर्वैसप्युक्तेः पु
त्रपौत्रप्रपौत्राणामसन्निहितानामपि यथासन्निहितपत्न्यपवादेनाधिकार एवं दौहित्रस्यापि प्रस
ज्येत। एकतायेपुत्रस्य वन्हिर्देशादितिचेन्मैवं। नेदं प्रोषितावसितेपुत्र इत्यनेनैकार्थं। नस्याश्वात्स्यनाशे ७९

सन्निधौ च पूर्वमध्यमयोरुत्तरक्रियासु च सामान्यतः प्राप्तां पत्नीमपोद्य तदसन्निधौ उत्तरक्रियायां च विशेषे
ण पुत्रनियमः क्रियते प्रोषितावसिते इति वद् सन्निधिप्रतिपादकाभावात्। दौहित्रनाशासन्निधौ स्तुनै
व प्राप्तापत्नीयां सन्निहितामपोह्यासन्निहितोपि दौहित्रो नियम्येत। तस्मात् सन्निहितपत्नीसत्वेऽसन्नि
हितदौहित्रस्य पुत्रवदधिकारापादनमयुक्तं इति। एतेनैव एवमपि पुत्रदौहित्रयोस्तुल्यबलवन्निर्देशोप
पादनमनिष्टापादनं च परास्तं। यथा पुत्राभावे औरसाभावेऽन्याः पत्न्याः सन्निधावप्यसन्निहितोपि पुत्रोऽधिक्रियते एवं
दौहित्राभावे उक्तस्य भ्रातुः सन्निधावप्यसन्निहितोपि दौहित्रोधिक्रियत इति प्रोषितावसितवदसन्नि
धिप्रतिपादकाभावादेव पुत्रदौहित्रयोरेवं विषयो व्यानंगीकारादिति कस्तर्हि स्यार्थः उच्यते। उत्तराःक्ष याह
माबास्या महालयगयादयः पुत्रादौ दत्तपुत्रपौत्रप्रपौत्रैरेव दौहित्रैर्वा नान्यैः सपिंडादिभिरपि। न चैवं पत्नी
भ्रातृतत्पुत्राणां कथं प्राप्तिः नपुत्राभावे तु पत्नी स्यादित्यनेन भ्रस्य पुत्राद्यैरित्यनेनोत्तरक्रियासु बाधात्।
किंतु पुत्रापुत्रवत्पत्न्यास्तनेन पुत्राभावे तु पत्नीत्यनेनैकार्थ्यं तस्मात् शेषं सन्निधौ च प्रवृत्तेः। अपुत्रेत

स्यासन्निधाच प्रवृत्तेः पितृव्यभ्रातृसपत्नमातृमातुलानामपि सांवत्सरिकमेवाह भोजात्कर्ण्यः पितृव्यभ्रा
तृमातुलानां पुत्राणां तथैव च । मातामहस्य पुत्राय श्राद्धादि पितृवद्भवेदिति । पितृवदित्यावश्यकत्वार्थ
मिति हेमाद्रिः न चानेन पत्न्यां द्वयामावास्यादेरपि प्राप्तिः क्षयाह प्रकरणे स्याम्नानात् । दाक्षिणात्यास्तु
पितृवदित्यविशेषश्रवणाद्दावश्यकत्वावत्वार्वणतायाप्यपत्ति देशे मिच्छन्तः शिष्टाचाराज्ज्येष्ठानामपु
त्राणामपि पितृव्यादीनां पार्वणमिच्छंति । भ्रातुरपि ज्येष्ठस्यो वावश्यकमाह मनुः प्रतिसंवत्सरं कार्यमा
तापित्रोर्मृतेहनि । पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि ॥ इति । तत्र तेपुत्रा धौरित्यनेन संग्रहीताः दौ
हित्रस्तु सपुत्रमातामहस्यापि । पितरापत्रपूज्यतेनत्र मातामहाअशिअविशेषेण कर्तव्यं विशेषा स्मरकंन
जेनूद्द इतिधौम्यवचनेनति स्मश्राद्धामावास्यादावे वावश्यकुर्यात् । अपुत्रमातामहस्य तुवार्षिकमप्य
वश्यकुर्यादिति । मौंज्नत्वपुत्रेपितृव्यादिनामेकोद्दिष्टमेवनियतं । कात्यायनः पितृव्यभ्रातृमातृणामेको
द्दिष्टं सदैव तु ॥ अत्रिः भ्रात्रे भगिन्यै पुत्राय स्वभर्त्रे मातुलाय च । पितृव्यगुरवे श्राद्धमेकोद्दिष्टं नपार्वणं ॥ ७७

आपस्तंबः अपुत्रा येमृताः केचित्स्त्रियो वा पुरुषास्तथा । तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणं । मित्र बंधु
सपिंडेभ्यः स्त्रीकुमारीकुमारीभ्य एव च । इत्यादेमल्लिकं श्राद्धं सांवत्सरमतोन्यथा । प्रचेताः सपिंडीकर
णादूर्ध्वमेकोद्दिष्टं विधीयते अपुत्रा येमृताः केचित्स्त्रियो वा पुरुषास्तथा । तेषामपि च देयं स्यादेकोद्दिष्टं
न पार्वणं सुमंतुः सपिंडीकरणादूर्ध्वं यत्र यत्र प्रदीयते । भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च । मित्राय गु
रवे श्राद्धमेकोद्दिष्टं न पार्वणं । अत्र कात्यायन गर्गसुमंतुवाक्यानां महालयतीर्थप्राप्त्यादिविषयत्वमुक्तं
प्रयोगपारिजाते अत्रिप्रचेतोवाक्ययोरप्येष विषयः । न चैते प्रार्षिक विषये आपस्तंब वाक्यस्यैव हेमाद्रि
णा वार्षिक प्रकरणाम्नानस्य विशिष्योक्तेः आपस्तंबवाक्यं तु युक्तमाद्य प्रमीतानामेव कार्यासपिंडने तस्य
पितृभ्रातृभर्तृव्यतिरिक्त पितृव्यभ्रात्रादिविषयताया कारणे दर्शादावुक्तत्वान्न वार्षिकविषयं योज्यं अ
नोदाक्षिणात्यशिष्टानां भ्रात्रादि वार्षिक पार्वणानुष्ठानं न शास्त्र विरुद्धं । न चैवमपि स्वपुत्रस्य पु
त्रादेर्वार्षिक पार्वणानुष्ठानं शास्त्र विरुद्धमेवेति चेन्न । सपिंडीकरणाभावे हि आपस्तंब वाक्ये नैकोद्दिष्ट

७८ नियमाच्चास्य विरोधः स्यादस्ति तु सपिंडीकरणं व्युत्क्रममृतत्वश्चादेरपि । व्युत्क्रमाच्च प्रमीतानामिति तु
नादर्तव्यं । अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्विति निषेधात् । इति श्रीमदित्यादि । क्रियाधिकारि
क्रमसंशयोद्धेदपरिच्छेदः ॥ पिंडपितृयज्ञे आश्वलायनसूत्रं वीरं मे दत्त पितर इति पिंडानां मध्यमं पिंडमाहाय
पत्नी प्राशयेदाधत्त पितरो गर्भं कुमारं पुष्करस्रजं यथायमरपा असदिति । अग्निप्रणीते वायस्य यागं तु स्त्रका
म्याभावः सप्राणो यान्महारोगेण वाभिभूतः प्राश्नीयादन्यतरां गच्छतीति । अस्य नारायणवृत्तिः वीरं मे द
त्तेति मंत्रेणादाय तमेव मध्यमं पिंडं पत्नीं प्राशयेत् । पत्न्येव मंत्रं ब्रूयादाधत्तेति । अग्निवतो प्रक्षिपेदित्यर्थः । अग्नि
प्रणीते वाक्षिप्यापरशयेत् । यस्य वैश्यादिभार्या तु रभिन्नो निर्निमित्तको दोषाभावो पस्तु सर्वे पिंडौ तरो प्राश्ना
यात् । महारोगेणोत्थाद्यक्षयकुष्ठादिना शक्यप्रकारेण पीडितः प्राश्नीयादिति पूर्ववच्च मंत्रपूर्वं णास्य संबंध
निवृत्त्यर्थं । तेन नैर्ऋत्यतरं पिंडं स्वयं भवतीति । अन्यतरां गतिं गच्छतीत्युपमर्थ सपुत्रा वा रोगो भवति प्रियते वेति ।
अत्रैव विषये नाहिताग्नेः पिंडपितृयज्ञपार्वणयोर्य निषेधविधाने स्तु परिशिष्टं । अथ पिंडान्नमस्कृत्य म ७८

ध्यमं वीरं मे दत्त पितर इत्यादाय आधत्त पितरो गर्भं कुमारं पुष्करस्रजं । यथायमरपा असदिति पुत्रकामा पत्नी प्राशये
न्नैतदशुभश्राद्धे प्रकुर्यादिति स्थितरायति प्रणीते म्नो का प्रासे दृवे या भ्रात्मणापवादश्चादिति । अत्र पुत्रकामामित्येनेन प
त्न्या अधिकाराय तिराधिकारस्य चशास्त्रफलप्रयोक्तृत्वानीत्यायात्कर्तृत्वं विनानुपपत्तेः प्राशयेदिति णिचो
विपरिणामेन प्रयोज्यव्यापारएव पत्नीकर्तृको विधीयते प्राश्नीयादिति । तथा च यमः यत्तथा मध्यमं पिंडं पत्नी प्राश्ना
ति यथाविधि । पुत्रकामा सा पुत्रं तां कुर्वंति प्रपितामहाः देवलः तेषां वा मध्यमं पिंडं पुत्रकामा हि भक्षयेत् । पितृप्रसादा
द्ध्रुवं पुत्रं सा लभते हि महागुणं । पुत्रपत्न्यो गुणान् दर्शयतो मनुबृहस्पती । पतिव्रता धर्मपत्नी पितृपूजनतत्परा । म
ध्यमं तु ततः पिंडं मश्नीयात्सत्सुतार्थिनी । आयुष्मंतं सुतं सूते यशोमेधासमन्वितं । धनवंतं प्रजावंतं धार्मिकं सात्त्विकं त
था । पत्न्या एव गुणं दर्शयंतौ शंखलिखितौ । पत्नी वा मध्यमं पिंडमश्नीयादार्तवा । ऋतुस्नातेति हेमाद्रिः हारीतः या
पत्नी पुत्रकामा स्यात् मध्यमं पिंडमश्नुयात् । प्राशुरापस्यो भविधिनासतस्याः पुत्र दः स्मृतः प्रजापतिदृष्टमंत्रपूर्वकं भक्ष
णं प्राजापत्यविधिरिति हेमाद्रिः विष्णुधर्मोत्तरे । मध्यमं पुत्रकामा तु पत्नी पिंडं हि भक्षयेदिति । आदायेतिस्वर्वतं नु इति छि

७९ दः स्य पत्नुरिखिलामित्यध्याहारेण योज्यः अथवा प्राशयेदित्यत्र प्रकृत्यर्थापेक्षया कथंचित्समानकर्तृकत्वमेव तेषयः
घाप्रर्थाज्यव्यापारएव विधेस्तात्पर्यान्न समानकर्तृकत्वहानिः इदवादनं भर्तृकरादेवनतुभूमेः भर्तृकर्तृकस्य पत्न्यै
दानस्य विहितत्वात्· तथा च यमः अश्वमेधे केम्रावये। पिंडमेकं पत्न्यै मिवेदयेत्· एकं च जुहुयादग्नौ त्रयः पिंडाः प्रकीर्ति
ताः वाराः वाराहपुराणेपि· जुहुनेप्रथमं त्वग्नौ पत्न्यै देयं तु मध्यमं· तृतीयमुदके दद्याच्छेषं बालेहयेत्स्वयं· ब्रह्मपुरा
णेपि· विश्राम्यतामित्यविरपाथपिंडं जग्राह मध्यमं· छायामयोपहा पत्नी तस्यै पिंडमदात्प्रभुः आधत्तपितरोगर्भमित्युक्त्वा
सा सुरूपिणी· पिंडं गृहीत्वा विप्राणां च अपादाभिवंदनं· आस्ते बत्तुपत्न्यै दानेपि मंत्रं प्राशनमंत्रेच पाठानंतरं दर्शयन्ना
हअपां त्वौषधीनां रसं प्राशयामि भूतकृतं गर्भं धत्स्वेति मध्यमं पिंडं पत्न्यै प्रयच्छति आधत्तपितरो गर्भं कुमारं पुष्क
रस्रजं· यथेह पुरुषोसदिति तं पत्नी प्राश्नातीति· अत्र स्रावैश्वदेवव्याख्यायामिश्वेति यत्संपालः प्राश्नातीति तच्छब्दरूपशुल्क
दानरूपसंस्कारविशिष्टस्य पिंडस्य प्राशने विनियोगादृष्टार्थत्वाच्च नेदृशं प्रपत्यर्थकाम्यं वा किंतु पत्नीकर्तृकप्रा ...
शनानामेव· यत्तु कल्पतरोबोधकं पिंडमग्नौ सदा दद्याद्भोगार्थी सततं नरः पत्न्यै प्रजार्थी दद्याद्वै मध्यमं मंत्रपूर्वकमिति ७९

वायुपुराणब्रह्मांडपुराणवचनं तत्र प्रजार्थीति पदं पत्न्याः पुत्ररूपप्रजार्थित्वस्योपलक्षणं· अन्यथा प्रजार्थेरानांतरवि
धौ मूलांतरकल्पनागौरवप्रसंगात्प्रजार्थे दाने याच्योत्तरेण मंत्रविशेषस्यानुक्त्वेमंत्रपूर्वकमित्यसिद्धं शेषाकांक्षत्वा
पत्तेश्च· यदापि प्रतिपत्तिबोधकं पूर्वोक्तयमादिवाक्यं तत्रापि विनियोक्तप्रतिपत्तिरूपाग्निहोमप्रायपाठाद्द्वितीया
यसंयोगाच्च प्रतिपत्तित्वं प्रकरणाच्छ्राद्धांगत्वं प्रतीयते तथापि रत्नाकरकल्पतरुगौरवादेनशाखांतराधिकरणन्याये
नकर्मभेदाभावाच्च द्वितीयायाश्च धात्वर्थकर्माभिधानेनोपक्षीणत्वात् प्रकरणस्य चापरत्वं बवाक्येन बाधात् यदपि स्व
चविषये प्रायदर्शनादिति संदेहव्यावर्त्तिविशेषग्रहणेन संदेहनिवर्तत्वादरच्चापस्ते वचनेनैव प्राशनार्थत्वनिश्चयाद् प
त्नीयपावचसमानार्थत्वेनैव व्याख्येयं· तच्च युक्तिजातं प्राशनकाह्नत्वस्थापना सूत्रयामेव विस्रियमाणत्वात्तत्र हविर्वि
यते हेमाद्रिरपि आपस्तंबसूत्रभक्षणायपत्नीकरे पिंडार्पणमंत्रमाहेति वदन् भर्तृकर्तृकदानस्य प्राशनार्थत्वमेवाभिप्रैति
नतु प्रतिपत्तित्वं फलार्थत्वं वेति विषयवाक्यपरिशोधः इदमिदानीं विचार्यते किं पत्न्या मध्यमपिंडप्राशनं फलार्थं चेत्पुम
यार्थं उत केवलकाम्यत्वेन पुरुषार्थमेवेति तत्र हेमाद्रिमाश्वलायनास्तंबसूत्रशेखवचनैर्मध्यमपिंडप्राशनपत्ति

९० त्वेन क्रत्वर्थत्वावगमात् आश्वलायनपरिशिष्टप्रमादिवचनैश्च पुत्ररूपफलार्थत्वेन पुरुषार्थत्वावगमादेकस्य तदुभयत्वे
संयोगपृथक्त्वमिति चातुर्थिकन्यायेन दधिवदुभयार्थत्वं मेने। अत्र ब्रूमः उपसंहारात्प्रकरणाद्बाधो बाधकाच्छ्रुतेः कमिश्रु
त्या सिद्धौ सत्यामन्यच्च तथाविरूप्यात्प्राशनं काम्यं। तथाहि नेदमुभयार्थं किंतु पुरुषार्थमेव। शाखान्तराधिकरणन्यायेन प्रति
सूत्रं प्रतिस्मृति च प्राशनरूपकर्मभेदाभावात्सूत्रेण फलस्यापि परिशिष्टेन फलस्य पुत्ररूपफलसंबंधस्योपसंहारेण के
वलकाम्यत्वात्। ननु फलस्यानंगत्वेनोपसंहारो न संभवति। तदुक्तं। शाखान्तरस्यापि यदंगं कर्मणः स्थितं। तस्याप्यन्यत्रापि ता
दर्थ्यप्रासंकेन निकार्यत्व इति। न। अंगे वानंगे वा शाखान्तरोपसंहारबीजस्य कर्मैक्यस्याकांक्षायाश्च तुल्यत्वात्। वार्त्ति
के त्वंगग्रहणमाशंकानुरूप्यार्थं। अत एव तत्र तत्रैकादशीव्रतादौ शाखान्तरस्थानीयानेकस्मृतिपुराणबोधितानामनेके
षामपि फलानामुपसंहारः प्रतिपादित एव निबंधकारैः इत्यपि च हेमाद्रेः। पुत्रकामायाउपसंहार इष्ट एव। अन्यथा कर्मैक्यनि
बंधनस्य संयोगपृथक्त्वन्यायस्यैवाप्रवृत्तेः। अथ वात्र तन्त्रात्र संकोचरूपादशादिमिकोदुपसंहारात्केवलकाम्यत्वं यथाहितं तु
र्धाकृत्यपुरोडाशं बर्हिषदं करोतीति पुरोडाशसामान्योद्देशेन विहितं चतुर्धाकरणं शाखान्तरीयेणाग्नेयं चतुर्धा करोतीति वा ९०

क्येनाग्नेय उपसंह्रियते न तथा पिण्डानां मध्यमं पत्नी प्राशयेदिति सूत्रेणोद्देश्यविशेषानुपादानात्सामान्यतो विहितं प्राश
नं मध्यमं पुत्रकामा पत्नी प्राशयेदिति शाखान्तरस्थानीयेन परिशिष्टवाक्येन पुत्ररूपे फलविशेषे उपसंह्रियते। सामान्यस्य
च विशेषाकांक्षायामनुपसंहारे बीजं। सा चेहाप्यविशिष्टा। तदुक्तं। अवश्यमेव सामान्यं विशेषं प्रतिगच्छति। सत्तामात्रं च तत्तेन
विशेषे स्थाप्यते ध्रुवमिति। अत्र विशेषं प्रतिगच्छतीत्यनेन विशेषाकांक्षा दर्शिता। न तु सूत्रवचने प्राशनस्य प्रकरणेन पिंड
पितृयज्ञांगत्वावगमाद्द्वितीयाश्रुत्याया मध्यमपिंडप्रतिपत्तित्वेनावगमात्तस्यापरिशिष्टवाक्यवद्विशेषविधित्वमेव न सामा
न्यविधित्वं ततश्च नोपसंहारः संभवति। तदुक्तं सामान्यविधिरस्पष्टः संह्रियेत विशेषतः। स्पष्टस्य तु विधेर्नान्यैरुपसंहारः
संभवति। उच्यते। न तावद्दृष्टे विषये प्रकरणस्य विनियोजकत्वं द्वितीयाबलेनोपयुक्तविषयत्वेन च प्राशनस्य प्रतिपत्ति
त्वेन पिंडसंस्कारे संपत्तिपत्त्योपकारकस्यानर्थकप्रकरणव्यापाराभावात्। तदुक्तं भट्टपादैः तनु सामर्थ्यसिद्धत्वान्न पु
नः ग्रहणस्य सन्निपत्योपकारिणां प्रकरणविनियोगनिवृत्तिप्रयोजनत्वं सूचयितुमाह नित्यसंयुक्तमिति यत्सूत्रं तच्छ्रुत्या
दिसंयुक्तानां प्रकरणादिविनियोगनिवृत्त्यर्थं न भवति किं तु संयुक्तशब्देन सन्निपत्योपकारित्वाभिधानात्सन्निपत्योपका

८१ रिणां प्रकरण विनियोगानिवृत्त्यर्थमित्याशय इति । यद्यपि पार्थसारथिमतानुसारेणेदं कालिकमन्यथाख्याताव्यापसन्निपत्यो
पकारिणामप्यंगानां प्रकरणेन ग्रहणमुच्यते तथापि क्रत्वर्थप्रकरणेन क्रत्वर्थत्वं तस्य काम्यवाक्येन बाधात् । तथाहि द्वादशा
हे तेंद्रवायवाग्रान् प्रापणीयोदनीयावित्यादिनोक्तादितस्य व्यूढरूपस्य प्रकरणेन द्वादशाहांगत्वेपि ऋद्धिकामा यतेन बहुस्यांप्र
जायेयेति काम्यवाक्येन पुरुषार्थत्वं चेति संयोगपृथक्त्वन्यायेन पूर्वपक्षपिसयावाक्येन प्रकरणस्य नानीत्यश्रुतिलिंगवाक्य
प्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् । श्रुतिलिंगाधिकरणन्यायेन वा धोदुर्यष्यादिवत्स्के वल
काम्यत्वमेव । संयोगपृथक्त्वन्यायस्तु यत्र समानबले प्रमाणे भवतस्तत्रैव नान्यथा दध्नाजुहोति दध्नेन्द्रियकामस्य जुहुयादि
ति दध्नः यथा वा वैश्वदेव्या अवेष्टिना मकाशुष्टिः राजा राजसूयेन स्वाराज्यकामो यजेत एतयान्नाद्यकामं याजयेदिति च व्यू
ढेनु नतथेति नोभयार्थत्वमिति सिद्धांतितं एवं प्राशने पिंडप्राशस्तु विशेषः यद्यपि वाक्ययोरेकशाखागतत्वे नोकमुत्स्या
पत्रं च फलसंबंधबोधनेनार्थवत् प्राशनवाक्यतो तु शाखांतरस्थानीयसूत्रपरिशिष्टगतत्वान्नत्स्या ध्यायग्रहणेनै ...
कशाखा हि परिगृह्यते । एकार्थानां विकल्पः स्वकर्मैकत्वे भविष्यति विद्यावेन विकल्पादेकेनोक्तमिमाचे क्रियते ऽन्येन तु ८१

यत्ति फलसंबंधानुभावपालिनचाप्यावताकवेन प्रकरणस्य विरोधे बाधेपाक श्चिद्विशेषइति प्रकरणेन पिंडपितृयज्ञांग
त्वं प्राशनस्येति । नापि द्वितीयाश्रुत्या पिंडार्थत्वं । तस्याप्यनि वाक्यश्रुत्या बाधात् । अन्यथासिद्धत्वाच्च । तथाहि पुत्रकामश्चा
क्षरवे शिलतमरवमात्रयाचिन्त्याः प्राश्नातिधातोश्च सकर्मकत्वेन कर्माभिधानेनोपक्षीणत्वात्तस्याः कम्यतपदेन फलसम
र्पकत्वस्यातिक्लेशापादकत्वेनायुक्तत्वात् । एतच्चान्यदेव हि धात्वर्थप्राप्यं कर्म स कर्म के अन्यदेव च सर्वत्र प्रत्यार्थनिबं
धनविभक्तिकारिकाविवरणार्थे तच्चपायेणैव कामशब्देनैव संबंधमापद्यते इत्याद्यौग्रंथेभट्टकुमारिलस्वामिभिः सूचितमपि
भट्टसोमेश्वरोन्यायसुधायामभिप्रायाविष्करणे प्रकटीचकार । भावनायाभाव्यनिष्ठत्वाद्भवितुरेवच भाव्यत्वाद्द्वितीयाया
श्च प्राधान्यापरपर्याय शितत्वमत्वमात्रयाचित्त्वेनभवितुं त्वानभिधायित्वादेवं कामशब्दाद्विरं भवेदितिभवितप्रतीते स्तेनै
व भावनाकर्मत्वप्रतीतिः अग्निमादधीतेत्यादौ तु भावनाकर्मत्वान्यथानुपपत्त्या भवितृकल्पकल्पनया क्लेशोभावनाक
र्मत्वनिर्वाहइत्याशयइति । तस्मान्न द्वितीयाया विनियोजकत्वं न वाक्यलिंगेचिह्निंगादिकं विनियोगप्रमाणं परंपामः तेन
पिंडपितृयज्ञांगत्वाभावमभ्यकल्पेनसूत्रस्य सामान्यविधित्वात् परिशिष्टेन फलविशेषेउपसंहारः संभवत्येव । एतेन हेमाद्य

८२ भिमतं संयोगपृथक्त्वमप्यपास्तं वेदितव्यं· ननु प्रकरणादेर्विनियोजकत्वेपि यथा राजा राजसूयेन स्वाराज्यकामो यजे
त राजसूयाधिकारवाक्यं आग्नेयोष्टाकपालो हिरण्यं दक्षिणेत्यादिना विहितामवेष्टिमपि स्वसन्निधिपाठानर्थक्या
पत्तेः स्वाराज्ये फलेपि नियुंक्ते न तु न स्या एतया अन्नाद्यकामं याजयेदित्यनेन केवलान्नाद्यार्थता भवति तथा प्राशनम
पि सूत्रोक्तं पिंडपितृयज्ञसन्निधिपाठानर्थक्यभिया यदंगमेपि भविष्यतां तु उभयार्थ इति· मैवं· अत्रवेष्टौ उभयोरपि
फलबोधकयोर्वाक्ययोः श्रुतत्वात् तत्तद्बलत्वाच्च एतयेति तु सर्वनामपरामर्शरूपस्य अन्नाद्यकामवाक्यप्राबल्यहे
तोरवेष्ट्यधिकरणे न च राजसूये तिसाम्यान्न्यशब्दैरस्यादिना वार्तिककारेणैव निरस्तत्वात् द्विनिगमकाभावेनोभयार्थत्व
मंगीकृत्य सन्निपाठस्य तु तदनुग्राहकत्वमेव· स्यात्तंत्रेण निमियोगप्रामाण्याभावात् न चेह किंचिद्विनियोगे प्रमाणमुक्ति
यस्य सन्निधिरनुग्राहकः स्यात्· प्रकरणादेर्निरस्तत्वात्· किंच· नेहावेष्टिवत् दर्थ्यभिन्नासन्निधिपाठो निरर्थको भवति
परप्रयुक्तमध्यमपिंडविनियोगार्थत्वात्तस्य· न चावेष्टौ तथा सन्निधौ प्रयोजनं तेन स्वाराज्यसंबंधादिरुपपद्य
वादेपि वैषम्यं· अपि च· वैरूप्यापत्तेरपि न प्राशनस्योभयार्थत्वं· तथा हि यथा वैश्वदेवस्य अथातः पंचमहायज्ञा इत्युप ८२

क्रम्य गृह्येवयज्ञानहरहः कुर्वीतेत्याश्वलायनसूत्रान्महायज्ञेभ्य एतेभ्य आत्मीयं क्षिपतेन तु वंचनात्तु हिलस्तत्वावगमाद
संदिग्धे पुरुषार्थत्वे· अथ सायंप्रातःसिद्धस्य हविष्यस्य जुहुयात् इत्येतद्वचनबलादन्नसंस्कारकत्वादुभयार्थत्वेऽप्य
माने एकस्यैवान्नद्रव्यस्यैकमेव होमं प्रति गुणत्वं प्राधान्यं चेति वैरूप्यापत्तेः केवलपुरुषार्थत्वमेवांगीकृतं· तदुक्तं वि
ताने श्वरयोगिना· द्रव्यसंस्कारकत्वपक्षे आर्थता वैश्वदेवकर्मणः पुरुषार्थत्वे वैश्वदेवकर्त्रार्थता द्रव्यस्येति परस्परविरो
धात्पुरुषार्थत्वमेव युक्तमिति· एवमिहाप्युभयार्थत्वे एकस्यैव मध्यमपिंडस्य प्राशनं प्रत्येव गुणत्वं प्राधान्यं चेति वैरू
प्यं स्यादिति केवलकाम्यत्वमेव प्राशनस्य न तूभयार्थत्वमिति· ननु पार्वणे पिंडे व्यतिव्याप्तमिति सूत्रे तथा हुत्वा ग्नौ पितर
इवदिति उच्छिष्टसन्निधौ दद्यात् पिंडान्यैपि तृप्यस्तु इति च योगियाज्ञवल्क्यवचनेन पिंडपितृयज्ञेतिकर्तव्यतातिदेशात
स्य पिंडपितृयज्ञविकृतित्वादितरश्राद्धानां च पार्वणएव सकलेतिकर्तव्यताम्नानेन श्राद्धसामान्येन च पार्वणविकृति
त्वात् प्राशनस्य केवलकाम्यत्वे सति तस्य पिंडयज्ञांगत्वाद्गुणकामेच्छाश्रितत्वात्स्वरूपतः स्यादित्याशंकेमिकाधिकरणन्या
येन दधिगोदोहनादिगुणकामवत् पार्वणएवातिदेशो न स्यात् अतः पांत द्विकृतिषु सपिंडीकरणादिषु· ततश्चाशुभश्राद्धेषु

८३ प्राशनस्य प्राप्त्यभावान्नैतद्दर्शभक्ष्याद्येषु कुर्यादिति निषेधोमुपपन्नः प्रतिपत्तित्वोच्चगतेनातिदेशेन प्राप्तेर्नायं दोष इ-
ति चेत्। माभूदतिदेशेन प्राप्तिरुपदेशेनैव तु पुत्रकामनायां संस्थाजातकेन भविष्यति। नच गुणकामानामपि गोदोहनादी-
नामुपदेशत एव प्रवृत्तिर्विकृतौ वृत्तिरिति वाच्यं। वैषम्यात्। गोदोहनादेर्हि सिद्धत्वेनाश्रयापेक्षायां सन्निधिनोप-
याकांक्षासहकृतेन प्रणयनादिनासह क्रियाकारकभावात्मक आश्रयाश्रयिभावे व्यवस्थिते तमनूद्य गोदोहनादिकाके
न पश्वादिफले विधानाद्विकृतौ च कृतोपकारप्राकृतचमसादिविशिष्टस्यैव प्रणयनादेरतिदेशेन साधनापेक्षत्वा-
द्भयाकांक्षाविरहादतिदेशस्य चाखंडकरणोपकारमुखे गुणगपदमेकक्रियोपस्थापकत्वेन प्रणयनादेरेव क्रियाविशे-
षस्यासन्निधेराश्रयत्वाप्राप्तेस्तदनुवादासंभवादुपदेशादपि न द्गोदोहनादेर्विकृतौ प्रवृत्तिः। दर्भस्तु प्रकृतावग्निहो-
त्रहोमाश्रयत्वात्तस्य च होमस्य करणत्वेन करणानामेव रुक्मादीनां विकृतावप्यतिदेशेनाश्रयाभावादेवाप्रवृत्तिरिति स्पष्ट-
मेव। प्राशनस्य तु क्रियात्वेनाश्रयापेक्षाभावादुपदेशतो विकृतौ प्रवृत्तेर्न तादृशं किंचित्परिपंथि पश्यामस्तदुपपन्न एव
वाशुभक्ष्याद्येषु तन्निषेधः। किं त्वेवं परिहारसरणिस्तथाप्यनुगंतव्या। अन्यथा पुत्रकामवाक्येन काम्यप्रयोगस्यैव प्रकृ- ८३

तत्वात्तत्रवाप्येतस्यैवानुयोगसाम्यात्। इति चेन्न। किंचिच्चोद्यं केवलकाम्यत्वे उभयार्थत्वे त्वयं दोषो हि तस्मिन्पक्षे च।
पत्नीनामध्यमं पिंडमश्नीयादित्यर्थवान्निवीतिशांखायनसूत्रवचनेन प्राशनकर्ममात्रोद्देशेन विहितं क्रतुरूपात्तत्वापरप-
र्यायात्तयाखिलत्वं कर्तृविशेषणं विनिगमकाभावेन नित्यकाम्योभयप्रयोगविषयस्यात्। तथा च दृष्टार्थदृष्टार्थ-
त्वेन वैरूप्यप्रसंगः। काम्यप्रयोगे हि पुत्ररूपफलोद्देश्यस्तु प्रयोगिमत्त्वेन दृष्टार्थं क्रतुरूपात्तत्वे नित्यप्रयोगे त्वदृष्टार्थं। अ-
क्रतुरूपात्तयापि प्राशने फले भाकीर्णकरतानिवृत्तिसिद्धेरिति। मम तु प्राशनस्य केवलकाम्यत्वाद्दृष्टार्थ एवेदं वि-
शेषणमिति न वैरूप्यप्रसंग इति। किं च उभयार्थत्वपक्षे सूत्रपरिशिष्टाभ्यामन्यैश्च सामान्यवचनैः प्राशनक-
र्ममात्रोद्देशेन तदर्थतानुद्देशेन च विहितो आधत्त पितरो गर्भमित्यादिवीरं मे दत्त पितर इति च मंत्रौ पूर्ववदेव विनि-
गमकाभावेन नित्यकाम्योभयप्रयोगविषयौ स्यातां तत्र च पूर्वोक्तमेव वैरूप्यं काम्यप्रयोगे पुत्ररूपफलप्रकाशनेन मं-
त्रयोर्दृष्टार्थत्वात्। नित्यप्रयोगे च तदभावात्। केवलकाम्यत्वपक्षे तु नियमेन दृष्टार्थत्वमेवेति न वैरू[illegible]मिति
मंत्रयोरुभयप्रयोगविशेषः। यन्नित्यप्रयोगे नयोः क्रियात्वसंबंधे प्रकाशनाभावादिति करणबोधितस्य कर-

८४ णत्वस्यानुपपत्तिः न च सूक्तवाकन्यायेन नित्यप्रयोगेपि फलस्य कल्पितत्वात्तदुपपत्तिर्वैरूप्याभावश्च तस्मिन्नपि प्र
योगे फलेप्रकाशनात्। न दृष्टार्थत्वादिति वाच्यं· काम्यप्रयोगे फलस्य सिद्धत्वेन कल्पनाभावादेकस्यैव मंत्रस्यैक
स्मिन्नेव कर्मणि प्रयोगभेदेन फलकल्पकत्वाफलकल्पकत्वरूपवैरूप्यप्रसंगात्· अस्मन्मते तन्न करणत्वानुप
पत्तिर्न चेदं वैरूप्यमिति सर्वमनवद्यं· प्रयोजनं तु विचारस्योभयार्थत्वे प्रतिपत्तित्वेन नित्यत्वात् कृतार्थतया ऽशुच
कामयाच पत्न्या कर्तव्यं प्राशनं· अन्यथा प्रतिपत्तिलोपेन पिंडपितृयज्ञादेर्वैगुण्यप्रसंगात्· केवलकाम्यत्वे तु तादृ
श्यानकर्तव्यमिति· नन्भयार्थत्वपक्षेपि पत्न्या वामिष्यमपिंडमित्यादिपूर्वोपन्यस्तार्थश्रुतिलिंगानां वचनात् कृतार्थतया
न कर्तव्यं प्राशनमिति चेत्· न· हेमाद्रेरार्तवानंतरस्य ऋतुस्नातोति व्याख्यानेनैतद्वचनस्य काम्यप्रयोगमात्र
विषयत्वाभिप्रायात्· तस्यस्य प्राशयः आर्तवानंतरस्य विशेषणत्वात्· दिनागतार्तवाया नित्यत्वे प
रत्वेमन्नातीवदृष्टार्थसंलभ्यते ऋतुस्नातत्वेपरत्वे तु रजसः पुत्ररूपं फलं प्रतिसंभवापि कारणत्वात्तस्य च ऋतुस्ना
तायाः सत्त्वादस्य तदृष्टार्थसंभवतीति· एतच्च काम्यप्रयोगविषयत्वएवास्य वचनस्य घटते तान्यथेति द ८४

त्येक प्रयोजनमपरं च पूर्वपक्षे नित्यत्वात्तद्विषयेण यच्छक्नुयात्तत्कुर्यादिति शास्त्रर्वशक्त्यधिकरणन्यायेनाश्व
लायनशाखीयादिनाऽशक्तावाप्येतं वायुस्कंभस्कर्तृकं दानं तन्मंत्रादीति कर्तव्यतारहितमपि प्राशनमनु
ष्ठेयमापस्तंबशाखीयादिनाचाशक्तावाश्वलायनायकृतपत्नीकर्तृकादानमंत्रादीतिकर्तव्यतारहितमप्य
नुष्ठेयं· सिद्धांते तु काम्यत्वात्काम्यविषयेण काम्येषु चैवमर्थित्वादिति सर्वशक्त्यधिकरणन्यायकाद्यधिकरणो
क्तेम सर्वांगोपसंहारन्यायेन सकलांगकलापोपेतमेव प्राशनमनुष्ठेयमिति· ननु न्यायप्राप्तस्य सकलांगोप
संहारस्य बहुत्वस्य वा स्वगृह्योक्तस्य कर्म प्रचोदितं· तस्य तावति शास्त्रार्थे कृतेसर्वेः कृतोभवेदिति वैजयापाय
नवचनवैवर्थ्यापत्तिरिति चेन्न·॥ तस्य नित्यविषयत्वात्· अन्यथानेन वचनेन नित्येषु सर्वशक्त्यधिकरण
न्यायप्राप्तस्यैवाशक्तिकृतांगत्यागस्य परगृह्योक्तमेव साऽन्यन स्वगृह्योक्तमध्येकिंचिदपीति नियममात्रं
क्रियते काम्येषु तु अप्राप्तस्य परगृह्योक्तांगस्यांगो पूर्वोविधीयत इति नियमविध्यपूर्वविधित्वेन दुष्परिहरवै
रूप्यमापद्येतेति अलमतिप्रबोधनायाति मीमांसारससागरसंताकृतोतिप्रपंचेन इति केवलकाम्यं संस्कारक

८५ तिर्नाध्याधाप्यन्नायासात् । पिंडपितृयज्ञपत्नीपिंडप्राशस्य साधुभिस्त्याज्यैः इति श्राद्धमयूखदत्ताकप्रमाणपारा
यारपारीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीमन्नारायणसुतभट्टशंकरोन्नीते धर्मद्वैतनिर्णये पिंडपितृयज्ञम
ध्यमपिंडप्राशनसंशयोद्भेदं परिच्छेदः ॥ ॥ अथ भार्यार्तविक्ष्याह श्राद्धद्वैतनिर्णयः । तत्र हेमाद्रावुशनाः अपा
त्नीकः प्रवासी च यस्य भार्या रजस्वला । सिद्धान्नेन न कुर्वीत आमं तत्र विधीयते इति । अस्या व्यवस्था श्राद्धवि
धेः कृत्स्नोपसंहारपूर्वकमपवादमाह हारीतः श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितं । अमावास्यादिनि
यते मासंसंवत्सरादृते इति । अयमर्थो दर्शनादिरूपे श्राद्धविघ्ने समुत्पन्ने सत्यामश्राद्धं कर्तव्यमितिप्रकीर्तितं त
दमावास्यादिकालिकमेव न तु मासिकमाब्दिकं च तदपालपथः तत्रैकभार्येण सहाधिकारिभार्यादूषणाद्वार्यां त
दभावे पंचमेहनि कार्यं तदुक्तं स्मृत्यंतरे । पंचमेहनि तु संप्राप्ते यस्य भार्या रजस्वला । श्राद्धं तदा न कर्तव्यं कर्तव्यं पंच
मेहनि । अधिकारयुक्तभार्यांतरसत्वे तु अधिकारामपगमान्मुख्यकाल एव कार्यं । अमावास्यादावामश्राद्धासमर्थ
स्य हेमश्राद्धमाह । द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि । हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला । इति हेमा ८५

द्रिमतं । कालादर्शे तु । लौगाक्षिः । पुष्पवत्स्वपि दारेषु विदेशस्थोप्यनग्निकः । अन्नेनैवाब्दिकं कुर्याद्धेम्ना नामेन न क्व
चित् । अनेन भार्यार्तवे मुख्यकाल एवान्नेनाब्दिकं कार्यमिति सिद्धांतमुक्त्वा मासंवत्सरादृते इति हारीतवाक्यस्य पर्युदा
सेन तदेव दृढयित्वा उक्तं स्मृत्यंतरतः श्राद्धविषेधमाशंक्याभुन्याहु यदा भार्या संप्राप्ते भर्तुराब्दिके । रजस्वला भवेत्सा तु
कुर्यात्तत्पंचमेहनीति श्लोकगौतमवाक्यसमानविषयः श्राद्धनिषेध इत्युक्तं । तत उक्तं केचिदिमं श्लोकं गौतमश्लो
कमन्यथा पठंति । श्राद्धीयेहनि संप्राप्ते यस्य भार्या रजस्वला । श्राद्धं तत्र न कर्तव्यं कर्तव्यं पंचमेहनीति । अस्मिंस्तु पक्षे
प्रत्याब्दिकमासिकव्यतिरिक्तविषयमिदं । अत्र पक्षे भार्यारजस्वलात्वनिमित्ते श्राद्धविघ्ने मावास्यादि श्राद्धमेव पंचमे
हनि कर्तव्यं । तत्रैव हारीतवाक्ये नेमामं विधीयत इति । अत्र कालादर्शोक्त द्वितीयपाठपक्षे हेमाद्रिमत इव कर्तुर्भार्यार्तव
पंचमदिन एवाब्दिकमन्नेनैव कार्यमिति सिध्यति स्मृत्यंतरवचसोपंक्ता व्याख्याने बीजस्य गौतमश्लोकस्यापत्र रज
स्वलाभार्या कर्तृकभर्त्राब्दिकोत्कर्षविधायकत्वाभावात् । श्राद्धसामान्ये भार्यार्तवामान्नविधायिनो हारीतवाक्य
स्य श्लोकगौतमवाक्येन पंचमदिनोत्कर्षे यदमावास्यादि श्राद्धं तद्विषयत्वात् । कालादर्शोक्तायपक्ष एव प्रयोगपारि

८६ जातेपुत्रः माधवेन तु कालादर्शीयमार्गमतं प्रथममुपन्यस्तं· ततो द्वितीयपाठपक्षेपि कालादर्शवद्व्यवस्था कृता· किंतु हे
माद्रिवदेवामावास्यादिश्राद्धनिर्णयः कृतः श्राद्धविघ्नइतिहारीतवाक्यात्स्वकालएवदर्शादिश्राद्धममामेन कार्यं· श्राद्धीयेति
संप्राप्तइतिविशेषणात्क्रोणस्य स्वंतरेणमृताहविषयत्वपसंहियतइति· अत्र वयं वदामः यत्तावत्कालादर्शीये श्लोककगौतमवा
क्यस्यश्राद्धीयेहनिसंप्राप्तेइतिपाठे पक्षे व्यवस्थाकरणं ततो वन्ध्याधवस्यतत्पाठपक्षे व्यवस्थाप्रदर्शनपरग्रंथपर्यालोच
नयैवनिरस्तमित्युक्तं अथैतावद्वशिष्यते· श्लोकगौतमवाक्यस्यपुत्रोत्पत्तु यदा भार्येत्यायपाठे कालादर्शीयंमतं सम्यक् हे
माद्रियं वेति· तत्रापि हेमाद्रीयमेवन्याय्येन कालादर्शीयमिति प्रतिजानीमहे तथाहि· अपुत्रात्तु यदाभार्या इतिवाक्ये पुष्प
वत्स्यपिदारेष्विति लौगाक्षिवाक्ये च मृतेहनि तु संप्राप्तइति स्मृत्यंतरस्य भंगे बीजं· तत्र लौगाक्षिवाक्ये तावत्पुष्पवत्सु दारे
षु यदाह्निकं तदन्त्येनैवेति वचनव्यक्तिः सर्वसंप्रतिपन्ना सत्यापमन्त्रानियमो यद्दैवतत्वासंतदैव प्रवर्त्तते न मुख्यकालएव· अ
तस्तत्संचमद्भितोत्कर्षपक्षेप्यविरुद्धं· अपुत्रात्तु यदाभार्येत्यपिवाक्ये भर्त्राह्निकमात्रविषयं मृतेहनि तु संप्राप्तइति तु स्मृत्यंत
रं मासिकाद्विकोभयविषयं पितृव्याद्याह्निकविषयं चेत्युभयोर्यथापूर्वं तदेवोत्तरानुरोधेन मासिकाद्विकोभयविषयं ८६

पितृव्याद्याह्निकविषयं च कल्पनीयमुत्तरं वा पूर्वानुरोधेन भर्त्राह्निकमात्रविषयं कल्पनीयमिति नास्ति विनिगमकं तस्मा
दपुत्रेति भर्त्राह्निकमात्रविषयमपुत्राविषयमेव च मृतेहानीती तु भार्यार्त्तवविषयमेव मासिकाद्विकोभयविषयं भ्रात
महाद्याह्निकविषयकमपि वा· यद्येकमूलकल्पनालाघवमात्रेण दशोमृताहनीत्यस्य भंगः क्रियते यस्य देवताभूतस्य भा
र्यारजस्वलातस्य श्राद्धांतरप्याभार्यया ऽपुत्रया पंचमेहनिकर्त्तव्यमिति· ततो लौगाक्षिवाक्येपि देवताभूतस्य दारेषु पुष्पव
त्सु तस्य यदाह्निकं तदन्त्येनैवेति भंगेकः परिपंथी भवेत्· ततश्च भार्यार्त्तवे मुख्यकालएवान्त्येनाह्निकं कार्यमिति लौगाक्षिवा
क्यं प्रमाणमुपन्यस्तं कालादर्शकृतो निष्टापत्तिः अथ कर्त्तृभार्यार्त्तवे प्रवृत्तौ लौगाक्षिवाक्यस्य मासस्संकसरादनस्यने
न संवादोभवतीति तत्र सदैवताभार्यार्त्तवेपितृस्यः तस्माद्यथा लौगाक्षिवाक्ये भार्याशब्दः संबंधिशब्दत्वात् क्रियापादिक्षिप्तेनो
पात्तोयः कर्त्तारमपेक्ष्यैव प्रवर्त्ततेनाद्विकाक्षिप्तदेवतामपेक्ष्य· आह्निकेन तु भर्त्तुरेवनियमेनाक्षेपात्· एवं मृतेहनीति
स्मृत्यंतरेपीति· किंचोशनोवाक्येपि यस्य भार्या रजस्वलेत्येवंविधसमभिव्याहारे न कथंचिदपि देवताभूतस्य भार्यार्त्त
वं बुध्यते किंतु कर्त्तुरेवतेनेदृग्विधसमभिव्याहारो मृताहनीतिथावस्थीति· संदिग्धोपिकविषयश्चन्नात्पुत्रात्तु यदा

८७ भार्ययैव तदनुरोधेनान्यथाकल्पयितुं शक्यते । निःसंदिग्धस्यापि वाक्यांतरबलेनान्यथाकरणे ऽपुत्रा तु यदा भार्यैव तत्
देयात्स्वविषयं मन्ये हनि तु संप्राप्त इत्येतद्विकल्पविषये कार्थत्वं तत्रान्यथा क्रियतां । भर्त्रादिलिंगषष्ठी पितृव्यतिरिक्तजनिता ।
कुर्यादिति च प्रयोज्यव्यापारे प्रयोजकव्यापारो लक्ष्यते । यावत्तोऽप्यान्यलिंगइत्यादिवत् । ततश्च भर्तुः पितुरादिके
संप्राप्ते कार्यकर्तृभार्या रजस्वला सा पंचमे हनि कुर्यात्कारयेदिति । अपुत्रापदं कथं नैयमिति चेत् इत्येनेयं । अपुत्रकार्यका
रिणी न भवति सपुत्रे सत्यर्थः तत्पुरुषे परवल्लिंगतापत्ते र्बहुव्रीहिरेवायं तत्र कथमयमर्थो लभ्यते इति चेन्न पुत्रशब्दस्य भावप्र
धानत्वात् । न विद्यते पुत्रः पुत्रकार्यकारित्वं यस्या इति । एवमेकमूलत्वि सया मन्ये हं नास्य समभंगो ऽपुत्रेऽस्यापि भंगतायत्ते
र्विनिगमनाविरहात् अभिन्नार्थत्वमेवानयोः स्याक्रूयमन्ये हं नान्येन कर्तुर्भार्यायाश्चैव एवं मासिकाब्दिकयोरेवोत्कर्षो वि
धीयते अपुत्रोऽस्येन तु अपुत्रा या भार्यैव तत्कर्तृका विकमात्रोत्कर्षः ऐव न्याय्यं । उभयमपि तु पंचमदिनविधानमाब्दि
के श्राद्धविघ्ने समुत्पन्ने तन्नाम्न्त सूतके मावास्यां प्रकुर्वति श्राधं चैके मन्यते पिणः श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि ।
एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषत इति व्याससमरीचिवाक्याभ्यां प्राप्तयोरमावास्याकृष्णैकादश्योरपवादार्थं मन्ये हं ना ८७

ति । पूर्वं तन्मासिके तदहश्चेत्स्यद्दूष्येत केनचित्सूतकादिना सूतकांमंतरं कुर्यात्पुनस्तदहरेव च । श्राद्धविघ्ने समुत्पन्ने भविज्ञाते ऽ
तेऽहनि । कुर्यादन्नेन कृष्णैकादश्यामिंदुक्षयेपि वेति अत्रिवाक्यकारत्नादर्शस्थमरीचिवाक्याभ्यां प्राप्तानां मासांतरे तद्दिनामा
वास्यैकादशीनामपवादार्थत्वस्याध्येमादिमतमेव ज्याय इति अलंभूयसा । इति भार्याकर्तृकक्षयाहसंशयोच्छेदपरिच्छेदः ॥ ॥
अथ मातापित्रोः क्षयाहसन्निपाते निर्णयः क्रियते । तत्र भृगुः एककाले गतासूनां बहूनामथवा द्वयोः तंत्रेण श्रपणं कु
र्याच्छ्राद्धं कुर्यात्पृथक्पृथक् । पूर्वं कृत्स्नमृतस्यादौ द्वितीयस्य ततः परं । तृतीयस्य ततः कुर्यात्सन्निपाते त्वयं क्रम इति । ए
ककाले एकतिथौ । अत्रैतस्यार्थस्मृत्यर्थसारे पराशरमाधवीये मदनपारिजाते कालादर्शे चाविशेषेण पितुः क्षयाहश्राद्धं त
तो मातुरित्युक्तं । हेमाद्रिणा तु मरणयोर्ज्ञापर्यायेन मरणक्रमेणैव । मरणयोर्वापर्याये तु पितृपूर्वकत्वमुक्तं । तत्र हे
माद्रिमतमेव युक्तमिति केचित् । तथा हि । तत्र यत्तावन्मदनपारिजाते पितृपूर्वकतासाधकं भृगुवाक्यव्याख्याने कृत्स्नं पूर्वक
स्य । मुख्यस्य । द्वितीयस्य । मुख्यापेक्षया जघन्यस्य । तृतीयस्य जघन्यतरस्येत्यर्थ इति । तत्र मुख्यत्वमतिशयितत्वमान्यत्वं तत्
न वक्तव्यं । न च सर्वेषु पितृत्वमनुगतमिति गुरुत्वस्य प्रायश्चित्तप्रकरणे विज्ञानेश्वरेण निरस्तं । उपाध्यायादथाचार्य आ

४४ चार्याणांशतं पिता· आचार्यः श्रेष्ठो गुरूणां· उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता· एते मान्या यथा पूर्वमे
भ्यो माता गरीयसीत्यादिमनुगौतमयाज्ञवल्क्यादिवचनोपन्यासेन· तथा पूर्वं द्वितीयपशब्देषु लक्षणाप्रसंगादप्युत्क्रम
दन व्याख्यानं· तस्माद्भृगुवाक्येन तावत्पितृश्राद्धपूर्वकत्वं मातृश्राद्धस्य न सिध्यति· यत्तु अत्र प्रमाणं कार्ष्णाजिनिवा
क्यं कालादर्शे पराशरमाधव्यां चोपन्यस्तं· पित्रोः श्राद्धे समं मासेन वै पर्युषिते पि वा· पितृपूर्वं सुतः कुर्यादन्यत्रासन्नियो
गत इति· पर्युषिते चिरंतने· न हि भृगुवाक्यं सामान्यरूपमपि भवति मातापितृव्यतिरिक्तविषयत्वाद्विशेषरूपमपि भ
वति मरणयौगपद्य एव प्रवृत्तेर्युगपन्मरणे तत्प्रवृत्तेः· एवं कार्ष्णाजिनिवाक्यमपि सामान्यरूपमपि भवति युगपन्मरणे
यौगपद्यमरणे च प्रवृत्तेः तेन सामान्यविशेषभावेन वाध्यबाधकभावस्यावन्नास्ति· अथोच्येत· पूर्वापरमयो भृगुवाक्ये
न मरणक्रमेणैव क्रमोक्तेर्नैराकांक्ष्यात्साकांक्षितानाकांक्षितविधानयोः साकांक्षितविधानं न्याय्यमिति न्यायेन युगपन्मर
ण एव क्रमाकांक्षणात्कार्ष्णाजिनिवाक्यं प्रवर्त्तत इति· तदपि न· वैपरीत्यस्यापि सुवचत्वात्· कार्ष्णाजिनिवाक्या
क्ये मातापितृविषये क्रमोक्तेर्नैराकांक्ष्यान्मातापितृव्यतिरिक्तविषय एव क्रमाकांक्षणाद्भृगुवाक्यं प्रवर्त्तत इति· ४४

अथ मतं पूर्वापरमृतौ भृगुवाक्येन क्रमोक्तौ तत्रानियमाप्रसक्तेः कार्ष्णाजिनिवाक्यप्रवृत्तौ नियमविधित्वं
भवति तच्चेष्यापोऽपूर्वविधेरिति मीमांसासिद्धमिति· तदपि न· वैपरीत्यस्यापि संभवात्· कार्ष्णाजिनिवाक्यान्मा
तापितृविषये क्रमोक्तौ तत्रानियमाप्रसक्तेर्भृगुवाक्यप्रवृत्तौ तस्यापूर्वविधित्वापत्तिः मातापितृव्यतिरिक्तविषये
तु कार्ष्णाजिनिवाक्यप्रवृत्त्या नियमप्रसक्तेर्भृगुवाक्यस्य तत्र प्रवृत्तौ नियमविधित्वं भवतीति· तस्मात्कि
तेन काध्यामिति महत्सु करमिति· अत्रापरे· इह चत्वारो विषयाः मातापित्रोः पौर्वापर्यमृतिरेको विषयः त
दन्येषां पौर्वापर्यमृतिर्द्वितीयो विषयः मातापित्रोर्युगपन्मृतिस्तृतीयः तदन्येषां युगपन्मृतिश्चतुर्थः तत्र
हेमाद्रिमते आद्ययोर्द्वयोरपि भृगुवाक्येन निर्णयः तृतीयचतुर्थयोस्तु कार्ष्णाजिनिवाक्यद्वयेन· तन्मते तृती
ये विषये पदत्रयात्मकपूर्ववाक्यं चतुर्थविषये तु अन्यत्रासन्नियोगत इति चतुर्थचरणात्मकवाक्यमिति वि
षयचतुष्टयमपि निर्णीयते· इतरमते तु आद्यतृतीयविषयौ कार्ष्णाजिनिपूर्ववाक्येन निर्णीतौ· द्वितीयो भृगु
वाक्येन· तुरीयो द्वितीयकार्ष्णाजिनिवाक्येनेति· तत्र कार्ष्णाजिनिवाक्यद्वयं व्यवस्थार्थं व्यवस्था च एकविषय

८९ त्वे भवति· हेमाद्रिमते चैकविषयत्वे लभ्यते· उभयोर्युगपन्मृतिविषयत्वात्· मातापित्रोर्युगपन्मृतौ पि
त्रादिक्रमः· तेदितरेषां तत्रैव प्रत्यासत्तिक्रम इति· इतरमते तु सामान्यविशेषविषयत्वात्कथं व्यवस्था न स्येवं सं
भवति युगपन्मृतौ क्रमस्तनौ चापित्रादिक्रमः· अन्येषां तु यथापद्यं प्रत्यासत्तिक्रम इति· किंच· द्वितीयकार्ष्णा
जिनिवाक्यमुभयोर्युगपन्मृतिविषयमेवेत्युक्तं तादृशेन च तेन समभिव्याहारादिशये प्रायदर्शनादिति न्यायेनापि
पूर्वमपि कार्ष्णाजिनिवाक्यं युगपन्मृतिविषयमेवेति निश्चीयते· अपिच· भृगुवाक्यं मातापित्रोर्न प्रवर्तत इति न
द्यकार्ष्णाजिनिवाक्येन बाध्यत इति वाच्यं· न च बाधन्यायोऽत्र सामान्यविशेषभावादिः कश्चिदपि तु भवतीत्युपपादि
तमेव· ततश्च मातापितृविषये भृगुवाक्यस्यापि प्रवृत्त्यापत्तेरुक्तयोः पौर्वापर्ये मतो कार्ष्णाजिन्याद्यवाक्यस्यापि प्रव
र्तौ विकल्पोऽष्टदोषदुष्टो दुष्परिहर आपद्येत· अतस्तत्परिहारार्थमपि आद्यकार्ष्णाजिनिवाक्यं युगपन्मृतावेव प्र
वर्तत इत्युपेयमिति· अथोच्यते· हेमाद्रिमतेपि बाधन्यायासंभवात्साम्यादिकल्पप्रसंगे तत्परिहारार्थं कार्ष्णा
जिन्याद्यवाक्यस्य युगपन्मृतिविषयत्वे यद्भृगुवाक्यस्यैव मातापितृव्यतिरिक्तविषयत्वं किंमिति न कल्प्यते· यत्तु वि ८९

निगमकमुक्तं· व्यवस्थाविधित्वोपपत्त्यै एकविषयत्वाय कार्ष्णाजिन्याद्यवाक्यस्यापि तदुत्तरवाक्यवद्युगपन्मृतिवि
षयत्वं कल्प्यत इति· तत्र कार्ष्णाजिन्याद्यवाक्यं युगपन्मृतिं क्रमवन्मृतिं च विषयीकरोतु तदुत्तरवाक्यमपि तत्पृथोभय
विषयमस्तु तावतोप्येकविषयत्वं व्यवस्थाविधित्वं चोपपद्यत एव· प्रायदर्शनन्यायोपि चैवमनुगृह्यते· न चैवं भृगुवा
क्यस्य निर्विषयता· अन्यत्रासत्तियोगत इत्यस्य विषयेत्वत्वचनेः।। यथा दोपितृव्योदेसपत्नमातरावित्यादि अन्यथा च
हेमाद्रिमते सपत्नमातुः पूर्वमृतौ पितुश्चोत्तरमृतौ क्षयाहसन्निपाते सपत्नमातुरेवादौ श्राद्धं प्रसज्येत· अन्य
त्रासत्तियोगत इत्यस्य युगपन्मृतिविषयत्वात्तत्र भृगुवाक्यस्यैव प्रवृत्तेरिति कालादर्शादिमतमपि युक्तमिति· एव
मपि कस्मिन्नपि मूले विनिगमकाभावात्पूर्वोक्तो विकल्पो दुष्परिहरः।। उच्यते।। कालादर्शादिमते एवं नियामकं पश्या
मः तथाहि· संकोचोपि हि वाक्यस्य बाधविशेष एव· ततश्च हेमाद्रेर्वाक्यद्वयस्य संकोचः स्यात्· इतरमते तु एकस्यैव
कथं हेमाद्रेराद्यकार्ष्णाजिनिवाक्यं युगपन्मृतिविषये संकोच्यं· एवं तदुत्तरं वाक्यमपि। विशेषाभावात् इतरमते तु कार्ष्णा
जिनिवाक्यद्वयस्यापि न संकोचः क्रमयुगपन्मृत्योरुभयत्रापि तत्प्रवृत्तेः भृगुवाक्यमात्रे तु संकोच्यं मातापितृतदितर

९० तुल्यसन्निकृष्टपितृव्यद्वयसपत्नमातृयादिविषयत्वेन॰ अतो बहुबाधादस्ययाधस्योचितत्वात्स्कान्दोक्तजिनि
वाक्ययोर्विषये भृगुवाक्यप्रवृत्तेर्मातापित्रोः क्षयाहसन्निपाते क्रमप्राप्तौ युगपत्प्राप्तौ तदुभयासत्वाने वावि
शेषेण पितुः पूर्वं श्राद्धं ततो मातुः एवं तदुत्तरवाक्यविषये सन्निकर्षविप्रकर्षस्वत्वे भृगुवाक्यप्रवृत्तेः क्र
मप्राप्तौ युगपत्प्राप्तौ तदुभयासत्वाने वाविशेषेण पित्रादेः सन्निकृष्टस्य श्राद्धं पूर्वं ततः सपत्नमात्रादिविप्रकृ
ष्टस्येति कात्यादर्शादिमतमेव युक्तमिति॰ इह बहु वक्तव्यमपि ग्रंथगौरवभीतितः नोच्यते विदुषां प्रायो न रुच्यैवि
स्तरे मता॥ इति श्रीमत्सद्वाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरनारायणात्म
जभट्टशंकरकृते मातापितृक्षयाहसन्निपाते क्रमसंशयोच्छेदपरिच्छेदः॥ ॥९॥ ॥९॥ ॥९॥ ॥९
श्री॥ अथान्वारूढायाः क्षयाहनिर्णयः॥ ॥ इह यदि पत्नी पत्युः प्रयाणतिथावेवान्वारूढा ततः क्षयाहश्राद्धं तंत्रेण
कर्तव्यमिति निर्विवादमेव तत्रापि हेमाद्र्यनुसारेण स्वावच्छिन्नपितृकश्राद्धवद्दाम्पत्यपिंडैक्यमप्याहुः। माधवप्रयोगपा
रिजातकारादयस्तु ब्राह्मणपिंडयोर्भेद एव वैश्वदेवादीनां त्वाद्युपकारकाणामेवामावास्यायामिव पितृमातामह ९०

पार्वणयोस्तंत्रमित्याहुः॥ यदा तु भिन्नतिथावन्वारूढा तदा भिन्नमेव क्षयाहश्राद्धमनुष्ठेयमिति निबंधकाराः। दा
क्षिणात्यास्तु शिष्टमूर्धन्या अपि तिथिभेदे विपत्तितिथावैव वैश्वदेवाद्युपकारकांगतंत्रेणोभयोरपि श्राद्धमनुतिष्ठंति॰
तत्रस्याचारविषये गुरोरधिगतं तु यत्॰ संप्रदायागतं किंचिद्यथान्यायं यथामति॰ शंकरेणोचितं वान्यदुक्तो द्वत्क्रमुच्यते॰ यत्वे
तद्विबुधाः क्षमांश्वो ध्यंचेति कृतांजलिः। तत्र चंद्रिकायां भृगुः। या समारोहणं कुर्याद्भवेतिश्चितिं सा पतिव्रता तस्मिन्नहनि तांमृतां संप्रा
प्ते पर्वपिंडे नियोजयेत्॰ यस्य वचनवश्राद्धयुगपत्तु समागता ग्यिनयेत्॰ लोगाक्षिः। एवं चितां समारूढौ दंपती निधनं गतौ॰ पृथ
क्श्राद्धं तयोः कुर्यादोदनं च पृथक्पृथक्॰ अनयोस्तावद्वाक्ययोः श्राद्धशब्दस्य ब्राह्मणभोजनरूपप्रधानवचनत्वात् ओदन
शब्दस्य चौदनपिंडपरत्वात् हेमाद्र्यादिभिर्व्याख्यानात्तन्मात्रपृथक्त्वाभिधानेन च तदितरेषां वैश्वदेवादीनामारादुपकारणामंगा
नां तंत्रविधापित्वमेवानुपगंतव्य॰ तयोश्च सामान्यतस्तिथिभेदे तदभेदे च श्राद्धतंत्रतावधायिनोः संभवे तु तौ रिक्ता तिथिगतानुग
मनमात्रविषयत्वानुपपत्तिनाप्रमाणेन तु युक्ता॰ यत्तु मत्ताहनि समासेन पिंडनिर्वपणं पृथक्॰ नवश्राद्धं तु दंपत्योरन्वारोहण एव तिथि॰
लौगाक्षिवाक्ये मततिथिरेकत्र इति व्याख्यानं तत्किंमताहनीसे कवचनोक्तैकत्वविवक्षां कृत्वा न सद्व्याख्यानरूपमुतव्या

९१ यत्नभ्यं· न प्रथमः। मृताहनीत्यस्य व्याघ मरणतिथिपरतायां तावत्· अन्वारोहणे दंपत्योर्मरणतिथिरेकाचे च्छ्राद्धं समासेनेति वा
क्यार्थो निष्पद्येत· तथा च सति· मृताहनीत्यस्य मासपक्षतिथिस्पष्टे योयस्मिन्निपतेदहनि· प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं वि
दुरित्येवमादिवचनप्रतिपादितक्षयाहादिपरत्वात् उद्देश्यभूतश्राद्धविशेषणत्वस्याभावान्महालयादावपि सर्वमिन्यतोन्यायप्रा
प्तावपि तंत्रता एकतिथावन्वारोहण एव नियम्येत· ततश्च भिन्नतिथावन्वारोहणेनन्वारोहणे पि च तंत्रतां परिसंचक्षाते· न
च विरोधतापत्तिः। त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् अत्रत्वेवावपंत्यत एवोद्यंतीति वदेवकारेण परिसंख्यापाः
श्रोतत्वात्· तथा स्थितिश्चेत्नाचारविरोधात्· किंच एकतिथिमृतयोः क्षयाहविषये न्यायप्राप्तस्य तंत्रस्यापवादकवचना
पयारतपाप्रतिप्रसवत्वाद्स्य महालयादौ च परिसंख्यार्थत्वादेरूप्यं स्यात्· अथ मृताहनीत्यनेन योगवृत्तिमात्रेण न्यायप्रा
प्ततिथिरुच्यते स्मृतिवचनेषु क्षयाहप्रयोगादेकत्वपाहनिमित्तकं दंपत्योः श्राद्धं अन्वारोहणे सति समासेने वतियाक्यार्था
त्पर्वुदूषणसंगरति· अथ वा न मृताहनीत्यनेन क्षयाह उच्यते· न च योगमात्रेणं न्याय्यमरणतिथिः। किंतु सिद्धांतत्रदेवमरण
पक्षसजातीयपक्षगताया प्रतिमासं पाच मरणमासपक्षसजातीयमासपक्षगताप्रतिसंवत्सरं प्रतिपत्ताप्युपाधिनाव ९१

मरणतिथिसजातीया तिथिः सा मृताहशब्देन योगरूढ्या निरूढलक्षणया वोच्यते स्मृतिशास्त्रेन त्रैव बहुलं प्रयोगात्· एकंव
चनोक्तस्य च तदेकत्वस्य विवक्षितत्वान्निमित्तसप्तमीवशात्क एकमृताः तिथिनिमित्तकयो र्दंपती श्राद्धयोर्मासिकवार्षिकयो
रन्वारोहणे सति समासे विधीयते अतो न कश्चित्पूर्वोक्तो दोषः। अग्नौकरिष्यन्नादाय इति व्याख्याने विज्ञानेश्वरः। अनग्नय पृथगग्ना
विरूपविशेषेणोक्तं तथाप्याहिताग्नेः सर्वाधानपक्षे औपासनाग्नेरभावाद्पिंडपितृयज्ञार्थं तरेभ्यातिनिर्पार्वणश्राद्धे विहृतद
क्षिणाग्नेः सन्निधानाद्दक्षिणाग्नौ कर्म स्मार्तं विवाहाग्नावित्यस्यापवाददर्शनात्· तदाह मार्कंडेयः। आहिताग्निस्तु जुहुयाद्दक्षिणा
ग्नौ समाहितः। अनाहिताग्निस्त्वौपासदे अग्न्यभावे द्विजेप्सु वेति· अर्धाधानपक्षे त्वौपासनाग्निसद्भावादाहिताग्नेरनाहिता
ग्नेर्ष्पौपयासनाग्नावेवाग्नौकरणहोम इति· हेमाद्रिस्तु अर्धाधानपक्षे दाक्षिणाग्नावेवाग्नौकरणहोममितावक्षराकारमतं दू
षयित्वा सिद्धांतितवान्· तच हेमाद्रिमतमेव सम्यक् न विज्ञानेश्वरमतमिति नः प्रतिभाति· तथाहि यद्यपि कर्म स्मार्तं विवाहा
ग्नौ चित्यपि सामान्यवाक्यं मनाहिताग्न्यर्धाधानिसाधारणं· तथा अनाहिताग्निस्तु जुहुयाद्दक्षिणाग्नावित्यपि सामान्यवाक्यं
सर्वाधान्यर्धाधानिसाधारणत्वात्· तेनानयोर्मध्ये अन्यतरेणाप्यन्यतरस्तामान्यविशेषाभावन्यायेन बाध्यत इतिनाध

९२ वसानुंशक्यते तथापि अनाहिताग्निस्तोपद इत्यनेन विशेषविषयाण कर्मस्मार्ते विवाहाग्नाविस्येतत्सामान्यवाक्यं स्ववि
षय उपसंहृतं सदनाहिताग्निविषयं कृतं· तेन तत्सर्वाधानिष्वाहिताग्निष्वात्ते प्रतिन प्रतिन प्रवर्तते· कर्मस्मार्ते विवाहाग्ना
विति· अतो निष्प्रतिद्वंद्वमाहिताग्निस्तु जुहुयाद्दक्षिणाग्नाविति मार्कंडेयवाक्यमेवार्धाधानिनं प्रति प्रवर्तते न कर्मस्मार्ते विवा
हाग्नाविति· तेनार्धाधानिना दक्षिणाग्नावेवाग्नौकरणहोमः कार्यो नौपासनाग्नाविति हेमाद्रिमतमेव ज्यायः यद्
तिनः प्रतिभाति अपमेवच हेमाद्रेशयोस्मदीरितः। तैयमन्यस्तत्सारल्यंनु वक्तुं सारप्रभाविणः। अथ वितानै
श्वरभट्टमतो मीमांसकमतेः कस्यचित्तदाशयकल्पना प्रक्रियते· अनाहिताग्निस्त्वौपसद इत्येतदाग्नेयं च
तुर्धा करोति वहिधापकं यदस्यास्त्यात्तदा कर्मस्मार्ते विवाहाग्नावित्यस्योपसंहारकं· नत्वयं विधिर्वाक्यभेदप्रसंगा
त्· किंत्वाहिताग्निस्तु जुहुयाद्दक्षिणाग्नावित्यस्य विपर्ययदर्शनभ्रमोनतयाशेषः। अहिताग्नेर्दक्षिणाविति विधौ त्य
र्थसिद्धमेतद्वचसो यानाहिताग्निरौपासन इति सोयमनुवाद इति· स स मेवमपि न वितानेश्वरमतसिद्धिः। पूर्वमेव द्योत
दुक्तं· कर्मस्मार्ते विवाहाग्नावित्यपि सामान्यवाक्यं तथा आहिताग्निस्तु जुहुयाद्दक्षिणाग्नावित्यपीति· एवं प्रतिप ९२

क्षो यदि ब्रूयाद्धेमाद्रिमते वाक्यं किं विनिगमकमुत्तरं प्राबल्यायेति· प्रतिब्रूयादेवं कर्मस्मार्ते विवाहाग्नावित्येतस्य द्वेधा
सामान्यशास्त्रत्वं एकं तावदुक्तमनाहिताग्न्यर्धाधानिसाधारण्यात्· तद्यपि नु विनिगमकं आहिताग्निस्तु जुहुया
दित्यस्यापि सामान्यशास्त्रत्वोक्तेः। तथापि कर्मस्मार्ते विवाहाग्न्याधित्येदग्नौकरणे होमतदतिरिक्तहोमविषयत्वा
त्सामान्यशास्त्रत्वोक्तेः। तथापि कर्मस्मार्ते विवाहाग्नावित्येदग्नौकरणहोमतदतिरिक्तहोमविषयत्सामान्यशा
स्त्रं अग्नौकरणहोममात्रविषयेतरेण वाध्यत इति· तस्माद्धेमाद्रिमतमेवास्मद्गुरुरीत्या ज्यायः। वितानेश्वरम
तं तु केनाशयेनोपपादितमिति न विद्मः। तेनार्धाधानिनः श्राद्धे दक्षिणाग्नौ कृतिर्भवेत्· अग्नौकरण इत्येतच्छंकरे
ण प्रसाधितं॥ ॥ इति श्रीमत्स द० द्वैतनिर्णयेग्नौकरणसंशयोद्भेदपरिच्छेदः॥ ॥ इतिहृदयं तदपि मंदं· एकशब्दो
स्य यं नानार्थो लोके दृष्टः अस्ति यामेद यचनः अ अस्ति चैकत्वसंख्यावचनः। तच्चदं प्रयोमतलिथिमेदे समासप्रसं
गमिति च त्यर्थमेका अभिन्ना चेन्मत तिथिरिति यदेत वा तोपि प्रेतोर्थः। तबाणे दए कवचनेनोच्यते किं त्वेकत्वसंख्ये
वेति न तदेभिमतसिद्धिः। तस्यामेव तु विवक्ष्यमाणायां ग्रहेकत्वाधिकरणपूर्वपक्षे यथा एकस्मिन्न्वग्रहे संमार्गो तुष्ठानं

ननु द्वितीयादौ एवमिहापि कैवल्याभ्यस्ततिथिस्तन्निमित्तक एव समासो न तु पाद्विमायापि मृताहतिथिः। तन्निमित्तके
पीतिवाक्यार्थापत्तेरन्यदेवा पूर्वपक्षान्तरं निरूपितं स्यादिति। किंच। मृताहनीत्येकवचनेनैकस्यैकत्वस्य निमित्तान्तर्गतस्यापि
वाक्यार्थोपपत्तौ यस्योभयं हविरार्तिमार्छेदित्यादाविवोभयत्वादेर्निमित्तान्तर्गततयाविवक्षावो वाक्यभेदापत्तेरप्यन्या
य्या। एतानि च तदपीत्यादि दूषणानि मृतस्याघातिथिर्मृताहनीत्यनेनोच्यत इत्यस्मिन्नपि पक्षे वेदितव्यानि। अथ मृ
ततिथेरेकत्वं इति व्याख्यानं न्याय्यं मन्यमिति द्वितीयपक्षपरिग्रहान्नैतद्दोषप्रसक्तिरित्युच्यते। को ऽसौ न्याय इति ब्रूयादेतं।
सपदि प्रतिब्रूयात्। एकस्यां हि क्षयाहमासि कतिथौ उभयोः श्राद्धद्वयं प्रसक्तमेवैककालीनं। तस्य तु न्यायप्राप्तत्वे
तदपवादकेन पूर्वकस्य मृतस्यादावित्यादिवचनेन क्रमतः प्रसक्तावनेन वचनेन पुनस्तत्र प्रतिप्रसवे लाघवं विधेः। अग्नि
ष्टोमे प्रवरणक्रिया पूषा प्रपिष्टभागइत्यादिवत्। मातुः श्राद्धं च मासपक्षतिथिस्पृष्ट इत्यादि लक्षणलक्षितक्षयाहसंबंधोऽपि न
वाधितो भवति भिन्नतिथिविषयत्वेऽप्युच्यमाने तु श्राद्धद्वयमेकदिने प्रसक्तं। न तरां तयोर्न्यायेन तत्र प्रसक्तिर्नतिमां वा
पवादकवचनेन क्रमतोऽनुष्ठानप्राप्तिरतो न प्रतिप्रसवतान्मातुः श्राद्धे च पतिति थावनुष्ठानात्क्षयाहसंबंधवाधप्रसं ९२

गइति। तदप्ययुक्तं। यदा त्वष्टम्यां दौ मृतस्य पत्युर्नवम्यादौ चान्वारूढायाः पत्न्याः पक्षिकदाचिद्देपूर्वापरदिनयोरप
रदिनयोरपवादाक्रान्ति व्याप्य भावे नैकस्मिन्नहोरात्रे क्षयाहद्वयमापतति तदाप्यस्माद्वचनात्समासः स्यादिति न त्वदिष्ट
सिद्धिः। किंच। यदि कस्मिंश्चिद्वर्षे चैत्रशुक्लप्रतिपदादौ मृतस्य पत्युरन्यस्मिन्नरे च तन्मास तत्पक्षगतायामेव तिथावन्वा
रूढायाः पत्न्याः अन्यान्तरे एकस्यामेव मृततिथौ श्राद्धद्वयमापततीति तत्रापि समासविधानप्रसंग इति न त्वदभिप्रेतसि
द्धिः। अतो मृततिथेरेकत्वं इति व्याख्यानमपव्याख्यानमेव सामान्यतस्तिथिभेदे नैश्च्यभेदे यान्वारोहणे सति दंपत्योर्मृ
ततिथिनिमित्तकश्राद्धे समासो विधीयत इत्येव न्याय्यं। ननु भिन्नतिथिनिमित्तकयोः श्राद्धयोरेकाहे कर्तव्यतायामप्रा
सेरुत्देशे कथं साहित्यविधानमिति चेन्न साहित्यविधानान्यथानुपपत्त्यैव तद्देशे एककालतायाः अप्राप्तेः पात्। इदं
चोदाहरणं हेमाद्रिरेव श्राद्धकल्पे सांवत्सरिकप्रयोगाभिधानावसरे मृताहनीत्येतद्वाक्यार्थनिरूपणादव्यवहितपूर्वग्र
थ एव सहकारिचौक्य प्रदर्शनेनोक्तवान्। तत्कारिकास्तु यास्तवत्क्वेन कालक्षा अवास्यादेशभेदे च नैव हि। तस्मात्तत्र वि
धानात्तु यौगपद्यं प्रतीयते। अमावास्यादिकालेषु कालैकत्वात्सहक्रिया। मृताहनि तद्वाक्ये पुत्रेण सह किं पुनः। अस

९४ विषयोमानामहानामप्येवंनैत्यंवावैश्वदेविकमिति-अर्थविमर्शणंचहेमाद्रेरेवावगंतव्यं। किंच-यदापदार्थविशिष्टसाद्वि
सविधानान्यथानुपपत्त्यापदार्थप्राप्तिरपिकल्प्यद्रवतितयथानत्स्वत्याधिकरणेवार्तिककारमतेमंत्रलिंगस्यैवतत्परस्य
शास्त्रतामंगीकृत्यसमंत्रवर्णप्राप्ताग्निसूर्यानुवादेनप्रजापतिसाहित्यविधानात्प्रजापतिदेवतासिद्धिःतद्वत्किमुवक्तव्यं
पदार्थयोःप्राप्तयोःसतोःसाहित्यविधानबलादन्यतरस्यान्यतरकालतासिद्धिर्भवतीति-नन्वेकतिथ्यन्वारोहणमात्रविषय
त्वासंभवेपिसमासविधेस्तत्रापितथावर्णितरीत्यैकस्याहतिथ्यन्वारोहणेअन्यस्यवाहिततिथौचान्वारोहणेतत्रापिचपदेकदिन
एवोभयश्राद्धप्रसक्तिरेवमन्यत्रापियत्रपत्न्यैकदिनेश्राद्धद्वयप्रसक्तिस्तत्रैवसमासविधिरस्तुप्रतिप्रसवत्वेलाघवादेकाति
तिथिरहितनतिथ्यन्वारोहणविषयत्वेनुगौरवमप्राप्ततंचप्रापणादितिचेत्। नहीदंमंदधावितत्वस्मिन्सोदाहरणकृत्स्नमी
मांसान्यायस्मरणशालिनांसुपरिहरमनधीतमीमांसाशास्त्राणांदुर्बोधतरंच-तथाहि-षष्ठेभ्युदयेष्ट्यधिकरणेभ्युद
येष्टिवाक्येवाक्यभेदपरिहारायदधनिश्रितेचरुमित्यतेषांचयागानामर्थान्तामनुवादोपपत्तेःसहश्रपयतीतिवाक्येविरोधा
भावात्संप्रतिपन्नदेवताकद्रव्यश्रपणमनूद्यसहत्वमात्रंविधीयतइत्युक्तं। तत्रदध्नःश्रपणाप्राप्तेःकथंसहत्वविधिरि ९४

त्याशंक्यसंप्रतिपन्नदेवताकपयःप्रकृतद्रव्यश्रपणमात्रोद्देशेनविहितस्यसहत्वस्यप्रतिप्रधानावृत्तिन्यायेनक्षीरोद्देश्यश्रप
णेक्षीरविशेषकदेवताकश्रपणेनश्रपणेधर्मविशेषकदेवताकदध्नासमंसाहित्यविधौश्रतांशेश्रपणस्यप्राप्तत्वाद्धर्माक्षेपा
भावेपिदध्यंशेश्रपणस्याप्राप्तस्यार्थादाक्षेपोभवतीत्युक्तं-तद्वच्चापिभविष्यतीत्यदोषः। अत्रतुप्रतिप्रसवत्वलाघवादर्था
क्षेपलाघवाद्वाद्देश्यसंकोचेनाप्यर्थाक्षेपलाघवाद्दूषणरूपोद्देश्यसंकोचप्रसंगः। अथतत्रप्रतिप्रधानावृत्तिन्यायसंचि
वेसाम्यान्ययाप्युक्तलाघवमनादृत्यगौरवमपिसहनेततःप्रकृतेपितथैवेति। तेनयत्रैवाप्रधानेप्रति। प्रधानावृत्त्यादिरूपन्या
याप्रवृत्तिस्तत्रैवलाघवमवतरति-यथावसंतायकपिंजलानालभतइतित्रयएवकपिंजलाविधेयालाघवादिति। किंच-श्रौतैक
घुभूतंचमतालाहश्राद्धमुद्देश्यतावच्छेदकंविहायलाक्षणिकंगुरुभूतंचएकदिनकर्तव्यमतालाहश्राद्धद्वयत्वेनोद्देश्यतावच्छेदकं
गौरवालाक्षणिकत्वाच्चेतिन्यायहृदयेउत्तरत्वदुक्तलाघवेनसत्वनिपक्षोपिपूर्वेणवत्तवान्भवति-अतएववषट्कर्तुर्भक्षाधिक
रणेलोकंपृणाधिकरणादौतत्रतन्न्यायमात्रेणसामान्यप्रवृत्तवचनसंकोचोयुक्तइत्युक्तं-तस्मात्सर्वसामासेत्वविधिरित्यन
वद्यं-नचविनिगमनाविरहाद्धर्तृतिथौपत्नीश्राद्धानुष्ठानवत्सपत्नीतिथावपिभर्तृश्राद्धानुष्ठानप्रसंगइतिवाच्यं-मदनपारि

९५ जातकारेण विशेषतोनुक्तिरिवतान्यपि एवं च यानि वाक्यानि भर्तृमरणानंतरं चिरकालव्यवधानेनान्वारोहणमुक्ताया
अपि भार्याभर्तृमरणसमकालमेव मरणप्रतिपादकान्यर्थवादरूपाणि चिंतामणिरत्नावल्यादिषु प्रदर्शितानि। सेवं सा
मान्याकारेणोदंकितानि स्पष्टमिन्नतिथिमरणविषयतयैकतिथिमरणविषयता असंभवादनन्यथासिद्धानि संदिग्धेषु
वाक्यशेषादिति न्यायापस्त्याश्राद्धस्यैव भर्तृतिथौ साहित्यविधानपरं मृताहनीत्यैव न हि वाक्यमिति ज्ञायपतीतिन वैपरीत्या
पत्तिः। यद्वा न साहित्यविधानानान्यथानुपपत्त्या एककालताक्षेपः। न चैतैरर्थवादैः संदिग्धार्थनिर्णयः। किंतु यस्य नेश्रू
यते वार्तायां वद्यादशावसरं कुशपुत्रकदाहेन तस्य स्यादवधारणमिति बृहस्पतिवाक्ये कुशपुत्रकादिप्रकारेण दाहा घो
र्ध्वदेहिकविध्यार्थमपेक्षितो मरणनिश्चय आहार्यरूपस्तस्यादवधारणमित्यनेन विधीयते एवमिहापि समासविध्यपेक्षि
तायाएककालताया आहार्यनिश्चयः पतितिथावेवास्या मरणं निश्चेतव्यमिति कालविशेषावच्छेदेनैतैर्वाक्यैर्विधीय
त इति न रकाचिदनुपपत्तिः। तेत्वर्थवादास्तत एवानिष्पाबधेयाः। अत एव मातृश्राद्धे स्पार्हबाधोपि न दोषाय। अन्यथा
नुपपन्ने साहित्यविधिबले बलेन अनन्यथासिद्धमदनपारिजातोक्तं किंतवाक्यबलेन वासिद्धत्वात्। एवमनेन वाक्येन ९५

साहित्ये विहिते भृगुवाक्येन पिंडपृथक्त्वविधानाद्गार्ग्यवाक्येन च श्राद्धपदाभिलप्यस्य ब्राह्मणभोजनमात्रस्य प्रधान
सपिंडदानस्य च पृथक्त्वविधानाद्वैश्वदेवाद्याराद्उपकारकांगेष्वेव साहित्यमवतिष्ठते। यत्तु भृगुगार्ग्यवाक्येन च श्राद्धविप्रयो
अत एव न साहित्यविधानं पिंडब्राह्मणयोरपीति हेमाद्र्यनुसारिणः। तन्न प्रयोगपारिजातकारा एकत्र विवर्दतेनास्माकं कु
क्षिद्वारः एकं नु मतमाश्रित्य स्वाभिः स्वपक्षः समर्थितः तन्मतानुसार्यपि तु गुर्जराणामनुष्ठानदर्शनेनैको ब्राह्मणपिंड
कारणात्। सर्वथापि तु मततिथ्येकत्वविषयत्वं साहित्यवाक्यस्य नारत्नीयेत सिद्धं आचारोपि च गुर्जराणामप्यस्मिन्विषयेस्य
दनुरूप एव च। पिंडैकत्वमामाताभ्यां तु वैसादृश्यमित्यन्यदेतत्। वस्तुतस्तु भृगुवाक्ये मृताहनास्युपादानेन च श्राद्धविष
यत्वस्यासंतासंभवाद्गार्ग्यवाक्यस्यापि तेन स्वविषयउपसंहारादेकमूलकल्पनालाघवाच्चैन च श्राद्धविषयतासंभवोदे
कब्राह्मणपिंडमतमापातरमणीयमित्युपेक्ष्यं अनेनैव चाभिप्रायेण। मिताक्षराकारोपि पिंडब्राह्मणैक्यं नानुमेने। तन्नहि
सपिंडीकरणव्यवस्थायां अन्वारोहणे तु पुत्रः स्वपित्रैव मातुः सापिंड्यं कुर्यादित्यभिधानंतरं तत्र येनकेनापि तुः सापिंड्ये
पियत्राष्टकादिषु मातृश्राद्धं पृथग्विहितं। अष्टकासु च वृद्धौ च गयायां च मृतेहनि। मातृश्राद्धं पृथक्कुर्यादन्यत्र पतिना सहे

९६ तित्रपितामहस्यादिभिरेव सहैकपार्वणं कर्तव्यमिति वदता न्यायरूपपत्तौ अपि सम्मता एव निरपेक्षरूपं पार्वणमेव नतु भर्त्रा स
ह ब्राह्मणपिंडैक्यमिति स्पष्टमेवोक्तमिति· यत्तु केचित् समासवाक्ये पिंडनिर्वपणमित्युक्तं पादान्तात् तदेव विविक्षितत्वा
त् समासविधानमापद्विषयं· तथाहाग्निस्मृतिरूपेण एकचित्यां समासरूपम् तयोरेकबर्हिषि पित्रोः पिंडान् पृथग्दद्या
त् सह वा पत्सु तत्सु तदिति· श्राद्धयोः समासविधानं तु मृताहनीत्यनेन अस्याविद् पिंडैक्यमात्रपरत्वात्· किंतु भर्तृगार्ग्य
वाक्याभ्यामेव ब्राह्मणपिंडादेव पृथक् कुर्यादित्यादि एवंपरत्वादित्याहुः। तद्वत्सुगार्ग्यवाक्ययोः परिसंख्यायते मृता
हनीति वाक्ये वचनवशाद् दमि सद्ये श्राद्धपदोपादानेन पिंडनिर्वपणपदस्या। पिश्राद्धपरत्वात् समासविधानस्यैवन्या
य्यत्वादुपेक्षणीयं अग्निस्मृतेस्तु भवतु नाम नित्य एव समासे सत्यपि आपदनापदोरुभययक्षस्य विधायकत्वं न तावता
काचित्क्षतिः पक्षद्वितीयमिति· अत्र च सैषाक्षिवाक्ये पृथक् नवश्राद्धं लिखितं हि तेपि पदे द्वित्वं नवश्राद्धं युगपत्तु समासप
ये दितिभृगुवाक्यं तदप्यग्निस्मृतिवदेवापद्यसंभवे विषयं द्रष्टव्यं एवं च समासविधानमाब्दिकविषयमेवेति हेमा
द्यनुसारिणः। तत्र प्रमाणाभावात्· प्रत्युत मृताहनीति मासिकेऽपि समासविधानाच्च· तां मृताहमिसंप्रासेष ९६

थक्पिंडं नियोजयेत्· प्रत्यब्दं चेति गोभिलोक्तिवद् न्यायेन मृताहनीति मासिकेषु प्रत्यब्दं चेत्याब्दिके च स्पष्टमेव
सर्वविषयसमासापवादरूपपिंडपृथक्त्वविधानेन तदपवादस्य समासस्यापि मासिकाब्दिकोभयविषयत्वाव
गमात्· यत्तु हेमाद्रिणा विषयांतरमुक्तं येषां दत्तकादीनामेकोद्दिष्टविधानं मातापित्रोः सांवत्सरिकं श्राद्धं वि
हितं तद्विषयमिति· तदपि मंदं नवश्राद्धं युगपत्तु समापयेदिति वाक्यशेषे एवं पृथगिदं तु युगपदित्येवं तु शब्देनैकपुरुषवि
षयत्वावगमात्· यत्तु स्पशेष स्पतत्रैव व्याख्यानं नवश्राद्धं धारादुपकारकं गतं तत्रेति· तदपि न तन्मते लोगाक्षिवाक्ये
न मृताहनि पिंडैक्यरूपे समासे नवश्राद्धे च पिंडपृथक्त्वे विहिते समानकालत्वादिनैव तंत्रप्राप्तौ सत्यामेतद्वचनवैयर्थ्या
पत्तेः। अस्मन्मते तु आपद्विषयत्वेन सार्थक्यमित्यवंतरमेवोक्तं· यत्तु मदनपारिजातकारादिभिः समासविधानस्य ब्रा
ह्मणपिंडैक्यपरत्वमेव हेमाद्रिवदभ्युपेत्य नेदमाब्दिकमात्रविषयं तत्र समासविधाने सति बह्वलिरिक्ते पुनर्नवश्राद्धग
यान्वष्टक्यादिष्वर्थात् पृथक्त्वसिद्धौ पुनर्नवश्राद्धे पार्थक्यविधेः परिसंख्यया अन्वष्टक्यादिष्वाब्दिके चैव समासेनैवानुष्ठा
नमिति किंचिद्विलक्षणमभ्युपेतं· तदस्माकमधारादुपकारकागमं च तारूपस्यापि समासस्यान्वष्टक्यादिष्विष्टत्वाव

१७ थं चित्तुल्यमेव॰ इयांस्तु विशेषः। मममासिकवार्षिकयोर्न्यायप्राप्तस्य तंत्रस्य पूर्वकस्य मलमासादावित्यादिना योदितस्य
मलाहृनि समासेनेत्येनेन पुनः प्रतिप्रसवः। आन्वष्टक्यादिषु तु न्यायप्राप्तस्य तंत्ररूपसमासस्यैव सिद्धत्वात् तन्मध्यपतिते
नवश्राद्धे पृथक्त्वस्यापूर्वस्यैव विधानात्र परिसंख्यानापि तद्धानन्वष्टक्यादिषु समास इति॰ तेषां तु पिंडब्राह्मणयोर्दैव
ताभेदेन साम्यापवत्संप्रतिपन्नदेवताकत्वाभावात् प्रधानत्वाच्च निरपेक्षे देवताबाधु प्रसंगाच्च पिंडब्राह्मणे कथं न विधिमं
तरेण न्यायतः प्राप्तमिति विधिनैव विधातव्यं॰ तत्र गौरवं॰ कृष्णासौ विधिः नवश्राद्धे पृथगिति परिसंख्यया तत्कस्य नेतावत्स
एव दोषः। मलाहृनि समासेनेत्यस्यैव तत्र तात्पर्यं मलाहृपदं विवक्षितं न वा॰ तदविवक्षायामन्योन्याश्रयं वार्षिके पिंडे कथं वि
धौ हि इतरत्र सर्वपृथक्त्वसिद्धेन नवश्राद्धे पृथगित्यस्य परिपरिसंख्यात्वं संभवति च परिसंख्यात्वे मलाहृपदाविवक्षेति॥ तद्विवक्षा
यां त्विष्टासिद्धिः। तस्मादस्मन्मतमेव न्याय्यः। न तु भवन्मतेपि मलाहृनाम्नुद्देश्यविशेषणविवक्षायां वाक्यभेदापत्तिः। ना
जातपुत्रकृष्णकेशपदाभ्यामिवाहस्याविशेषस्य मलाहृनि पिंडं निर्वपणमित्येताभ्यां लक्षितस्य मासिकवार्षिकरूपमला
हश्राद्धविशेषस्योद्देश्यत्वात्॰ अन्यथा तवापि मलाहृपदस्याविवक्षितत्वे पिंडनिर्वपणमात्रमुद्दिश्य समासविधौ पृथक्त्वन १७

वश्राद्धमित्यस्य नानूयाजेष्विति वत्पर्युदासत्वं एवस्यान्न तु परिसंख्येति॰ नन्वेवमपि नास्य समासविधानस्य मासिकविषय
मपि वार्षिकविषयत्वमेव तु युक्तं॰ पूर्वकस्य मलमासादावित्यस्य न्यायप्राप्तसमापवादस्य सर्वैरपि वार्षिकविषयत्वाभ्यु
पगमात् तदपवादरूपत्वाच्च समासविधानस्य मासिकेषु तु न्यायत एवान्वष्टक्यादिष्विव तंत्ररूपसमासप्राप्तेः पुनस्तद्विधा
नवैयर्थ्यादिति॰ अस्तु एवमपि नास्मत्पक्षस्य काचित्क्षतिरनुष्ठानतो स्यात्॰ अस्मिंश्च पक्षे तां मलाहृनि संप्राप्ते पृथक्पिंडे
न्नियोजयेत्॰ प्रत्यब्दं चेति भृगुवाक्यस्य प्रागुक्तहेमाद्र्युक्तोक्तादत्तकादिविषयत्वे वागस्याभ्युपेयेति॰ अन्ये तु अनन्वारोहणे
पि युगपदनेकमासिकप्रसक्तौ न्यायतः प्राप्तस्य तंत्रस्य परिसंख्यया मासिकेष्वपि पुनः समासविधानस्यार्थवत्त्वात्॰ अस्मिं
स्तु पक्षे पूर्वोक्तमेव तां मलाहृनीत्यस्य हेमाद्र्युक्तदत्तकादिविषयत्वं तानि रसनमनुसंधेयं॰ तदिदं पुनराब्दिकमात्रविषयं समा
सविधानमिति वादिनो निरस्यं इति॰ यथा हि मेहेकसाधिकरणे उभयासधिकरणे च एकस्मिन्नेव वाक्ये विधिपरिसंख्यो
भयासंभवो विहितः एवमिहाप्यार्ब्दिके प्रतिप्रसवो र्थो विधिर्मासिकेषु च परिसंख्येत्येकस्मिन्वाक्ये न युक्तमिति॰ तदपि मा
सिकाब्दिकोभयविषयत्वादिनः प्रत्याचष्टे॰ तत्र हि एकमेव संमत्यादुभयस्येवातेपि च शरावरतिपरिसंख्यापाएका

९८ नेकयोर्भयानुभयोश्च संमार्गप्राप्त्याभाव्यं सर्वत्रानेनैव विधिनाग्रहं संपत्त्याद्यविरात्रौ वपंचशरावरसैवं कर्तव्या युगपच्चे
दसुभयं विप्रतिपिद्धमित्युक्तं । इह तु अन्वारोहणमासिकेष्वेव समासो न त्वन्यमासिकेष्विति परिसंख्ययापेक्षितामासिकमा
त्रे समासप्राप्तिर्न्यायत एव सिद्धं · न त्वनेनैव विधिना क्रियत इति वैषम्यं अनीश न्वारोहणे सति मृताहनि पिंडनिर्वपणस
मासेनेसेवं सामान्यतपि धौ सत्याद्विकांशे फलतः पतिप्रसवेपि मासिकांशे वफलतः परिसंख्या खेपि न कश्चिद्दोषः ॥ एवं
तु विचारमार्गमात्रमस्माभिः प्रदर्शितं मीमांसालमतिभिस्तु सुखं न्यायांतरविचारणामप्यन्येमान्यतरपक्षावधारणापा
त्रयमितव्यमित्युपरम्यते · इदं च समासविधानं सपत्नीमातुरप्यन्वारूढाया मृताहनि यदि हि जनन्यन्वारोहणं एवापवि
धिरूत्तदापि त्रौरि तिब्रूयात्तदं पत्योरिति · तत्राप्यपुत्रायाएव । तत्र्वा ज्ञसैर्वैव वश्यकत्वात्तस्मासस्यैव विधानेलाघवात्स
पुत्रसत्त्वविशेषश्रवणादावश्यकत्वावसार्वणतायात्र प्यतिदेशमित्युक्तिः शेषाचाराज्ज्येष्ठानामपुत्राणामपि पितृव्या
दीनां पार्वणं वदंति · प्राच्ये ताः । सपिंडीकरणादूर्ध्वमेकोद्दिष्टं विधीयते · अपुत्राणां च सर्वेषामपत्नीनां तथैव च · अपत्नीना
मस्कृतविवाहानामिति हेमाद्रिः । इत्यादि वचनानां तु कनिष्ठविषयत्वमिति · केचित्तु भ्रातृभगिनीपुत्रापस्थ्यश्वशुरेमातुलादय ९८

च पितृव्यगुरवेश्वाद्यमेकोद्दिष्टं न पार्वणमिति त्रिवचनवदन्यविषयमित्युक्तमतिप्रपंचेन · तदयं सिद्धांतसंक्षेपः । एकस्याम
थभिन्नासौ तिथौ कारणांतरेपि या · अन्वारूढजनन्यास्तु सपत्न्याश्चापि याः षिकं · पार्वणेन विधानेन निश्चेदेकादिनं
यतः । पिंडब्राह्मणभेदेन समासविधितो भवेत् · मासकादिष्वेवमेवन्यायतो नुष्ठितिर्मता · अपवादान्न वश्याद्धे एथक्
एथकनुष्ठितः । न चाप्यसंभवेतंत्रं वार्षिकादिषु वाचरेत् ॥ ॥ इति श्रीमत्पदवाक्यप्रमाणपारीणमीमांसाद्वैतसौ
म्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरोत्रीतेद्वैतनिर्णयेऽन्वारूढस्पाहनिर्णयः ॥ ॥ प्रौष्ठपदीश्राद्धे मातामि
हा भवंति न वेति विप्रतिपत्तौ भवंतीति केचित् · तथा हि · कात्यायनदर्शे पितरोपत्र पूज्यंते तत्र मातामहा अपि अविशेषे
ण कर्तव्यं विशेषांतरकं अंजेदिति गौतमवचनात् · हेमाद्रावप्येवं धौम्यवचनमत्रेनोक्तं · न च तत्र पितरइति बहुवचनं श्रू
यते · न बहुवचनरूपस्य बहुत्वसंभवन्तीति पितृप्रमुखानां पितामहप्रपितामहानां च पितृशब्देन लक्ष्यंते · यथा प्रथमयोः
पूर्वसवर्ण इति प्रथमाशब्देन द्विवचनांतेन प्रथमाद्वितीये लक्ष्येते · न च प्रौष्ठपदीश्राद्धे पितृपितामहप्रपितामहत्रयं
देवता किंतु चतुर्थपंचमषष्ठाः श्राद्धांतरे लेपभाजो नांदीमुखसंज्ञाः । तदुक्तं स्मृत्यर्थसारे नांदीमुखसंज्ञकाः । परतो नांद्योऽष्टपर्ष

९९ यद्येतदिति। तथा पदद्विलक्षणो विना पितर इति बहुवचनमनुपपन्नं स्यात् तस्मात् पित्रादित्रयलक्षणा स्यात्। न त्वेतद
स्ति। अस्ति हि पितृशब्दो जनकपुंवचनोऽपि। अस्ति च। सपिंडीकरणात् श्राद्धजन्यवस्तुद्विभाववचनोऽपि। तत्र द्वितीयो
यो मिताक्षरायां पितृपात्रेषु प्रेतपात्रं प्रसेचयेदिति सपिंडीकरणश्लोकविवरणे स्पष्टमुक्तः। अतः सपिंडीकरणात् श्रा
द्धजन्यपितृभावापत्तिपर एवायं पितरो यत्र पूज्यन्त इति बहुवचनात् पितृशब्दो भवतु स हि मिलितं बहुवचनोऽत एव। तेन
लक्षणां विनैव बहुवचनमनुपपन्नम्। अस्ति च नत्विति तत्त्वे चतुर्थादिषु प्राप्तिर्मोक्षपदीश्राद्धे मातामहादित्रयस्यापि देवतात्वं यु
क्तमेवेति पूर्वपक्षः। सिद्धान्तस्तु पितरो यत्र पूज्यन्त इति पितृशब्दो बहुवचनान्तो लक्षणया जनकादित्रयपर एव न सपिंडीक
रणात् श्राद्धजन्यपितृभावापत्तिपरस्तेन मोक्षपदीश्राद्धे मातामहानां देवतात्वं स्यात्। तथा हि यद्यपि मुख्यसंभवे लक्ष
णायुक्ता तथापीह लक्षणयामेव प्रयाणमस्ति तदेवं च मुख्यग्रहणे बाधकस्तीति पित्रादित्रयलक्षणैव न्याय्या। छंदो
गपरिशिष्टे हि कात्यायनेनोक्तं। कर्पूसमन्वितं सपिंडीकरणं अनेनोक्तं थाल्कर्पूसमन्वितादिषु मातामहश्राद्धं विधत्त इति
चोक्तं भवतीति तत्र समाने षोडशश्राद्धदेवतानां सपिंडीकरणात् श्राद्धजन्यपितृभावापत्त्यभावान्मातामहानां पितरो य ९९

त्र पूज्यन्त इत्यनेन विध्यभावादप्रवृत्तौ निषेधोऽनुपपन्नः। न च सिद्धान्तेऽपि षोडशश्राद्धेषु पित्रादित्रयाभावात् कथं माताम
हादिप्रसंगो येन निषेधः स्यात्। सत्यं। पितरो यत्र पूज्यन्त इत्युद्देश्यपित्रादिबहुत्वस्य विवक्षितत्वेन न सिद्धान्ते माताम
हादिप्रसंगस्तन्निषेधो युक्तः। न चैवं पितुरेकोद्दिष्टेऽपि चतुर्दश्यादौ मातामहादिप्रसंगः शस्त्रहतस्यैवेति
नियमादिति। किंच। पितरो यत्र पूज्यन्त इति पितृशब्दो यदि सपिंडीकरणात् श्राद्धजन्यपितृभावापत्तिवचन
स्तन्तः अन्वष्टक्यं गयायां प्राप्ते सत्यां यच्च मृतेऽहनि। मातुः श्राद्धं सुतः कुर्यात्। इति नर्पिपितृकजीवतो तिम्नैत्रायणीयपरिशि
ष्टविहिते जीवत्पितृकस्यान्वष्टक्ये मातृपितामहीप्रपितामहीत्रयीदेवताकेऽपि मातामहादित्रयविधिः प्रसज्ये
त। तस्यैवेते। न स्यात् पितरो यत्र पूज्यन्त इति पितृशब्दो जनकादिपरत्वे तु तत्रैव तन्नैव मातामहादिविधिरिति
मोक्षपदीश्राद्धे जनकाद्यभावात् मातामहादिविधिरिति। अत्र पिच। सर्वगृह्यसूत्रस्मृतिपुराणेषु दर्शश्राद्ध
एवाविवक्षेति कर्तव्यतामनानामदेयसर्वश्राद्धानां प्रकृतिरिति निष्पन्नम्। प्रतिपदादिश मातामहाद्यश्च थोम
वाक्येन पित्रादिसमुच्चितादेवतात्वेन विधीयन्ते पदद्वयेऽपि वा वाक्येन मिश्रमतेग्निसूर्यसमुच्चितप्रजापतिवत्

१०० अतः पित्रादिप्राप्तिप्रतीक्षित्वाद्विरूढतापस्या प्रासिकालवैषम्येण च प्रकृतौ च्चाद्विरुक्तस्यादितिन्यायेन वर्षर्ण
तादिवत्प्रकृतौ दर्शश्राद्ध एवायं मातामहाद्युपदेशः। ततस्तु पत्नेदेवतांतरेणोपदिष्टं तत्रैव संक्रांतियुगादिमन्वादिश्रा
द्धपित्रादित्रयवन्मातामहाअप्यतिदिश्यंते प्रोष्ठपदीश्राद्धे तूपदिष्टैश्चतुर्थपंचमषष्ठपुरुषरूपदेवतांतरैर्विशेषा
दतिदिष्टाः पित्रादयइव मातामहादयोपि बाध्यंते प्रसाम्नातेन शरैरिव कुशाः। अत्र कश्चित्। धौम्यवाक्ये पित्राद्युपया
देनतत्समुच्चितमातामहादिदेवतामात्रेन विधीयते पितरोयत्र श्राद्धे पूज्यंते तत्र मातामहादयोपि पूज्या इति किंतु पंचक
ले निमित्ते फलं वा पितरः पूज्यास्तेन तत्र मातामहादयोपि पूज्यंत इत्येवं वचनव्यक्त्या पितृश्राद्धसहचरितं मातामहादिश्राद्ध
मेव पूज्यत्वं विधीयते। तच्चेदं श्राद्धप्रकरणाच्छ्राद्ध एव विधानं पिंडपितृयज्ञतर्पणादावितिदेवतामात्रविधिवादिनासहावि
शिष्टं। ततश्चेदमपि सप्राथाम्येन विहितं। तच्च पितृपार्वणविकृतिः। याज्ञवल्क्येन मातामहानामप्येवं तंत्रं वा वैश्वदेविक
मित्यतिदेशात्। एवं च तंत्रताप्युपपन्ना श्राद्धद्वयांगस्य तुल्यस्य प्रमातामहादितंह्र चमासंभवात्। पितरोयत्र पूज्यंत इति श्राद्धमा
त्रमुपलक्ष्यते न पित्रादिप्राप्त्यप्रतीक्षित्वान्न प्रकृतौ वेतिन्यायः। अतः प्राकृपदीश्राद्धसमहचरितं तथापि मातामहश्राद्धवि १००

धिरुपपन्नः। एवं संक्रांतियुगादिमन्वादिश्राद्धादिष्वपीति। अत्र ब्रूमः। एवं चेन्मुख्यपितृपदार्थसपिंडीकरणांतश्राद्धज
नन्यपितृभावापत्तिपरतां भवतापि सत्येव श्राद्धमात्रोपलक्षणत्वांगीकारात्। न च तावतापि तु स्यो दोषस्तत्र जहत्स्वार्थलक्ष
णापत्तेः। ममाजहत्स्वार्थत्वाभ्युपगमात्। अहत्स्वार्थतापि ममबद्धवनमात्रान्वपायपितृमात्रस्यैव तु वाक्यार्थः। अर्थोन दुष्ट
इत्युपक्रमे वास्माभिः। किंच तव श्राद्धांतरविधाने गौरवं मम तु देवतामात्राविधानाल्लाघवं। अतश्च मया वैश्य एकैव
याग्निहोत्रहोमो देवतानुरोधेन मभ्यस्यते यथा वा रुद्र वा यथाग्निग्रहदेवतानुरोधेनैक एव सोमेन यजेतेति यागोभ्यास
ते। यथा वा इंद्र वा य्वादि देवतानुरोधेनैक एव सोमेन यजेतेति यागोभ्यस्यते एवं ममापि श्राद्धं कुर्वीतेति विहि
तमेव श्राद्धं पित्रादित्रयस्य मातामहादित्रयस्य च प्रत्येकं निरपेक्षद्देवतात्वावेदकप्रमाणबलादभ्यस्यते। एषां च षण्णां प्रत्येकं
देवतात्वावेदकानि प्रमाणानि हेमाद्रावुक्तानि। तत्र श्रुतिः। असावेतत्त इति यजमानस्य पित्रे असावेतत्त इति पितामहायासावेत
त्त इति प्रपितामहायेति। आश्वलायनः। पितरिदं तेअर्घ्यं पितामहेदं तेअर्घ्यं प्रपितामहांदीनामपि प्रत्येकं देवतात्वे प्रमा
णं। मत्स्यपुराणे पिंडान्वाहार्यप्रयोगे प्राचीनावीतिना कार्यमतः सर्वं पितामता। पदूचनस्माद्धविः शेषात्पिंडान्कृत्वा तथो

१०१ दर्कं। पुलस्त्योप्याह। मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः। तेषां तु पितृवच्छ्राद्धं कुर्युर्दुहितृसूनवः। अत्र पितृवदि
तित्रयाणां मध्ये कं देवतात्वमावश्यकं संचोच्यते। अत्रापि श्राद्ध एव श्राद्धे ते पितृवदित्येव विशेषणपरेण विधिना विधीय
ते नु श्राद्धान्तरं। एवं मातामहानामप्येवमिति। यास्तवश्चेयवाक्येपि। तेंत्रं वा वैश्वदेविकं स्यानेनापि यावास्यार्थभूता आवृत्ति
रेव वैश्वदेवस्य विधीयते। इयांस्तु विशेषः। श्राद्धभेदवादिनस्तान्त्रिकावृत्तिर्मतं तु मातामहादिव्यपदेवताभेदनिमित्ते
ति। आवृत्त्यभावे तु तंत्रतां सकृदनुष्ठानरूपकर्मैक्यादेव सिद्धेति कर्मद्वयपक्षे तु सातंत्र्यान्यापसिद्धेरयेनावान्विशेषइतिक
र्मैक्यपक्षस्तु वस्तुतः पितृभ्यस्तदनुभक्त्या श्राद्धमुपक्रमेदिति कर्मप्रदीपवचनाद्यवगम्यते। न चास्य कर्मोत्पत्तिपरतात
था सति प्रत्येकदेवतात्वावेदकस्य वैकिंचाक्येमिचयवत्रगसितृभ्यद्स्यस्यानेकदेवतापरतान्नानादेवतान्वाप्यस्पवो स्पाहतिक
स्याआग्नेयवाक्यगतनानाकारत्वात्पत्तकर्मभेदकत्वं स्यादिति वाच्यं। तथा सति षट्कर्मापत्तेस्तद्भिमतकर्मद्वयासिद्धेः
। तस्मादेवं विधानां वाक्यानां गुणविधित्वमेवेति सर्वैरप्यवश्यमभ्युपगमनीयं। एवं सति पद्माहिणाश्राद्धकस्येमाता १०१
महानामप्येवं तंत्रेण वैश्वदेवेकमिसस्य कुर्मातरस्विधानमपि तोक्तासानादरणीया देवतामात्र विधापितमाप्युपपतेः

न्नत्वात्तेष्टसिद्धेश्च। कर्मद्वयपक्षे वा निष्पत्तेः पितरो यत्रैव सत्रहि पितरो यत्रे यत्र हि पित्रविचक्ष्यपाश्राद्धमाचो
पलक्षणे जीवपितृकस्यान्वष्टक्ये पितामातामहस्याप्रतिः। तद्याचमेपि तदक्येव श्राद्धं यत्र तत्र मातामहादिश्रा
द्धविधौ स्यादिति दिशि कपित्रादिष्वास्ये येक्षितिवास्त्रकर्तौ वाद्विरुक्तत्वादिति श्चायायां तस्या मातामहानामिसमावास्य
श्राद्धएवमातामहश्राद्धविधिवशेन धौम्यवाक्यस्यामिविशेषउपसंहारोदंगत्वाभावेन वान्येवादिति कतावग्ना
षोमीयादेरिव मातामहादिश्राद्धस्य संक्रांतिपगादिमन्वादिश्राद्धेष्वतिदेशो न स्यादिति। तस्मात्सोष्पदश्राद्धेमे
न्यामातामहादयं॥ ॥इतिस्वाधिनमस्याभिन्नार्थपतेपार्थवाक्यतः॥ ॥इतिश्रीमत्सदवाक्यप्रमाणात्सजभभदृशं
करकृतिधर्मद्वैतनिर्णये श्रीमत्पदीश्राद्धेमातामहसन्द्रावसंशयोद्देदपारछेदः॥ ॥काम्यदर्शे सौम्याप्तिः नामान्त्रचौ
लगोदानसीमंतोन्नयपुंसवे। स्नानाधानविवाहेषु नांदीश्राद्धं विधीयते। इति गार्ग्यः। अग्न्याधानाभिषेकादौ विष्णुपू
जैष्टिया कृतौ। वृद्धिश्राद्धं प्रकुर्वीत आश्रमग्रहणे तथेति। अत्र केचिद्दाक्षिणात्याः जनपितृकस्याधाने वृद्धिश्राद्धं न
भवति। विवाहपुत्रजनने पित्रेष्ट्यां सोमिके मखे। तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुरिति मैत्रायणीयपरिशिष्टे जी

१०२ वतः पितुः पुत्रस्याषट्स्वेवस्थलेषु पित्र्येधिकारोक्तेः। तत्र विवाहोद्दिलास्यादिः। स्वस्य आद्ये पुत्रविवाहे पितुरेवाधि
कारात् तस्य च जीवत्पितृकस्य पुत्रजननोपलक्षितसुतसंस्कारमात्रेधिकारोक्तेश्च वसिष्ठेः। पित्र्येष्टयां चातुर्मास्यान्तर्गतायां
॥ सौमिके मखे तानदीयस्य सवनिके पुरोडाशखंडेः स्वचमसाधस्तात् पिंडदाने। तस्मात्षड्विति नियमाः। जीवत्पितृकस्याग्न्या
धानरुद्रानुष्ठाने नववेश्मप्रवेशाश्रमान्तरस्वीप्रधाने श्राद्धदानादौ जीवत्पितृकस्याधिकारस्तत्र सांग एवाधिकार इ
तिषड्ग्रहणमुपलक्षणं। अन्यथा सपितुः पितृकृत्येषु नाधिकारो विधीयत इति कात्यायनवचनेन जीवत्पितृकस्य निषेधे
प्राप्ते मैत्रायणीयवाक्येन जीवत्पितृकोपि विधीयते षट्स्वेवेति च परिसंख्यायत इति वाक्यभेदः स्यात् त्रिदोषा च परिसंख्या
स्यात्। तथा मैत्रायणीयपरिशिष्ट एव। आन्वष्टक्यं गयायां मासि सांपञ्चमतेहनि। मातुः श्राद्धं सुतः कुर्यात् पितर्यपि च जी
वती ति श्राद्धांतरे जीवत्पितृकस्याकारविधानादपि षड्ग्रहणमुपलक्षणं। अतो विवाहे पुत्रजनन इति पूर्वार्धोपात्तवि
वाहादिचतुष्टयोपादानं यत्र प्रधाने जीवत्पितृकस्याधिकारस्तदंगपित्र्यमात्रमुपलक्षयति सा ज्ञा स्यात्। उत्तरार्धे तु तीर्थे
ब्राह्मण आयात इत्येताभ्याम् अन्यानंगभूतस्वतंत्रश्राद्धलसामान्याभ्यां पुनरान्वष्टक्यं गयायां मासो मातृश्राद्धं मातामहाद १०२

श्राद्धं चोपलभ्यते। न नूतरार्धे स्वतंत्रश्राद्धमात्रोपलक्षणे हरदः श्राद्धसंक्रांतियुगादिमन्वादिग्रहणादिश्राद्धेष्वपि जी
वत्पितृकस्याधिकारः प्रसज्येत मात्रान्वष्टक्यादित्रयस्यैवोपलक्षणे तु दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपाक्षिकं। न जीवत्पि
तृकः कुर्यादिति तेः कृत्स्नेश्च तर्पणमिति मैत्रायणीयपरिशिष्टे दर्शापरपाक्षिकश्राद्धयोः प्राप्त्यभावात् निषेधोनुपपन्न इद्ध
भयतः पाशारज्जुः उच्यते। तीर्थे ब्राह्मण आयात इति तीर्थग्रहणेन प्राप्तं गयाश्राद्धमेवात्र निषिध्यते। तत्र तु दर्शश्राद्धा
परपक्षिकनिषेधो दृष्टांतमात्रतयोक्त इति मात्रान्वष्टक्यादिचयोपलक्षणपक्ष एवात्र ज्यायान् त्रिदोषत्वादिति। एवमेकेन
प्रकारेणाधानादिमात्रान्वष्टक्यादित्रयोपलक्षणपक्ष एवात्र ज्यायान् त्रिदोषत्वादिति। एवमेकेन प्रकारेणाधानादिषु जीव
त्पितृकस्य नांदीश्राद्धप्राप्तिरुपपादिता। अथ प्रकारांतरं तत्प्राप्तिरूपं वर्ण्यते। तथाहि। विवाहे पुत्रजनन इत्यनेन वा
क्येन प्राप्तेषु विवाहाद्यंगभूतेषु तीर्थब्राह्मणागमननिमित्तयोश्च श्राद्धयोः जीवत्पितृकः कर्ता विधीयते। तत्र पुत्रजननं इ
त्युपादानाद् वृद्धिश्राद्धे पुत्रजनननिमित्तके स कर्ता विहितः। इतरेषु त्वाधानाद्यंगभूतेषु आभ्युदयिकेषु वृद्धिश्राद्धस्य वाचनि
कः सर्वांगातिदेशः श्रूयते। पारस्करः। निषेककाले सोमे च सीमंतोन्नयने तथा। ज्ञेयं पुंसवने श्राद्धं कर्मांगं वृद्धिवत्कृतमि

१०३ ति॰ अत्र सोमग्रहणमाधानाग्निहोत्रादेः कर्मणामुपलक्षणार्थमिति हेमाद्रिः। तत्रत्याधानाद्यंगभूतेष्वाभ्युदयिकेषु शुद्धि
श्राद्धधर्मातिदेशादितरधर्मवर्ज्जं जीवत्पितृकः कर्त्रापि विवाहे पुत्रजन्मनि इत्यनेन विहितोऽस्तीति दिश्यत इति न किंचिदनुपपन्नं॥
इति श्रीमत्सकलप्रमाणपारावारपारीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरकृते धर्मद्वैतनि
र्णये जीवत्पितृकस्याधानादौ नांदीश्राद्धसंशयोच्छेदपरिच्छेदः॥ ॥मीमांसासरोजमकरंदास्वादनैलंपटो हंसः स्वीययशः
सिताद्यमनेरलान्यरूपाभिधीवाग्देव्यागतमस्तरीविषमयं निसानुरक्तं भजन्त्रो मुंचन्नविमुक्तकं बोजयते श्रीभट्टनारा
यणः॥१॥ अन्नं कुर्वन्नलंगाधतमूजस्यानलं कुजितं। विचैः पवित्रैः श्यारिचैर्वसिष्ठाद्भिगापयः॥२॥ विबुधानंदसं
दोहहेतवे तत्तनूद्भवः॥ मीमांसाद्वैतसाम्राज्यनीतिज्ञो भट्टशंकरः। दक्षिणास्य यतेः स्थित्या धर्मेषु द्वैतनिर्णयं॰ तनुते सोऽति
गास्यैवनाचमान्यः कथंचन॰ इत्येतदर्थयेनान्यस्वार्थनायं बुधे पुनः॥ शंकरः कौरवदत्तेऽलसिद्धांतमञ्जनाविशः॥३॥ छिन्न
हस्तस्याधानादावधिकाराभावान्नादृश्ये ज्येष्ठे सोदरे सति कनिष्ठस्याधानमुत्तरधिकसंगस्याधिकारोऽस्तीति कनीयसा कृते यं॥
धानसोमादौ न तस्य परिवेत्तृत्वं न वा ज्येष्ठस्य परिवित्तित्वं॰ तथा च त्रिकांडमंडनः। परोक्षदोषसंभासीनयश्च्येष्ठ कदाचन॰ १०३

स च दोषः प्रपंचेन सम्यगत्राभिधीयते दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहं॰ अग्निहोत्रं विवाहं च प्रयोगे प्रथमे
स्थितं न कुर्यात्तु न केज्येष्ठे सोदरे वाप्यकुर्वति॰ क्षेत्रजादावनौरसे विद्यमानेऽपि सोदरे। नाधिकारविधानोऽस्ति विप्रौ दर्वे
पिचौरसे॰ पंग्वंधमूककवधिरपतितोन्मादकदूषणे॰ सन्यस्तेच्छिन्नहस्ते दोषरोगादिदूषणे॰ जनके सोदरे ज्येष्ठे कुर्यादेवे
तरः क्रियां। तयोस्त्वनधिकारित्वात्तेन स्यादधिक्रियाक्षतिरिति। अत्र प्रयोगे प्रथमे स्थितमिति दर्शेष्ट्यादिसंबंधासं
भवादाधानं तत्पर्यंतं च विवाहं इत्यनेनैवान्वेति॰ शास्त्रदीपिकायां च षष्ठेऽध्यायेऽस्य स्पष्टं प्रतिसमाधेयमंगवैकल्यं सन कथंचित्
क्लोऽपि कर्तुमिति न कादमे घ्यधिक्रियते नित्ये त्वाहिताग्निश्चेद्यथाशक्ति कुर्वन्नधिक्रियत एवेति आहिताग्निश्चेद्विशे
षणोपादानाद्गम्यते कल्प्यात्सर्वमाहिताग्निविषयं यथाशक्त्यधिकारं वदन्नाधानात्पूर्वमंगवैकल्ये आधानादावनधिकारमभि
प्रैतीति इदमेव स्पष्टीकृतं तंत्ररत्ने षष्ठे तृतीयपादाद्यधिकरणे एवं चाप्रतिसमाधेयांगवैकल्यो पंग्वादिमान् अधिक्रियते
एवमाधानं तु न कुर्यात् न स्यान्नैमित्तिकत्वादिति॰ यत्तु अंत्यसधानिषोत जातपुत्रः कृष्णकेशोऽग्नीनादधीत इति श्रुतिर्व
दादेव सर्वांगोपसंहारासमर्थानामनधिकारनुः। कृष्णकेश इत्यनेन दीक्षाऽन्यावेक्षविष्णुक्रमणपूर्णाहाश्चाहरण

१०४ द्विविधिसमर्थशरीरवत्त्वं घोचपत्नीत्वि· किंच आधानेपि विशेषलक्षित्वाहः· तत्र स्वयजमानकर्तृकारणिप्रतिपद्य हुकर
णीभूतमंत्रवर्णबलादनधिकारोवगम्यते। मंत्रस्तु· आरोहतं दशतं शक्वरीर्ममर्तेनाग्न आयुषा वर्चसा सह ज्योग्जीवंत उत्त
रामुत्तरां समां दर्शमहं पूर्णमासं यज्ञं यथा यजै इति॥ अत्र च न यपि दशति प्रगृह्य सैव सामान्यतः सूत्रकारेणोक्तं तथापि मंत्र
भाष्यकारेण हे अरण्यौ युवां मम दाशतं दशसंख्याकाः शक्वरीरंगुलीरारोहतमिति व्याख्यानात् सूत्रधाप्युक्तकारेणापि
तद्दशानुसृत्य हस्तयोः साध्यत्वमरणिप्रतिग्रहस्योक्तं· अत एव यद्वत्तिकाराणामपि प्रमाणिकानां हस्ताभ्यां प्रतिगृह्यैव व्याख्या
नं सर्वत्रिकं देश्यतेनून्वनाहिताग्निनामाउपपातकेषु परिगणनाबाधानस्य नित्यत्वावगमात् शूद्रस्य क्वांगसामेध्यापिकृतो
नांमाधानादीनामप्यधिकारः स्यादिति चेन्न· उच्यते· अग्निहोत्रादीनामाधानेन सह विशिष्टविनियोगपृथक्त्वपरस्परानपेक्षवि
धिद्वयवत्त्वादन्योन्यनैरपेक्ष्येणैव नित्यत्वकाम्यत्वसिद्धिः। तेन तत्र विहायापि काम्यप्रयोगं यथा शक्तं गोपसंहारेण नित्य
प्रयोगो युज्यते· एवं काम्यत्वसिद्धिः। तेन तत्रापि विहायापि काम्यप्रयोगं यथाशक्त्यंगोपसंहारेण नित्यप्रयोगो युज्यते आधाने
आधानेतु। दैवात्यकन्यायेन वसंतादिवाक्यस्य चोत्पादकत्वात्तत्र चाग्नीनामुत्पादनमात्रभावनाभाव्यत्वसंभवेतः। काम्यत्वे · १०४

न तत्स्यापेक्षितत्वेवाग्न्यर्थत्वानुपमर्देन अनाहिताग्नितायाः प्रत्यवायार्थत्वं वो धयता वाक्यांतरेणाधानस्य नित्यताक्षि
प्यते· ननु काम्यत्वनैरपेक्ष्येण तथा सत्यग्न्यर्थत्वाभावात्प्रत्यवायपरिहारार्थतया नित्यप्रयोगो आहवनीयादयोनोत्प
द्येरन्नेवं च सत्याधिकृताधिकाराश्चान्यर्थतया काम्ये प्रयोगे धिकारिणः। सर्वांगोपसंहारसमर्थस्यैवाग्न्याधानादेर्नित्यप्रयो
गपि नाम्युपरत॥ करणात्तस्येवानाहिताग्नितापाप्रत्यवायआधानात्मानुष्ठाने च तत्परिहार इत्युच्यते न चैवं समर्थस्याप्या
हवनीयाद्यकामिनोनावश्यकतापत्तिरिति वाच्यं· अविदुषस्तत्र एवामधिकाराद्विदुषस्तत्र कत्वनामावश्यकत्वात्तदर्थाह
वनीयाद्युत्पत्तेरप्यावश्यकत्वात्तदर्थाधानस्याप्यावश्यकत्वानपायात्· संगिरते हि जैमिनीया अपि फलतो नित्यतामाधाना
ध्ययनयोः। नन्वेवं सति विदुषः समर्थस्यान्यापत्तएवाधानापेक्षफलसिद्धेः कुतं नित्यताबोधनेनेति वाच्यं· न सत्रावश्यक
त्वे नित्यत्वं वा साक्षाच्छ्रूयते यत्र विप्रत्यवायपरिहारार्थतयैव च श्रूयते तत्रानाहिताग्नितायाः प्रत्यवायः तत्प्रत्यवायः तत्परि
हारोन्याधानानुष्ठाने कल्प्यते एव· प्रत्यवायश्चानुष्ठानेच तत्परिहारस्आहवनीयायुत्पादनद्वारेणापतः प्रमाणांतरतो वा
वगत इत्यर्थवन्नित्यताबोधनं· यत्र तु पाक्षिकप्रत्यवाय एव नित्यकर्मणोकृतं तत्र तेनाहिताग्नितायाः प्रत्यवायार्थताश्रव

१०५ णमाधानननुष्ठाने क्षेपयापक्षस्याभावप्रतिपादनद्वारायोलस्यापापक्षयार्थतामेवप्रभाषायमिनन्वयदापक्षयोन्याय
तः प्रमाणांतरतो वाबगम्यत इत्यर्थवदेवनित्यताबोधनेऽन्यथात्या धानाननुष्ठानेऽआहवनीयाद्यएवनो सयेरनूतहु
प्रसयायोसपतिः पापक्षयोवासति तस्मिन्वचनेऽआधानामनुष्ठानेऽआहवनीयादयोपिनोसयतेप्रत्ययायश्चोसयने
पापंवानक्षयपतेऽअ उंनुष्ठानेतुतद्विपरीतमितिसमर्थप्रसेवानाहिताग्निनेसुपपातकमध्यपाठस्यप्रयोजनंसमस्तीतिने
नद्दशादंगवैकल्येनासमर्थस्याप्यधिकारसिद्धिः। अपिचाश्रुतितः केवलकाम्यत्वावगमेन सर्वांगोपसंहारसमर्थस्येवा
धिकारेस्मृतितश्च नित्यत्वस्याप्यवगमात्किंचिदंगहानेनासमर्थस्याप्यधिकारोऽश्रुतिस्मृतिविरोधेतु श्रुतिरेव बलीयसी
तिन्यायेनस्मृतिबाधेप्रसक्तेयदिवा पूर्वीकरीत्यासर्वत्यासर्वांगोपसंहारमर्थप्रसेवनित्यताबोध्यत इत्यभ्युपगम्याविरोधः
समर्थनीयः। अथवा विरोधयमभ्युपगम्यैवयाचदेकंश्रुतौ कर्मस्वरूपतोवान्यस्तनीयते तावतयोर्विरुद्धत्वेऽश्रोतानुष्ठानमिष्य
तइतिन्यायेनस्मृतेरनुष्ठानलक्षणफलापहारेण वाधान्नस्मृत्यनुसारेणासमर्थस्यच्छिन्नहस्तादेरपि किंचिदंगहानेनाधिका
रोन्याय्यः। किंच। हिरण्यकेशिसूत्रे तृतीयतश्च प्रथमपटले परिभाषारूपेण नित्यानि काम्यानि च कर्माण्युपक्रम्यतेषुवे १०५

दाध्ययनवत्त्वं त्रैवर्णिकानामेवाधिकार इति नियमे विहिते दर्शनापदेशेन यथा इत्यगताशरीरकाल्स्यंबाविप्रतिषि
द्धमिति साक्षादेव विधानादपि नच्छिन्नहस्तादेर्विकलांगस्याधानादावधिकारः। अस्यच सूत्रस्य दृष्टार्थत्वाद्यदंगवैकल्ये
कर्मानुष्ठानाशक्तिस्तादृशांगवैकल्यमेवानधिकारहेतुरिति न कारणतिकर्णादेरनधिकारप्रसंगः। अतएव नेत्रंगदे
शादौ काणादियाजनेशिष्टाचारः सुप्रसिद्धः। न तुलापायनसूत्रे द्वाल्यायण सूत्रे च तुल्यरूपमेव ऋत्विगार्षेयोनूचानः
साधुचरणो वाग्म्यन्यूनांगोऽनतिरिक्तांगो द्व्यपसतश्च्यावनतिकृष्णोनतिश्वेतइति ऋत्विग्लक्षणमुक्त्वा पाज्यश्च प्रथमे स्वि
भिर्गुणैर्व्याख्यातइत्यधिकारिलक्षणमुक्तं। तत्र प्रथमे स्विभिर्गुणैर्व्याख्यातइत्यधिकारिलक्षणमुक्तं। तत्र प्रथमे स्वि
भिर्गुणैरित्यनेनार्षेयत्वानूचानत्वसाधुचरणत्वानामेवाधिकारिविशेषणत्वेऽकैरन्यूनांगत्वादीनामनपेक्षणान्न्यूनांगस्या
प्यंगुलिच्छिन्नहस्तादेः कथं नाधिकार इति चेन्न उच्यते। यच्चि भाष्यकारादिभिरन्यूनांगोऽनतिरिक्तांगोऽगइत्यनेनयोः। पदयो
श्चतुरंगुलषडंगुलविषयत्वेन व्याख्यानात्संगुलिच्छिन्नहस्तादिविषयत्वेन वा कथं व्याख्यानानन्तद्विषयत्वे न वा व्याख्यानानन्तद्वि
षयत्वे वन्यायप्राप्तत्वदनधिकारबाधप्रसंगादुभयथापि चादृष्टार्थत्वाविशेषासंख्यासंख्यादिविषयत्वे च दृष्टार्थत्वना

१०६ सत्यापवरत्तत्वक्रतदनधिकारप्रतिपादकहिरण्यकेशिसूत्रविरोधप्रसंगेनान्यप्यबाधविकल्पाद्यापत्तेरनयोःसू
त्रयोश्च तुरंगुलषडंगुलाद्यधिकारपरत्वेचव्याप्या·पद्यपिचनयोःपुंगुविन्नहस्तादिविषयताप्युच्यते·तथापिअध्वर्यु
शाखेषुप्रयोगपाजमानाम्नाम्नाद्धिरण्यकेशिसूत्रस्यचाध्वर्युसूत्रत्वेनावांतरसामान्यविशेषेणांतरंगत्वाच्छाघोप
स्थितिकत्वेनतत्प्रतिपादिताधिकारविशेषणग्रहणान्यायस्यचसामान्यःप्रवृत्तेश्चछंदोगव्यतिरिक्तानांपुंगुविन्नह
स्तादीनामनधिकारएवइदंतुसूत्रद्वयंछंदोगविषयमेव·येदेतत्सूत्रद्वयमपिपंगुविन्नहस्तादनधिकारप्रतिपादनपर
येवव्याख्येयं·पाज्यश्चप्रथमेस्विभिर्गुणेव्याख्यातइतिगुणविशेषणोपादानाद्वाग्मित्वादीनांगुणानामेवप्राप्यश्चे
तिचशाब्देनप्रसक्तापाज्यविशेषणतापोग्यत्वेनत्वंन्यूनांगत्वादीनामपियाज्यविशेषणतापोग्यतेकिंतुकेचिन्नदयेक्षि
तैवसानत्वन्यूनांगत्वादयोवाग्मित्वादिवद्गुणकिंतुदोषाभावरूपाःन्यूनांगत्वादीनांवैगुण्यापादकत्वेनदोषत्वा
त्·नचैवंतत्त्वलिकृत्स्नानिष्वेतासप्तानमधिकारप्रसंगइतिवाच्यंकृत्स्नविभिःसहसमानप्रयोगत्वेमत्वेनादूषणत्वात्·य
दानतिकृत्स्नानतिश्चेतपदाभ्यांश्यामशुक्लकृष्णवर्णोरेवनिषेधः।अघपिचकृत्स्नकृत्स्विततःसामान्यातोपिनिषेधप्राप्तौ १०६

नादिकसुस्तान्नथापिदोषविशेषप्रतिपादनार्थत्वाभास्यवैयर्थ्यमान्तरंवृद्धेरित्यादिकमुपकरणस्यानिषेधयदिति
सर्वैसुस्थं·धर्ममार्गमिमंन्यायपादयान्नाप्ररोहणैः। गुरवोदर्शयामासुर्दुरूहंश्रेयसेःकृतेः॥ ॥इतिश्रीमत्सदबा
क्यप्रमाणपारीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीमद्भट्टनारायणात्मजभट्टशंकरोन्नीतोधर्मद्वैतनिर्णयेआधाना
घधिकारसंशयोच्छेदपरिच्छेदः॥ ॥आहिताग्निर्ज्येष्ठसवर्णपत्नीमृताश्चोताग्निभिर्दग्ध्वा·आहिताग्निमग्निभि
र्दहंतियज्ञपात्रैश्चेत्यग्निपत्तपात्रकरणकदाहेनाहिताग्निशरीरसंस्कारविधावाहिताग्निपदेलिंगस्याविवक्षितत्वात्स्त्रि
याअप्याहिताग्निपदेनोक्तेः। तांचश्रौताग्निभिर्दग्ध्वा अपत्नीकोप्यग्न्याधानंकुर्यात्·तदुक्तंभारद्वाजसूत्रे·तयोर्यः
पूर्वोम्रियेततंस्त्राग्निहोत्रेनायापितृमेधःसंपद्यतद्दस्युपक्रम्यदारकर्मणिमपथान्यकृआत्मार्थमग्न्याधेकुर्यादिति·अस्या
र्थः। दारकर्मसंभवेआधानस्यसंभवात्तन्निष्पन्नाअग्न्याधानंकेवलम्यात्मार्थात्मदाराद्यार्थःकिंतुपत्न्यर्थाअपिदारक
र्मसंभावनापांस्यात्मार्थमात्मदाहार्थमेवेति·अग्न्याधेयंवापूर्वाधानंमस्यतत्रैवशाखेःनदाहहार्थमेवेति·अग्न्याधेयं
यापूर्वाधानंतस्यतत्रैवशाखेःनतुपुनराधेयंपरस्याकर्मांत रयेचनत्वात्·तदुक्तं·श्रीरामांडारभाष्ये·अग्नीमांसंभारे

१०७ सुविधानेन स्थापनमग्न्याधेयं· पुनर्विधानांतरेण स्थापनं पुनराधेयं तस्यैव गुणविकार इति· एवं चापस्तंबेनांगनाशे
पुनराधेयविधिर्यदुक्तः सोऽगनाशाऽंगत्वपक्षेऽंगनाशदेशे वांगनोक्तः। ततश्च तद्व्याख्याने पत्न् श्रीरामांडारभाष्येऽप्युक्तं उप
देशः। पत्नीपदांगं तन्मरणे गंगविधुरमेति। तस्मिंस्तत्पक्षे पत्नीमरणे पुत्सर्गेष्टिपूर्वकपुनराधेयं यजमानास्त्वर्वं प्रमीतायाः
पत्न्या अग्निभिर्दाहो नास्तीति गम्यते· एवं च सति पत्रिकांडमंडनेनोक्तं पुनः परिणयाधाने स्यामिनो यदि सिध्यत· पुन्ये
मृताये श्रौताग्निर्दद्यात्रिर्मथ्यमन्यथा तथैव नेकभार्यस्य यदेकात्रमायमेने छेत्पुनर्विवाहं चेत्रिर्मथ्यैनौवतार हेतु· किं
लेतावदिहाप्यस्ति दग्ध्या त्रिर्मथ्य वह्निनाउत्सर्गा घ्रात्यजेदग्नीत्पुनस्तानादधीत चेति· तत्र यपि निर्मथ्येमेवदाह इति
पक्षी विवाहासंभवमात्रविषयपुत्सापानतो भाति तथापि श्रीरामांडारभाष्येऽप्युत्सर्गेष्टिपूर्वकपुनराधेयस्य पत्न्या अंगत
पक्षे श्रौताग्निभिरेव दाहाग्न्याधेयमात्रेणो त्सर्गेष्टिर्नवा पुनराधेयमिति त्रिकांडमंडनग्रंथाविरोधः। अत एव त्रिकांडमंड
नेन भरद्वाजमतमुक्तं· एकाकीयाधीताग्नी। विवाहश्चेत्रसिध्यतीति· तदपि दारकर्म क्रियमाणे शक्तः आत्मार्थमग्न्याधे
यमिस्येत द्वारद्वाजसूत्रमतमिवोक्तं· नन्वेतदर्थमेव च त्रिकांडमंडनेनानिरस्त एकाग्न्याधानपक्षस्तु कर्मदीपे निराकृत १०७

इति ग्रंथे· सत्यं तदग्रे निरस्तमेव पूर्वार्धोपरितनो हि सार्धश्लोकः एवं पठ्यते· जुहूयान्ये मृतस्त्रीका कुशप
त्नीसमन्विताः। जुहोति नमृतस्त्रीकः एकाकी पूर्ववह्निषु· भरद्वाजमतं चैतत्कर्मदीपे निरूपितमिति· अन्ये मृत
स्त्रीकाः कुशपत्नीसमन्विता जुहूति अग्निहोत्रहोमादि कुर्वंति सत्वमुक्ते पूर्ववह्नीसंस्थाप्य जुहुयादित्याशंक्यो
क्तं जुहोति नमृतस्त्रीकः एकाकी पूर्ववह्निष्विति· एकाकी कुशपत्न्यसमन्वितः तत्तश्च पूर्ववह्नीन्मृस्त्रियै दत्ताकु
शपत्न्या सहाधायाग्निहोत्रादिहोमं कुर्यादित्यर्थः। तदस्मिन्नर्थे भरद्वाजसूत्रस्य तात्पर्यमित्युपसंहरति भरद्वा
जमतं चैतत्कर्मदीपे निरूपितमिति· कर्मदीपः कर्मप्रदीपः कात्यायनकृतस्त्वे दीगपरिशिष्ट· तदुक्तं कर्मप्रदीपे·
मृतायामपि भार्यायां वैदिकाग्निं न हि त्यजेत्· उपाधिनापि तत्कर्म यावज्जीवं समापयेत्· रामोऽपि कृत्वा सौवर्णां
सीतां पत्नीं यशस्विनीं· ईजे यज्ञैर्बहुविधैः सह भ्रातृभिरर्चितः इति· अतश्च एकाग्न्याधानपक्षस्तु कर्मदीपे नि
राकृत इति यत्प्रागुक्तं तत्कुशपत्नीरहितस्याग्न्याधानापिकारपरं भरद्वाजसूत्रं नेत्येवं परं· एवं चास्य तत्कृतव्यवस्था
र्यानकोऽपि त्रिकांडमंडनग्रंथो विरुद्धः ध्यत इति सिद्धं· अतएव ज्वलयांपत्न्या अंगत्वपक्षे उक्तः। ननु पत्नीवदस्या

१०८ ग्निहोत्रं भवति पुत्रामेयज्ञमन्यमसाता इत्यादिना कर्मणाः पत्नीयत्नवचनाजदम्भावेकर्मैवचनस्यवर्तेता नैव कर्म
न संचरेत अंगत्वेतु संबंधस्यात्· कुतः॥ अस्याग्निहोत्रे यज्ञमिति यजमानस्येव स्वामित्वस्यापन्नात्तपरस्यास्तथाग्नी
हि यद्यपश्चान्यापदयः कृपात्पत्नी संबंधानीति मस्याः प्रसिद्धांग समभिव्याहाराच्च तथा कर्मचोदनाअपि यजमा
न एम वधिकुर्वंति पत्नीं· यथा वसंते ब्राह्मणोग्निमादधीताग्निहोत्रं जुहुयाद्दर्शपूर्णमासाभ्यां यजेत स्वर्गकामा स्वा
द्बाडुकुचे चोक्तं· तस्मादपत्नीकोप्यग्निहोत्रमाहरेदिति· कंचोद्बारितमेनुक्तं स्यां नरैः पत्न्यभावेप्यधिकारं चुद्दक्तः॥ भ
रद्वाजसूत्रवत्· अप यद्य पत्नीकः स्यादुभाभ्यां तस्य संस्कारः औपासनमग्निहोत्रामिति· तथा चनलकार कुर्यैरोमितिः
आहितानेश्च स्वर्के आयाग्निये न तां निर्मंथ्येन दहेत्· संतपनेन चेति· तथा हार्येणाग्निहिताग्निपत्न्यो चे साश्च लवयनः॥ किं
वाचारोप्यत्र दृष्टः शिष्टमानां पूर्वेषां यथा कण्वविभांडकभीष्मादीनां यथा च भगवतो दाशरथेः· किंच यत्सहाधिकारे
पि पत्न्याः यजमानः स्वाम्यं तावत् आस्येव· यथो तकमीमासकैः॥ तस्याख्याबद्धुक्तमासीद्ब्रह्मचर्यमतु त्वमलाहोति· तस्मात्सि
द्धमभावेपि पत्न्या न कर्मणो निवृत्तिः सिध्यतीति ग्रंथेनातथापत्न्संयेन जायायाः प्राधान्यपक्षे प्युक्ता जायापत्न्योनाविभा १०८

गोविद्यते पाणिग्रहणाद्धि सहत्वं कर्म सुतथापुण्यफलेषु द्रव्यपरिग्रहेषु चनहि भर्तुर्विप्रवासे त्यागेस्मितिकेदाने सो
पमुपदिष्टतामिति· एवं च पूर्वोक्तव्यवस्थायां सत्यां यत्तत्तस्मादपत्नीकोप्यग्निहोत्रमाहरेदित्येतदपि ब्राह्मणस्यभा
ष्यकृतान्यास्यानं कृतं पूर्वमन्तावाः पत्न्याः निर्मंथ्येन दाहं कृत्वा उत्सर्गो वृंकृत्वा पुनराधेयं कुर्यादिति तदापस्तंबमूलकत्वा
तस्य च श्रीमांडारभाष्यकृतव्याख्यानुसारेणेतत्प्रयतेरुद्ददेवपत्न्यंगत्वपक्षपरमेव· भरद्वाजसूत्रं तु पत्नीप्राधान्यपक्षपरमिति सि
द्धं निरवद्यं॥ ॥इति श्रीमत्·कृते द्वैतनिर्णये अपत्नीकाधानाग्निहोत्रनिर्णयः॥ ॥अथाऽपत्नीककर्तव्यं निर्णयानंतरं
पुत्रस्य कर्तव्यं निर्णीयते· प्रयोगपारिजाते दत्तकौ पुत्रप्रतिग्रहविधिः॥ शौनकोक्तो लिखितः॥ तत्र वाक्यं दौहित्रो भागिनेय
श्च शूद्रस्यापि च दीयते इति। तत्र केचित् शूद्रस्यैव इमे दौ नान्यस्य ब्राह्मणादेरिति नियमं प्रतिपेदिरे। तत्र ब्राह्मणाद्यर्गांदयो द्विया
दाविव ब्राह्मणादेर्भूतभान्युपयोगाभावाद्दगुणत्वेनविधेयत्वान्निपाधिपिविषयत्वीयुक्तानति शूद्रस्य सा युक्ताभ्यानुपश्यो
गित्वात्॥ च गुणात्वेनाविधेयत्वादपि धर्मेच नियमविध्यसंभवात्· कथं शूद्रोभ्याम्युपयोग इति चेन्नेदुच्यते· नापुत्रस्य लोको
स्तिमायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायाते यज्ञेन देवेभ्यः प्रजया पितृभ्यो विद्यया ऋषिभ्य इति च श्रुतिः॥ तत्र श्रुतौ ब्राह्मण

१०९ ग्रहणमुपलक्षणमित्युक्तं ब्राह्मणस्य सोमविद्याप्रजमृणवाक्येन संयोगस्य दृष्टत्वाधिकरणे। एवं च शूद्रस्यापि पितृऋणापकरणविशि
ष्टत्वेन भाव्यत्वार्थत्वाद्दंडस्य विधेयत्वमेव मिह पुत्रेण पालोकाज्जयंतीति पौत्रेणानंत्यमश्नुत इति समभवस्यापि पुत्रस्याविविक्तियो
गत्वेन साध्यते तत्र तु चतुर्थी षष्ठ्या भवति· यथा दंडी प्रैषानन्वाहेति दंडित्वेन प्रैषानुवचने मैत्रावरुणस्य विनियोगाद्युप
योगिनो मैत्रावरुणाय दंडं प्रयच्छतीति दंडितया भाव्यत्वं· चतुर्थ्यंतत्वं च यथा तत्र दंडस्य यजमानसंस्कारेण कृतकरस्याविभा
व्यत्वं सत्त्वाद्दंडदानेन मैत्रावरुणं भावयेदिति· का भागिनेयदौहित्रदानेन शूद्रं भावयेदिति यत्नार्थे दौहित्रभागिनेययोर्विधेय
त्वेन तयोरेव नियमविधिविषयत्वं युक्तं· शूद्रस्य तु शेषित्वात्तन्नियमे परिसंख्यापत्तेस्तथा उमामगृभ्यान्नृशनामतस्यस्वश्चा
भिर्धानाम्नादत्त इति· साचानिदोषान्न चैकत्र वाक्ये नियमपरिसंख्ययोः संभवस्तेन ब्राह्मणादिभिरपि दौहित्रभागि
नेयौ पुत्रत्वेन ग्राह्याविति सिद्धं। तथा शूद्रेण सति संभवे दौहित्रभागिनेयावेव ग्राह्यौ· न तु दौहित्रभागिनेयनिय
मादशूद्रस्य तद्व्यतिरिक्तो न स्यादेवातः सति संभव इतीदं वक्ष्यमाणं तत्र केचित्· ब्राह्मणस्य सोमविद्याप्रजमित्यधिका
रणप्र — त्यादनस्यमित्यस्योक्तेः पुत्रप्रतिग्रहविधेरपि व्याख्याकांक्षायां पुत्रशब्देनोपस्थितस्य तत्कार्यस्यापि तत्क्रमणा १०९

पादकरणादेरेव प्रजोत्पादनफलस्य भाव्यत्वावगमे प्रजोत्पादनचादेवफलत्वमित्यत्वेन यथाशक्तिस्यायया दौहित्रभा
गिनेयनियमानादरेपि युक्त इति। तत्र प्रयोगविधिप्रयोज्येष्वंगेषु तथाशक्त्या पप्रवृत्तेरिष्टत्वात्· अतश्च यत
योगविधिप्रयोज्यं प्रति। भागिनेयत्वादेरत एव सजातीयेषु प्रयोक्तृत्वनयेषु मया विधिरिति मनूक्तसजातीयस्यानिय
मस्यापि न त्यागः। तस्मात्सति संभव इत्युक्तमिति· अतो यत्ते· शौनकोक्तेः नैव वैश्याज्जाते पुशूद्राणां शूद्राजाति क्षितिनि
यमनात्मनुनापि सजातीयेषु प्रयोक्तृत्वनयेषु प्रयाविधिरिति सजातीयत्वनियमनाद्दौहित्रत्व शूद्रस्य त्वयोगाद्वेग्रु —
ध्यापरिहारार्थं दौहित्रभागिनेयोपतिरिक्तशूद्रविधानार्थत्वं शूद्रवाक्यस्य निर्णीते दौहित्रभागिनेययोः पूर्वेत्वं स्या
— द्वानामुत्तरत्रस्य पित्र्यवयवानामनुवृत्तेरंतरंगत्वात्सति संभवे त्वावदेवतत्संभवे वेतदसंभवे तु शूद्रांतरमपि पुत्रीभव
त्येवेति· एवं च नशिष्टाचारविरोधोपि कश्चिदिति सर्वं निरवद्यं॥ ॥इति श्रीमत्· दैत्तनिर्णये पुत्रप्रतिग्रहविधिसंशयो
च्छेदपरिच्छेदः॥ ॥श्रीभट्टनारायणानुकृपया नीलकंठस्य स्तौतु निर्बंधेष्वाप्यफलसारतस्य नि[illegible]पणावसरे प्रभासखंडार्य
वचनानुदाहृतं यश्चान्यं कारये छक्त्या तीर्थयात्रां नरश्वेश्वरः। स्वकायद्रव्ययानाभ्यां तस्य पुण्यं चतुर्गुणं मतिमद धर्मप्रतिवि

स्र

११० यदं ते व्यादिनः। केचित्तावदाहुः। स्वाधिकारेणतीर्थपात्रार्थिनेश्वरार्पणबुध्याद्यया देहालुश्चतुर्गुणं पात्राफलमनेन
प्रतिपाद्यते। तद्द्रव्येणपात्राकर्तुस्तुयात्राफलं संपूर्णमित्यविवादमेव भवतिरूपेणद्रव्यादिदानात्प्रतिनिधौ एतत्तावत्प्र
यत्नेः रपितुर्ज्वंदि·तादिकादिलक्षणाहारिश्राद्धद्दवसंपूर्णमेव फलं कर्तुस्तु षोडशांशमित्यविवादमेव षोडशांशः सत्तभतेयः। ई
श्वरार्पणशब्दार्थोत्रिकामित्येनः पदितावधात्रार्थंतुभ्यमिदं संप्रददे इत्येवं पात्राभिसंधिनैरपेक्ष्यमतस्तादृशादानस्य
स्वत्वनिवृत्तिपरस्वत्वापादनमात्रोपक्षीणतयाउत्तरत्रायात्राप्रयुक्तिसामर्थ्यासंभवाद्यात्रारूपप्रयोज्यव्यापारनिष्प
त्तिपर्यंततादुर्लभस्याद्याचांकारवेदितस्येवमिहप्रातीमायत्ना। निर्हप्रतिग्रहलब्धद्रव्येण प्रतिग्रहीत्राबीलेच्छत्वादिन्याया
त्रायामकृतायादातुसंभवतिनियोक्तृत्वं निरभिसंधिदत्तस्य द्रव्यस्य पुनरपहरणायपेगान्। ततश्च प्रग्रहीत्रायया
मकृतायामपिदातुर्विवक्षितफललाभो निष्प्रापयेतेति· अथैतद्दूषणोद्धि द्विधा र्थ्यात्राभिसंधिनैरपेक्ष्यंनेश्व
रार्पणशब्दार्थः किंतु अपूर्वार्थत्वमितिकथंचित्परिभाष्यते· तच्च भवति तन्यावर्तनोर्थः ततश्च गत्वापुण्यानितीर्थानि
पुण्यान्यायतनानि च· त्वं भवतेसुमहत्पुण्यं स्वर्गे चैवमहीपत इति स्वकर्तृकयात्राफलमुक्त्वा पश्चान्यं कारयेत्तत्स्ये ११०

स्यनेन आक्षिप्तयात्रारूपप्रयोज्यव्यापारकः प्रयोजकव्यापारएव चतुर्गुणयात्राफलार्थतयाविधीयतइति· तदपिनक्षो
दक्षमं· नह्यत्रद्रव्यदानविधिः श्रूयते· नचाक्षिप्यते· आक्षेपकाभावात्· नच द्रव्ययानाद्याप्तिस्यनेन द्रव्यादेयात्राकारण
करणत्वोपदेशान्निर्व्यापारस्यचतदसंभवात् दानविध्याक्षेपइतिवाच्यं· स्वकीयपदेनादत्तस्यैव करण ~~त्वोपदेशमिति व्यापार~~
~~स्य~~ चेतरत्वावगम्यतेर्विरोधेन दानाक्षेपासंभवात् अदत्तस्यापिच करणे त्वोपपतेरनुपदमेव वक्ष्यमाणत्वात्· तस्मान्ने
वंदवाक्यमीश्वरार्पणबुध्याद्द्रव्यादिदातुश्चतुर्गुणयात्राफलप्रतिपादकं। यच्च भवत्यादिना प्रतिनिधौ कारयितुः पूर्णफल
मिति। तयदितिस्य पात्राविषयमुपक्रान्तकाम्यपात्राविषयंच· तदास्तुनाम· पदित्वमुपक्रान्तकाम्यकाशीयात्रादिविषयं·
तच्चाशक्यं वक्तुं नमंतरेणतत्र व्यापतः प्रतिनिध्यप्राप्तेः। तस्माद्भवतित्वेन द्रव्यपानदिरत्वापान्याकारयितुरेवानेन वा
क्येन फलचातुर्गुण्यं प्रतिपाद्यते। तत्रदानविध्यनाक्षेपादत्रापवभवति· स्वकीयपदव्यापपिच्चेतदेवावगम्यते। संभव
तित्येवं नियोगोपरित्यज्यैवस्वयं स्वंएतानियदायान्येवयाहनानिनपदंदमदीयमेवद्रव्यंएतांश्चमदीयानेवसेवकानेतानिच
मदीयान्येववस्त्राणिएतच्चमदीयपेयवस्त्रोपानहादि युद्धिनोपि कंव्यवीकरिष्यतेतन्मयादेयं यच्चत्राव शिष्यतेतन्मसं

१०११ यच्चपर्वणादेयं यच्चाचन्द्रोरादिभिरपहरिष्यते तस्यदीयं यच्चर्णग्रहीष्यते तस्यदीयमेव भवनाच यथेष्टं मन्त्रियोगेन विनि
युज्यतां इत्थं मदीयाया आकार्यतिरेवं विधेमपच्चतन्नाना धात्वर्थघटितसंविधानं संगृहीतुं याशाकारयेदिति णिजंत
कृत्यासामान्यतः प्रयोजकव्यापारउपात्तः। अन्यथा स्वकीयद्रव्यपोतेपात्रार्थं द्रव्यादित्तविधिस्तितद्रव्यदानमेव विशे
षतउपाददद्यात्· संविधानास्य कप्रयोजकव्यापारसामान्योपदानादेवचयथासंभवं यदानादिनापियात्रानिर्वाहणाव
गतेः संविधानघटवः तत्तन्नाना धात्वर्थ कूरेव्यस्तमस्तविकल्पोप्यवकाशंनासादयति· इदमेव च शक्योस्यनेनादि ध्वनि
तं· ईश्वरशब्देनच यएवएवं विधं विनिधंसंविधानं विधातुं समर्थो समर्थश्चस्वयंयुतुनिजैश्वर्यपदभ्रंशभीरुतयापरया
ष्टं गममो पूगतजीवितव्यया शंकितया यागद्विषयत्वमस्य विधेर्ध्वनितं· तेन स्वयं करणस्यास्य च भिन्नविषयत्वादेकविषयतो
पलभ्यानर्थक्यनिवंधनान्नचतुर्गुणयोक्तेः स्तुत्यर्थतापि निरस्ता· अत एव हंतु कर्तुरेव फलाधिक्य संभवे स्वंतत्र कर्तुरेकगु
णरूपसंपूर्णफलार्थं बहायाससाध्यायां यात्रायां स्वयंप्रवृत्त्यनुपपत्तेर्नप्रवृत्तिविषयतेत्यपास्तं· चतुर्गुणतायाः स्व
फलयात्राव्यपाधिक्यपरविषयत्वकल्पनेन तद्विविधसंविधानायासभूयस्त्वेनापदिश्यात्कस्यचस्वद्रव्यस्य यात्रास १०११

म्याक्षिपर्यंतंनाशसंभावनापन्नैवेप्यर्थ्येचिंताप्रयुक्तमानसायासेमयात्रायां कर्तृकर्तुं वीपकार वाहुल्येन च यात्राकारणस्य
वगरिष्ठत्वात्· सहकर्तुर्यात्राकारणविषयत्वैच्चास्य यानग्रहणार्थं च ता पकल्प्यते· न चान्नपानादिगतमेव कर्तृत्वं हि
तं यात्रिविवक्षितमुपादेयविशेषणत्वेपि द्रव्यपानाभ्यां यात्रांकारयेदित्युक्तप्रयोजमेन यावदपेक्षितदाक्षेपाद्यावत्तेव
यात्राकारणनिर्वाहस्तावत एव यानादेनेकस्यद्रव्योर्ग्रहणं वा उपादेयत्वावगत्वावगतेः। तदाथा पोषमासस्य त्रैयग्रहणा
वरणानि च्चेतिशीतनिवृत्तिरूपप्रयोजनेन यावदपेक्षितेमेकं द्वे बहूनि वा [illegible] वस्त्राणि तावत्त एव· उपादेयत्वमेव सीयते
न बहूनामेव नियमेनेति· तथा च तत्र फलतारतम्यतद्द्वैहापि पात्रयात्रविधायाः फलतारतम्यातच्चतुर्गुण्यतारम्य
विशेषः प्रयोजनप्रयुक्तापेक्षा यथादेव तेन द्रव्ययानग्रहणस्य वस्त्रोपादानवत्त्वस्यैव कामयायायलक्षणार्थमपि तस्मात् हि
शिष्टसंविधानस्य विशिष्टकरणतानामुपपन्ना वचनाद्य· किमिति हि वचनेन कुर्यान्नाक्षितं च नस्यतिभार इति न्यायान्· पा
त्रार्थद्रव्यदानात्फलचातुर्गुण्यवादिनापि हि यागार्थद्रव्यदानवद्विशिष्टकर्मार्थद्रव्यमनाञ्चतुर्गुणफलावेरकल्पेन
यत्नादेवस्य परूढपात्राताभिगरिष्टस्याभ्युपेयास्माभिस्तु तत्तोपि गपिरखलोपपादितेति· ननु प्रतिनिधेर्जयन्यत्वाज्जयन्या

१०१२ तुस्यात्स्वत्वात्समतापि दुर्धराकुतश्चतुर्गुण्यमिति चेत्। न इतराचापि तुल्यत्वात्। प्रयोजकेनानुमंता कर्ता चेति स्वर्गनर
कफलेषु कर्मसु भागिनो यो भूय आरभते तस्मिन्फलविशेष उत्पाद्यस्यापरत्वं बवच्चमे निषिद्धकर्मप्रयोजकादेर्भूयस आरंभे सा क
क्षान्निषिद्धानुष्ठानापेक्षया स्वफलापगमेनलदेकयोगोपालस्य विहितकर्मनियोजकादेरप्यवैरूप्याय साक्षाद्यागाद्यनुष्ठ
त्रयंक्षयात्स्वफलापगमेन धर्मार्थद्रव्यदानयाच्ञाव्ययाधिकव्ययविषयत्वदिनाकयनवत्त्वाच्च गरिष्ठताभ्युपगमेय समाधानं
क्षेन तोऽस्याभिरपितथैवं सम्माहितमितिमकिंचिदेतत्। ननु पश्चात्यं कोरयेदितिद्धिनीयाश्रूयते। स्ताचहेतोरन्यतरस्यापि
ति अण्यंतकरोत्यर्थकर्तुर्ण्यंतकरोत्यर्थं प्रति कर्मसंज्ञा प्रभवति। अण्यंतकरोत्यर्थकर्तृत्वं च स्यात् तच्चेयुज्यते नान्यथा स्वतंत्रः
कर्तेत्यनुशासनात्। स्यात् तच्चेच्चकारकांतराप्रयोज्यत्वे सति कारककारकांतरप्रयोक्तृत्वं तच्च स्वतंत्रः प्रयोजकस्यैव युज्यत इति द्वि
तीयोपपद्यते। प्रतिनिषेधस्तु स्वतंत्रकर्तृत्वाभावेन हस्त्यादिस्थानीयत्वात्साधनतयान्तर्नीयस्यैव नियमेन भवितव्यं। तथा च श्रु
तिर्जा कर्माणि कारयति भृत्यैर्न कर्म कारयता इति प्रयोगो न तु स स्तिन्नं भृत्यमिति। यदि तु कश्चित्कः स्यात् तथापि स गौणो न
तु स मुख्यः। वेतनग्रहणे हि तस्य स्वतंत्रकर्तृत्वं। न तु कर्मकरणे। न चेह मुख्यसंभवे गौणग्रहणं युक्तमिति। अशाद्धिकान १०१२

ग्रहणे हि तस्य स्वतंत्रकर्तृत्वं। न तु कर्मकरणे। न चेह मुख्यसंभवे गौणग्रहणं युक्तमिति। अशाब्दिकानन्नीषदेव भाषये देष
दोषः। किं पुनः शाब्दिकान्। तथा हि मीमांसकैस्तावन्नेदं स्यातंत्र्यलक्षणमंगीकृतं। आचार्यैरेव प्रसुप्तोपात्तव्यापारक
त्वस्य यस्य कारकस्य व्यापारं धातुः प्राधान्येनाह तत्तस्य यातलक्षणस्य वैयाकरणाभिमतत्वेनाप्यभिधानात्। उपपादितं
चैतन्न्यायसुधायां। यद्यपि भवदुक्तस्यातंत्र्यलक्षणमभ्युपेयते तदापि कारकांतराप्रयोज्यत्वांशस्य व्याहतत्वाद्व्यर्थस्य सं
भवान्यतरनिरासार्थत्वासंभवेन वैयर्थ्यात्सकलकारकांतरप्रयोक्तृत्वमेव तल्लक्षणं वाच्यं। तच्च भृत्यादिनापरार्थप्रवृत्तस्या
पि प्रतिनिषेधकस्येवेति तस्याप्यण्यंतकरोत्यर्थकर्तृत्वसंभवात् तद्दि सूत्रेण ण्यंतकरोत्यर्थं प्रति कर्मसंज्ञोपपत्तेः पश्चात्य
मितिद्वितीयानोपपन्ना। अत एव भवद्देवेन क्रियासिध्यनुकूलेतरकारकप्रयोक्तृत्वं हि स्वातंत्र्यं। तच्च कश्चिदप्रयुक्तस्य के
चिदप्रयुक्तस्येषु त्वकारस्यो लेक्षित तथांकानिवृत्त्यर्थं वैयाकरणाभिप्रेततं च प्रदर्शयितुमाह। तदुक्तं हरिणा। प्रवृत्तौ
यानिवृत्तौ वा कारकाणां य ईश्वरः। अप्रयुक्तः प्रयुक्तो वा स कर्ता नाम कारकमिति। वस्तुतस्तु कारकांतराप्रयोज्यत्व
गर्भस्वातंत्र्यलक्षणाभ्युपगमेपि भवदुक्तदूषणमसंबद्धमेव। तथा हि परार्थक्रियाकर्तुः कारकांतरप्रयोज्यत्वेनो

१०१२ स्वतन्त्रस्य कर्तृत्वेनादर्शनात् स्वतन्त्रां कर्तृत्वविवक्षायां यजतिर्याजकान् इति तु साधुः स्यात् । तथा गच्छति देवदत्तो ग्रा
मं गन्तमन्यो गमयतीत्यादौ गतिबुद्धीत्यादिना अण्यन्तगमिकर्तुर्ण्यन्तगमिं प्रति कर्मसंज्ञायां विहितायां भवति । तत्र
भवत्पक्षे देवदत्तस्य स्वार्थगमनस्थले तत्साधुत्वेपि परार्थगमनस्थले असाधुत्वं स्यात् । न च तत्राप्येतेन निरुक्तीया प्रयो
ज्यास्येत्युपात्तसंभवात् अनुनुशासनेनासाधुत्वाच्च । तस्मादेतद्दूषणद्वयपरिहाराय कारकान्तराप्रयोज्यत्वे सति
स्वप्रकृतक्रियाकारककामेनापि विवक्षणीयम् । ततश्च यजतिपदोपात्तक्रियाकारकान्तराप्रयोज्यकव्यापारात्मक
क्रियान्तरकर्त्रा यजमानेन प्रयोज्यत्वेपि यजतिपदोपात्तक्रियाकारकान्तराप्रयोज्यत्वसंभवेन कर्तृत्वोपपत्तेः । तथा गच्छति
देवदत्तो ग्राममित्यत्र देवदत्तस्य ण्यन्तगम्यर्थरूपप्रयोजकव्यापारात्मकक्रियान्तरकर्त्राप्रयोज्यत्वेपि अण्यन्तगम्यर्थरूप
प्रकृतक्रियाकारकान्तरैरप्रयोज्यत्वात् परार्थगमनस्थलेपि भवति गतिबुद्ध्यादिना कर्मसंज्ञासंभवात्तमन्यो गमयतीति सिद्धि
योपपत्तिः । एवं यश्चास्य संस्कारस्येदित्यत्रापि द्वितीयोपपत्तिः । परार्थप्रवृत्तस्यापि प्रयोज्यस्यापात्रा कर्तुः स्वव्यापारं प्रति स्वा
तन्त्र्यात् क्षतेः तदुक्तं हरिणा । गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः । नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते इति । १०१२

अस्यार्थो हृद्वदनेन विवृतः । प्रयोज्यः प्रयोजके विवक्षिते । तेन प्रधानभूतेनाप्यमानत्वादंतरंगत्वेन पूर्वप्रवृत्त प्रयोज्यः प्रयो
जकव्यापारं प्रतिगुणभूतायां स्वव्यापाररूपक्रियायां स्वातन्त्र्योपि प्रेषणादौ प्रयोजकव्यापारे विवक्षिते तेन प्रधानभूतेनाप्य
मानत्वादंतरंगत्वेन पूर्वप्रवृत्तामपि कर्तृसंज्ञां बाधित्वा कर्मसंज्ञां गत एव भवति विनापि गतिबुद्ध्यादिसूत्रं । एवं सति
मिति सिद्धस्यारंभो नियमार्थः प्रयोजकव्यापारेणाप्यमानस्य कर्तुर्या कर्मसंज्ञा भवति सा गत्यर्थादीनामेवेति । तेन प
चंतं देवदत्तं प्रयुंक्ते इति विवक्षितेपि पाचयति देवदत्तेनेति पूर्वप्रवृत्ता या एव कर्तृसंज्ञा या अवस्थानात् स्वधर्मेण तृतीययैवाभि
धीयते अन्यत् तत्पचिकर्मानद्वितीया यति । अत एव कथमयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाकेत्याशंक्य स्वतन्त्रः क
नयद्वसुनरमभिधाय असाधुत्वापत्तेः । तत्रापरितुष्यन् परेत्यादिना बुध्यर्थकत्वकल्पनया गतिबुद्ध्यादिसूत्रविषयतया समा
रधानन्निदं पूर्वोक्तं च हरिकारिकादि प्रयुक्तस्वार्थप्रवृत्तविषयमेवास्तु न परार्थप्रवृत्तविषयमिति चेत् भ्रान्तोसि । नहि
भवता परार्थप्रवृत्तत्वमस्वातन्त्र्यं स्वार्थप्रवृत्तत्वं च स्वातन्त्र्यलक्षणमुक्तं किंतु कारकान्तराप्रयोज्यत्वं तच्च । यथा परार्थप्रवृ
त्तत्वमस्वातन्त्र्यं स्वार्थप्रवृत्तत्वं च स्वातन्त्र्यलक्षणमुक्तं किंतु कारकान्तराप्रयोज्यत्वं तच्च । यथा परार्थप्रवृत्तस्य नास्ति एवं स्वार्थ

१०२४ प्रवर्त्तस्यापि परप्रयुक्तस्येति तिभवतोऽपि पश्चान्न्यं कारयेदिति द्वितीयानुपपत्तिस्तदवस्थैव ग्रंथविरोधश्च न शक्यः परिहर्त्तु
मिति। किंच हृक्रोरन्यतरस्यामिति विकल्पः स्पर्शनेसच समानविषयत्वे युज्यते अतः परार्थप्रवृत्तौ तृतीयाभ्युपगमे द्वितीया
पि वैकल्पिक्यभ्युपेया स्वार्थप्रवृत्तौ च द्वितीयाभ्युपगमे वैकल्पिक्यास्तृतीयाया अपि साधुत्वमावश्यकं न वाच्यं व्यवस्थितविषयः
केश्चिदपि वैयाकरणैरभ्युपेतत्वात्तदभ्युपगमेऽपसिद्धान्तापत्तिः। अत एव शास्त्राभ्यासनाभिज्ञनरैरपि रामचंद्राचार्यैर्हारयति
कारयति वा मत्स्यं भृत्येन वा कटमिति परार्थप्रवर्त्तनमपि भृत्यमेतद्विकल्पविषयत्वेनोदाहरद्भिः। अभिवादिदृशोरात्मनेपदे वे
ति वार्त्तिकोक्तविकल्पविषयत्वेन च अभिवादयते दर्शयते वा देवं भक्तेन भक्तं वेति स्वार्थप्रवर्त्तनमपि भक्तमुदाहरद्भिः परार्थ
प्रवृत्तेऽपि द्वितीयायाः स्वार्थप्रवर्त्तनेऽपि च तृतीयायाः साधुत्वमभ्युपेतं। तत्र – द्विजा कर्माणि कारयति भृत्येन कर्माणि का
रयति भृत्येन कर्माणि कारयतीति प्रयोगो मनुस्मृतिजं भृत्यमिति ज्यायसां रुरेवः। प्रक्रियाकौमुदीमप्याख्याते च्यस्योल्लेख्या
मात्रेणैव मुनीनामपि व्याप्तिभ्रं तान मिति भाति। किंच। स्याल्याप्यपतौ स्वत्र स्वास्वा अधिश्रयणरूपपाककर्त्तृत्वापारवि १०४४
षयत्वेन कारकांतराप्रयोज्यत्वाभावात्स्वातंत्र्यलक्षणकर्त्तृत्वासंभवप्रसंगे विवक्षातः कारकाणि भवंतीति व्याख्यानेन

पूर्वोक्तरीत्यास्य व्यापारे उदकधारणेऽय स्वातंत्र्यं तदेव पाकविषयविवक्षितत्वात् द्रुत्पादेः साधुत्वमन्वाख्यातं। एवं परार्थप्रवर्त्त
स्यापि कारकांतरप्रयोज्यत्वेन तन्नोस्तु य स्वातंत्र्याभावेऽपि तद्विवक्षयापि तावद्व्याकरणे द्वितीयासाधुत्वान्वाख्यानं संभवेदेव किमंग
पुनर्परदास्य व्यापारापेक्षं मुख्यमेव स्वातंत्र्यं पूर्वोक्तरीत्या संभवतो स्वार्थप्रवर्त्तनस्यापि च परप्रयोज्यस्य स्वातंत्र्योपपादनाय द्विती
यासाधुत्वान्वाख्यानाय च एवं परिहारसरणिरवश्यानुसरणीयेत्युक्तमेवेत्यलमतिप्रपंचेन। मनु प्रतिनिषिद्धे ध्याभवति। प्रेष्यः
पुत्रादिरपरः प्रार्थितः स्वयमेव वा धर्मार्थप्रवृत्तोऽन्यस्तु द्रव्यादिदानेन प्रतिलाभेच्छया कारयत्ति द्वेधा। उभयपरत्वे तु द्वयोरपि प्राप्ति
कत्वान्नित्यानित्यसंयोगविरोधः। द्रव्यादिदानेन यात्रां कारयेत्स्यैव चतुर्गुणपुण्यफलत्वे तु न कोऽपि दोषः। पद्भ्यामपि गमनसंभ
वात्स्कंधादिकादिना च भक्ष्यादिवहनसंभवाद्यानां शोस्त्ये बाधंविरोधः स्यापि न वाच्यं। कुतः पूर्वार्धस्याहि योधनादिमान्शान्या
धनादिदानेन यात्रां कारयेत्तथाय ईश्वरो राजादिर्यात्रां कारयेदिति सार्थः। अत एव प्राप्तं ते पौर्थिवैरैर्तेसम्मृद्धैर्नरैः क्वचिदिति
रेकमुक्तेन यात्राप्रकरणे द्वयोरुपादानं। तत्र कथं कारयेदिति सापेक्षितस्यापि यथा न हिरण्यवस्त्रादिरूपद्रव्येणेति द्व्यपदसिद्ध
यानग्रहणस्यावयुत्यानुवादत्वमुदाहरणार्थं नबोपलक्षणत्वमिति। एतदपि मीमांसामासरभतयो न मन्यंते। तथा हि न

१०१५ तावत्प्रतिनिषिद्धेष्वेव· किंचनममंवचनंनपंचोन्नयामः। किंचप्रतिनिषिद्धेष्वनुपाधिः। विध्यतिवं पचंचेहोपाधित्वे विध्यमध्यवसा
यते· इत्यादिदानेन प्रतिलंभेच्छयाचप्रवृत्तयोरनुगतरूपादिचयात्· प्रयोपार्थितेस्वयंच धर्मार्थप्रवृत्तेनातद्रूपानिरूपणात्· किंच
द्रव्यादिदानेनप्रवृत्तोपिप्रेष्योभवतीत्यलोकप्रसिद्ध्याति कथंचैविध्यं· अथनानाभ्यत्यादिर्लौकप्रसिद्धाः प्रेष्यशब्दार्थः किंतु प्रे
षातिसर्गप्राप्तकालेषु कृतशब्देनापि विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्‌उतिवैय्याकरणप्रसिद्धे प्रार्थनव्या
पारविषयएवविवक्षणीयः। ननुप्रवृत्त्यनुकूलव्यापारात्मकप्रवर्तनारूपसामान्यस्यापि विवक्षायांप्रेषप्रार्थनरूपप्रयो
जकव्यापारविशेषविवक्षयैवप्रेष्यप्रार्थितयोःप्रतिनिध्योःपृथगुपादानेवश्याभ्युपेयेध्यष्टपदोपात्ताध्येषणात्मकविशेष
योपिप्रतिनिधिःपृथगुपादातव्यः। सामान्यविवक्षायांतु प्रार्थितोपिनपृथगुपादातव्यः। तथाद्रव्यदानप्रवृत्तोपिपृथगुपा
त्तव्याः तस्यावश्याभ्युपगमनीयत्वात्· प्रयोजकव्यापाराभावे। चकर्तृप्रतिनिध्ययोग्यात्· एवमेवस्वयमेवधर्मार्थंप्रवृत्तस्यप्र
तिलाभेच्छयाचप्रवृत्तस्यापिप्रवर्तनारूपप्रयोजकव्यापाररूपसामान्यविवक्षायांनपृथगुपादानसंभवः। ननु द्विशेषविव
क्षायांतध्यष्टादिभेदांतराणामपि दुर्निवारत्वान्नकुथंचिदपित्रैविध्यंविधिनापिविधातुंशक्यमिति· अथापिनामसंभ १०१५

वेच्चैकविध्यंतथापितन्नापविधयाउभयपरत्वेनुद्वयोरपिप्राक्षिकत्वान्निरस्तानित्यसंयोगविरोधइतिभवभवदभिधानं
पिकस्मात्सहं· तथाहिद्वयोरपिप्राक्षिकत्वादिस्यत्रकोर्थः किंद्रव्यदानयोर्द्वयोरपिप्रतिलाभेच्छयाप्रवृत्तेप्रतिनिधावसंभवा
त्पाक्षिकत्वमिति· नतावदाद्यः द्रव्यदानाभ्यामितिद्वंद्वबलेनपरस्परनैरपेक्ष्यमिवगतेः। भवन्मतेदइयप्रतिनिधिपक्षेपिद्
व्यदानाभ्यामित्यस्य कथंकारयेदित्यपक्षावलेनयथासंभवेंद्रव्येणदानेनवान्यभ्यावेत्येवसाधनमात्रोपलक्षणार्थत्वात्
उपादितंश्चैतदधास्ताब्रेषवस्तुतस्तंभित्त्वाविकल्पोप्यवकाशमासादयतीत्यत्रः नद्वितीयः। प्रतिलाभेच्छाप्रवृत्तप्रतिनिधिवि
षयत्वएवप्रमाणाभावात्· मान्नाकारयेदितिहिविहितेकथंकारयेदित्यपेक्षिते द्रव्यदानाभ्यामितिसाधनविषयकविधा
नालेष्यप्रार्थितादिवत्प्रतिलाभेच्छारूपिनिवालसिद्धेस्तेतौयविधानंगति द्रव्यदानस्थिरापभेदविषयत्वस्यैवसवचनत्वात्।
नहिकारयेदित्येतावतैव कश्चिदर्थः। परिच्छिद्यते येन प्रतिलाभेच्छविषयत्वमपि सिद्धेत्कृत्स्नाय विरोधः शक्येत· सुतरां वा
क्यंवांतरवाक्याप्रमाण्याद्वाक्यांतर्गतस्य फलपदालोचनेन विशिष्टार्थपरत्वाद्वाक्यस्य अन्यथा कारयेदित्येतावन्मात्रेणप्रे
ष्यादिसकलप्रतिनिधिविषयत्वस्याप्यवगतेस्तनौपविधयोभयपरत्वस्याप्यनिधारणात्कथ्यापंनित्यानित्यसंयोग

१०१६ विरोधः। यदि क्रतावन्निस्येन कारयेदिति सामान्यतः प्रतीतेन तन्नीयप्रकारकेणोभयविधेनापि प्रतिनिधिनास्त हानिरस्यान्यत
रप्रतिनिधिसंबद्धस्य द्रव्ययानादेः शेषशेषिभावेन संयोगो विरुद्ध इति। ततः सोयं द्रव्ययानपदसमभिव्याहारात्तदुपात्तसाध
नविशेषान्वयाय प्रतिनिशेषविषयत्वस्यैव सुवचत्वान्निरस्तः। अन्यथारुणयाक्रीणातीत्यादावपि तदापत्तिः क्रीणातीतिसा
मान्यतः प्रतीतेश्च साधनकेऽकरेगोरनन्वयात्। अथ ज्योतिष्टोमसंस्थाभ्यामिव नित्यानित्याभ्यां सहैकस्य दाक्षिणीयादेरिव
द्रव्ययानादेरन्वयो विरुद्ध इति। तत्र प्रतिनिधिविशेषविषयत्वस्यैवोपपादनान्न तावदिदं दूष्यं तदुपादानमेवास्ति नतरां नये
रन्यतरस्य नित्यत्वं च नतमो द्रव्ययानादेस्तु उभयान्वयसंभवो दाक्षिणीयादिवद्योनेन नित्यानित्यसंशयोगविरोधे नदूष्येतन्य
स्त्वन्यो नित्यानित्यसंयोगविरोधः। सोमफलचमसयोः सामान्यन विध्येआप्यादितोभिषवादिना नित्यवज्ज्योतिष्टोममुपकुर्व्व
दनित्यफलचमसद्वारानेतिवस्योहासंभव एवेति यच्चपश्यामपीत्यादिना द्रव्यादिद्वारेण न पात्राकारणपक्षेपि यानांशे स्येवायं
विरोध इत्याशंक्य मध्यासंभवं साधनमीत्रोपलक्षणार्थत्वेन समाहितं तत्प्रतिनिधिपक्षेप्यविशिष्टमित्युक्तमेव। यत्तु पूर्वार्धस्ये
त्यादिसमाधानं तत्र वाक्यभेदापत्तेः पयत्वश्च वाजमुक्तं प्राप्यंते पार्थिवैरेते समृद्धैर्यानरैः क्वचिदिति क्वचिदिति च्यावरेकमु १०१६

रेवेत्यत्राप्रकरणे द्वयोरुपादानमिति। तदपि न तत्पक्षस्यासाधकं प्रतिनिधिपक्षस्य वा विरुद्धं। अस्मिन् क्रियाके पार्थिवः से
नादिसहायैः समृद्धैर्वा यागाः शक्याः। इत्युक्त्या दरिद्रैरपि विधिः शक्यः प्राप्नु नदेरेश्वरेत्युत्तरवाक्ये एतद्व्यतिरेकाभिदा
नवेगतेर्दरिद्रैः सेनाधसहायैर्ब्राह्मणादिभिरपि यात्राकारणं सुशकमेवागम्यत न नु पार्थिवैः समृद्धैर्वा कारितामायया
त्राद्वैविध्येपि पूर्ववाक्यस्य तात्पर्यशंका कस्मादपि तु यश्चान्यं कारयेदित्यनेन सहैकवाक्यत्वाभावात्। अथ यो दरिद्रैरपीत्यस्य
पूर्ववाक्यव्यतिरिक्तपरता एवमपि कस्मात्। स्वयं दरिद्रोपि समृद्धापादितद्रव्यशक्तिः स्वयं चापार्थिवोपि पार्थिवापादितसा
हाय्यो यात्रां कर्तुं शक्त इति तत्प्रतिनिधिपक्षेप्यविरुद्धं शक्यं एवमपि तात्पर्यार्थकात्स्न्यपि तु। प्राणरक्षणानुकूलस्य द्रव्यसा
ध्यस्य चोभयविधस्यापि संविधानस्य द्रव्ययानाभ्यामपि स्यन्नेव यदुपलक्षणं तस्य व्यतिरेकमुखेन सूत्रन्याय पार्थिवसमृद्धग्रहणं
क्रमेणैव कृतमिति तत्सर्वसमंजसं निरस्यतादानविधिपक्षस्य न्यायोभिरारितं। तदुक्तं तु प्रतिनिधायरुद्धस्याखिलदूषणं ए
वं मया प्रतिनिधिपक्ष एव समर्थितः। अथान्यथा निरस्तो नुपक्षांतरमुदार्यते। न प्रतिनिधिविधिरपि संभवी। तथाहि। प्रासा
यामेव यात्रायां। प्रतिनिधिविधौ नापरश्चतुगुणफलसंबंधः शक्यो विधातुं त्रिगोदाहरणवद्वाक्यभेदात्। अतएव वचनप्रति

१०१७ निषिद्धविशिष्टक्रियाया फलं विधीयते अन्यथा चित्रेदाहरणे पितृलोकसंगात्मगुणफलसंबंधेषु च गुणविशिष्टस्याश्रयस्यैव
फलसंबंधो धायते॥ किं चात्र स्वद्रव्यपात्रान्यापित्ति गुणांतरोपादानं निमित्तोपपरोवाक्यभेदः॥ तदुक्तं प्राप्ते कर्मणि नाने
को विधातुं शक्यते गुण इति॰ तच्च गुणांतरं शिष्यपुत्रादेः प्रार्थनस्नेहाद्युपाधांतरस्यापि प्रतिनिधित्वे च तुर्गुणफलप्रसक्तेः
तत्पक्षावरत्वर्थमवश्यं विधेयं॰ तदेवं प्रतिनिधिपक्षस्यापि दुष्टत्वाद्दानपक्षस्य च निरस्तपूर्वत्वात् उक्तात्कालकायकर्मविपाको
क्तमलवत्त्वमिदानदुरितक्षयार्थं ब्राह्मणो दाहने चैव कर्तव्यं तेन मृशुध्यतीति विहितब्राह्मणोदाहनचरितस्याधिका
न्यकर्तृकतोर्धयात्रानुकूलः पूर्वोक्तरात्यात्तत्त्वान्नाधात्वर्थकृतात्मकसंविधानरूपो यः प्रयोजकयात्रारत्नकराणि
काभावनेव विशिष्टाकारयेदिस्यनेन च चतुर्गुणफलार्थत्वापाविधीयते॰ अतश्चात्रैवं ततः पक्षाएकत्वादेव यस्त्वार्थयात्राया
मन्त्रत्वमेव पुत्रं शिष्यमन्यं वा यं कंचित्स्वार्थेन इत्यादिदाने वा प्रतिनिधीकृत्य पात्रार्थं प्रेरयतीति॰ अन्यस्तु स्वार्थयात्रा
कर्तुरेवो होदुरिव ब्राह्मणस्य सर्वं संनिधानं स्वीयद्रव्येण संपादयतीति॰ अपरस्तु यागार्थं ब्राह्मणोदाहनार्थं द्रव्यदा
नवत्स्वार्थयागो दाहकर्तैः स्वार्थयात्रा संपादयतीति॰ अपरस्तु यागार्थं ब्राह्मणोदाहनार्थं द्रव्यदानवत्स्वार्थयागो १०१७

दाहकर्तैः स्वार्थयात्राकर्तैः एव तदर्थं द्रव्यं ददातीति॰ तत्र प्रथमपक्षस्य तावदनेन वचनेनाविधीनाभ्यापत्तेः एवं तस्य
त्यलाभापायस्य च निरूपविषयत्वं द्विस्वगयापात्रादिविषयत्वं तावन्निर्विवादमेव॰ एवं संकल्पितारब्धकाम्यपात्राविष
यत्वमपि॰ अनारब्धकाम्यकाश्यादियात्रायां तु पदिकिंचिद्न्यार्थदर्शनं वचनांतरं वा प्रतिनिधिप्रायकं भविष्यतीति
तोस्तु नामतत्रापि प्रतिनिधिः॥ अन्यथा तित्तीमारस्तु नेमात्वतोस्तवाक्यस्य तद्विषयत्वमन्यापेक्षकामभ्युपगंतुं॰ न च शि
ष्टाचारविरोधः॥ इत्यादिदानस्य प्रतिनिधिविशेषविषयत्वाद्स्य वाक्यस्य न प्रवृत्तिः॥ स्नेहादि प्रवृत्त पुत्र शिष्याद्यनारब्ध
काम्ययात्राप्रतिनिधिविषयेत वापि च तादृशस्यादिति॰ अस्मिंश्च पक्षे षोडशांशः सततमतेयः प्रतिनिधातुस्तु संपूर्णफ
लं॰ सकलस्य च प्रवृत्तिप्रतिनिधिनापि प्रतिनिधातृफलार्थतयैव कार्यः॥ न षोडशांशरूपस्य फलार्थतया दानस्य प्रासंगिकत्वेना
नुद्देश्यत्वात्॰ यस्त्वत्र ज्यापर्साले स्वः इहांशग्रहणात्प्रतिनिधातुः षोडशांशान्यूनं पंचदशांशमात्रः फलं भवतीति गम्यते
तु लिसोप्यापातरमणीयः॥ यस्यापि हि परार्थेन निषेधाद्नेन प्रतिनिधानोपस्थितौ यस्यापि च प्रतिनिधातुर्मुख्यफल
त्किं चन्यूनफलं तेरस्य प्रक्षेत धापि परार्थगंतुः फलषोडशांशधा निरूपवाक्यार्थस्याश्चरितापंचदशांशमेश

१०१९ नां प्रतिनिधानादिनिवेशकस्यनां विनाप्युपपत्तेर्नात्र प्रमाणमस्ति । नचापममपिनियमः ॥ समस्तियस्त्वर्वापिया
त्रासंपूर्णफलजनकस्याप्यविरोधात् । अन्यथा धेतीर्थफलं तस्ययः प्रसंगेन गच्छति । तथाहि भौंजिनंततः तीर्थांशं हरेत्तीर्थफ
लस्य च । यानमर्धं च तुर्थांशं छत्रोपानहमेव च इत्यादावपातरफलं लस्यान्यत्र कस्मिन्निवेशकस्यनापत्तेः ॥ अर्धादिश्रुतानामप्य
ंशादृष्टवदेकदेशावच्छेदेनत्वाविशेषात् । तस्मादीदृशाकस्मनांविनापिवाक्यार्थोपपत्तिरेवप्रमाणवत्तेन फलजनकत्वाविरोधएव
वासर्वव्यापकमुत्तरं वाच्यं । यत्तु प्रतिनिधानात्तुः किंयत्रयत्र न्यूनफलमित्यपेक्षामाद्धियन्नेदंगपिवचनं । नास्ति श्राद्धादौ न तु
स्यञ्जातायफलकस्यनरैव । श्राम्यतानवैषम्यरम्यं । वस्तुतस्तु मुख्यसंभवेन प्रतिनिधिः शास्त्राभ्यनुज्ञातः इति वैगुण्यादस्तु
नाम न्यूनफलजातामुख्यासंभवेतु शास्त्रेणैवास्याभ्यनुज्ञातः पुनः इति पशुमादि प्रयोगइव च मसाभावान्मुख्याभावादवि
नवैगुण्यं सा कांक्षं च मुख्य फलं । अतः प्रतिनिधावपि संपूर्णफलं तैवेतित्वमीमांसायां न्यरूपितत्तस्य रिश्वात्तनश्चाति
भिरिति । तत्तश्चाद्यपक्षेसंकल्पेपि प्रतिनिधानुः फलार्थतयैव प्रतिनिधिनाविधेयः ॥ तथापचिद्प्रतिनिधिर्यानादिना या
ति तद्दान केवलं प्रतिनिधानुरेवपात्रावैगुण्यात्फलन्यूनताकिंतु प्रतिनिधेरपि स्वफलन्यूनता । तथाहि । यदा सोपानत्का १०१९

तितदा पद्भ्यां यातुर्मुख्यस्य यत्संपूर्णं न षोडशांशं लभते दातुर्यानादिना यातितदा यानादिना यातुर्मुख्यस्यपरफलं यानम
र्धफलं हंतीति प्रतिपादितं तच्छोडशांशफलं लभते । यद्वा षोडशांशावाक्य मुख्यापेक्षया त्रात्रूपचनं ततोयानवाक्यंप्र
वृत्तं षोडशांशार्धं प्रतिपादयति । सर्वथापि यात्राफलद्वात्रिंशत्तमांशेन विवादोपानेनयातुः प्रतिनिधेः । तेन पद्भ्यां
यातिभिः ॥ प्रयोजनोल्पवसरे प्रतिनिधिपत्ते उपानद्दानादिना यात्राकरणे कारयितुरेव फलन्यूनतेतितद — दस्तितं । प्रति
निधेस — — फलन्यूनताया असंभवात् । यानमर्धफलं हंतीति वाक्यप्रवृत्तेरप्रतिहतत्वात् । नचपद्भ्यां यानेनच यातुः प्रति
निधेरपिषोडशांशरूपतुल्यमेव फलं भवतीति युज्यते । कर्मणा — स्य महतां फलानां चेस्व गोचरे । विभागः स्थानसामान्या
द्विभागेपि घोडि तु इतिन्यायेनस्वफलेपि वैचित्र्यौचित्यादिति । एवमेवाद्धिर्भौजिनंततीयांशं हरेत्तीर्थफलस्य च । वाणिज्यं
श्रोसवथाभागाः सर्वं हरतिप्रतिग्रहइति । तथा यस्य हस्तौ च पादौ — — वसुतंयतं विद्यातपश्चकीर्तिश्च स तीर्थफलमश्नु
ते इत्यादौ च गृहानोपादानयोरपि फलतारतम्यमुभयोरप्युत्तेयमिति । तथा यपक्षे प्रतिनिधिना प्रतिनिधातुः पित्राद्युद्देशे
न तीर्थ — तर्पणश्राद्धे प्रथमं कार्यं ततः स्वपित्राद्युद्देशेनापि कार्यं पुराणेस्वपनदानेन प्रेतप्रेदितं कंचिद् द्विजगतं प्रकृ

१०११ स्यआरोगलागयाश्राद्धे प्रेतराजस्यपिंडकं·समुद्दिश्यबंधुभिःसार्धंस्वपितृभ्यस्ततोददादितियापद्मपुराणेचपिंडनिर्वपणंतत्रप्रेः
तानामनुपूर्वशः।चकारश्चस्वदायादादितितृश्चक्रेत्वनंतरमितिसूचनः।इत्याद्यपक्षोविवृतः।द्वितीयस्तुपक्षोपश्चत्वंकारयेदिस
नेनविहितः·तत्रब्राह्मणोद्वाहयत्संविधानाच्चतुर्गुणस्यफलोद्देशेनामुकतीर्थयात्रांस्वद्रव्ययानादिनाकारयिष्यइतिसंक
ल्पमात्रंइतरेणतुवेधसंपूर्णस्यफलोद्देशेनकरिष्यइति·तथायानप्रतिग्रहादिप्रयुक्ताफलन्यूनतापिकर्तुरेवनकारयितुःसं
विधानात्मककर्मांतरस्यचतुर्गुणवत्फलजनकस्यावैगुण्यात्प्रतिनिधिपक्षेतुयात्रैवोभयोरपिफलजनिकेतितद्वैगुण्या
दुभयोरपिस्वफलन्यूनतायुक्तेतिवैषम्यं·तथास्मिन्संनिधानपक्षेकर्त्रायात्रायाःस्वाधिकारिकत्वात्स्वपित्राद्युद्देशेनै
वतीर्थतर्पणश्राद्धादिविधेयंनसंविधातृपित्राद्युद्देशेनेति·तृतीयपक्षेतुयात्रार्थमिदंद्रव्यंदानादिभ्यःसंप्रददइतिसंक
ल्पनीयंविवाहयागादिधर्मार्थद्रव्यदानवत्·अस्मिन्नपिपक्षेस्वाधिकारिकत्वात्स्यात्रायाःकर्तुरेवयानादिप्रयुक्तफल
न्यूनतातर्पणश्राद्धेचतत्पित्राद्युद्देशेनैवेतिस्पष्टंप्रयोजनमपिसर्वंविस्तरेण॥ ॥इतिश्रीमत्द्वैतनिर्णयेतीर्थयात्रासं
शयोद्देशपरिच्छेदः॥ ॥यात्रा——तुकस्येउक्ता।मुख्याभावेप्रतिसाम्यादुपस्थितमातिदेशिकंसापिंड्यंतंनिरूपयितुं १०११

तदपेक्षिणक्षिप्तमौपदेशिकंसापिंड्यंनिरूप्यतोगणशाशमोपितरावपिनत्वाकरोत्यमुं·औपदेशिकेसापिंड्यनिर्णयंभद्दशं
करः।इहखलुसर्वस्मृतिषुअसपिंडानामितिपरिणेयकन्यायाविशेषणंश्रूयतेतथैतेरेवगुणैर्युक्तःइतिवरेपितदर्पितदिश्य
ते·अतएववरनिरूपितंकन्यांकन्यानिरूपितंचवरेपृथगेवसापिंड्यंनतुसंयोगवद्व्यासज्यवृत्तुभयनिरूपितमेकमेवास्य
तोन्यतरतोनिवृत्तेतस्मिन्निवर्तेतनथासतिकन्यावरयोरुभयोरप्यसापिंड्यविशेषणवैयर्थ्यापत्तेरन्यतरस्यैवनतुभयोरुभ
यत्रोक्तेःफलस्याभावात्·तथाचशिष्टाजरद्दाक्षिणात्यानांसर्वेषामविप्रतिपन्नोव्यवहारः।एकतोनिवृत्तंसापिंड्यंनान्यत
इति·तथायद्यप्यत्रचेसमासबलात्पर्युदासःप्रतीयतेनप्रतिषेधः।नञ्जोहिक्रियायान्वयेसभवतिप्रसज्यप्रतिषेधोयं
क्रिययासहनजितिलक्षणात्·नचपर्युदसनीयानुष्ठानेपर्युदासेमदोषोस्तीध्यतेनहीतारंवरणीतेनानूयाजेष्वितिवद्
विहितप्रतिषिद्धत्वात्तथापीहसपिंडविवाहेप्रायश्चित्तस्मरणात्पर्युदासोप्ययंनिषेधतुल्यबलः।अत्रप्रयोगपारिजाते
सप्तपुरुषांतरालेपिकेचिदभ्यनुज्ञातिधयोतिस्त्रिशपर्द्विंशन्मते·तृतीयांमातृतःकन्यांतृतीयांपितृतस्तथा।विवाहये
न्मनुःप्राहपाराशर्योगिरायमः।चतुर्विंशतिमते·तृतीयांवाचतुर्थींवापक्षयोरुभयोरपि·विवाहयेन्मनुःप्राहपाराशर्यो श

१०२० गिरा यमः। पैठीनसिः। त्रीन्मातृतः पंच पितृतः इति तान्दृष्ट्वा केचित्तथैवाहुस्तिष्ठंति तल्लिखितामसंमतं। न चाहि
।तत्रापदिता वदेव मुख्य ब्राह्मादिविवाहेषु दानात्सापिंड्यनिवृत्तेस्तत्रो सन्त्वा असपिंडैवेति ईशा षेविषये दोषाभाव इति॥ ब्राह्मा
दिविवाहचतुष्टयेव दानात्सापिंड्यनिवृत्तिर्माधवाचार्यैः स्मृतिरत्नावल्यादिषु दानात्तु लेकन्यायैलक्ष्यस्त्रिया विवोढुः स्वापि
नार्थमुक्तेति। तन्नावद्युक्तं। दानैः सपिंड्यनिवृत्तौ प्रमाणाभावात्। यत्तु प्रमाणमुक्तं तैः ब्राह्मादिषु विवाहेषु तान्दत्ता कन्यका भ
वेत्। भर्तृगोत्रेण कर्तव्यास्तस्याः पिंडोदकक्रियेति मार्कंडेयपुराणवाक्यं तत्र गोत्रव्यवस्था। मात्रमुक्तं। न सापिंड्यव
स्थापि। अतएव विज्ञानेश्वरेण मातृसपिंडमध्यवस्थायां ब्राह्मादिविवाहोढासन्तु पित्रा भर्त्राश्चापि वा सह मातुः सपिं
डीकरणं कुर्यादित्युक्तं। तथा ब्राह्मादिविवाहचतुष्टयेपि गोत्रेणिकस्य एवोक्तः। नचदत्तकदानस्य दानात्सापिंड्यनिवर्त
कत्वकल्पप्रतिग्रहात्सापिंड्यसंपादकत्वदर्शनात् ब्राह्मादिविवाहचतुष्टयेपि तथैव कल्प्यं तस्मान्न्यायतो दृष्टे विषये सामा
न्यायोगात्। पुत्रप्रतिग्रहविधेस्तु भवेदुपपन्नानुवृत्तिप्रयुक्तकार्यनिवृत्तिरूपत्वात् पितुः प्रतिग्रहात्तु स्वच्छतत्स्वर्यप्रवृत्तिरेव
प्रयोजनं कन्यादाने तु पितुर्द्वारा दानि वैषम्यं। यदि तु पुत्रदानप्रतिग्रहे गोत्रादि कथं जनपितुर्न भजेद्यमः सुतः गो १२०

त्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधा इति मनुवाक्ये गोत्रग्रहणस्य सापिंड्योपलक्षकत्वात् यथाश्रुते च सप्रवरत्वप्राप्त्यनिव
त्यापत्तेस्तद्वत्कन्यादानेप्युच्यते। तत इह स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे इति वचने गोत्रग्रहणमुपलक्षणं सापिं
ड्यस्य स्यात्तत्तश्च विवाहहोमसप्तपदादेर्गासुरादिविवाहचतुष्टयेपि सत्त्वात्तत्रापि सापिंड्यनिवृत्तिरापद्येत। तस्मात्क
न्यादानेपि तु द्वारा पंचपक्षं सप्तपदात् वाचनिकं गोत्रमात्रनिवृत्तिः। सापिंड्यनिवृत्तिस्तु नास्त्येव। सापिंड्यापत्तिस्तु
गोत्रांतरापत्तिरिव विवाहेनैव। पुत्रप्रतिग्रहे तु पुत्रशब्दस्य संबंधिशब्दत्वात् पुत्रदानप्रतिग्रहाभ्यां कुर्यादिति वाक्यार्थेन तस्य
प्रयोजनकत्वेन जाते दातुरपत्यानुवृत्तिनिवृत्तिप्रतिग्रहीत्रनुवृत्तिप्रवृत्तिप्रयोजनत्वेन ज्ञातुत्पत्तिवाक्याद्वग
तमपरित्यजतेयमनु गोत्रेनागोत्रनिवृत्तिरप्यधिकोक्तेति वैषम्यं। किंच व्याप्यपुत्रत्वापत्तिनिवृत्तिभ्यामेव व्यापकसापिं
ड्यापत्तिनिवृत्ती अनुमेये दत्तकेन तु कन्यादाने तादृगनुमापकमस्ति। अतएव विज्ञानेश्वरेण प्रलानां येन पितरौ कुर्युरिति
पित्रादीनां सापिंड्यप्रयुक्तदशाहाशौचापवाद इत्युक्तं। ब्राह्मादिविवाहचतुष्टयेव दानेन सापिंड्यनिवृत्तौ मातृष्वस्त्रादि
कन्या परिणेया स्यात्। तथा पुत्रिकाकरणेपि दानविधिसद्भावात्सापिंड्यनिवृत्त्यापत्तेरनिवृत्तिमूलिकात्वन्यमतेन हो

त्रेणमातुः सपिंडीकरणादिक्रियानस्यादिवकुषणेरयंपक्षोस्माभिर्मातुलकन्यापरिणयस्यदुराचारत्वमुपपादयद्भिः
शास्त्रदीपिकाशोनिरस्तः। अथोच्यते· दानेन सपिंडत्वनिवृत्तावपि असपिंडामितिच निषेधे चतुर्थ्यादौ प्रवृत्तेपि षट्त्रि
षष्ठतचतुर्विंशतिमतपैठीनसिवाक्यैर्विशेषविषयैः सामान्यविशेषन्यायेन सामान्यरूपसपिंडानिषेधो वाध्यतइति·
तदप्ययुक्तं असपिंडामितस्य सामान्यशास्त्रत्वाभावात्· तथाहि· पंचमात्सप्तमादूर्ध्वमित्येतदसपिंडापिंडामित्ये
~~त्यसामान्यशास्त्रत्वाभावात्· तथाहि· पंचमात्सप्तमादू~~ तत्रान्योन्यांशयाविवाहकरणान्मात्रेवमेकशक्यतामा
पद्यतेसप्तमोद्रष्टादिति· तत्र श्वेत सप्तापितृपदीकुर्वत निषेधोयं विशेषशास्त्रमेवज्ञानमितिन चतुर्विंशत्यमतादिभिः सा
मान्यविशेषन्यायेन वाध्यते· न चासाववकाशनिरवकाशन्यायेन· अयंच न्यायः पृथक्त्वनिवेशात्संख्यया कर्मभे
दाः स्यादित्यधिकरणे सिद्धः। यथाहि· तत्र सप्तदशप्राजापत्यान्पशूनालभत इत्यत्र कर्मैक्ये एव पशुत्वेस्यन्नेए
स्मिन्नेकादशावदानगणेन्योदकप्राहोउपादीयमाने सप्तदशानां साधनत्वोपादानमयुक्तं वाध्यते सुक्तं एवमात्रा
पिषट्त्रिंशन्मतादिना तृतीयादिकन्याग्रामचर्यमानायांसप्तवर्ज्यादिति सप्तानां वर्जनमयुक्तं वाध्यते तिमीमांसाधि

करणविरोधः। किंच यथा तत्र चोदकोपदेशयोर्विरोधो यागोत्तरकस्मिन्यासमाधीयते तथेहापि सप्तनपरिणेमातुल
तायापरिणेयेत्यनयोर्विरोधो द्वितीयादिपरिणये दोषापिक्यकस्मिन्यासमाधीयते इति न किंचिदेतन्निवाध्यमिति· त
देतदेवाभिप्रेत्य विज्ञानेश्वरेणोक्तं यत्किंचित्तु पंचमी सप्तमी चैवमातृतः पितृतस्तथा। त्रीन्त्रीनतीत्य मातृतः पंचमी
त्यपि तृतदिति तदर्थो धार्थं न पुनः प्राह्यर्थमिति। निषेधशब्दस्य पुत्रदोषविशेषप्रतिपादनार्थः इदं शोचोदाहर
णं हेमाद्रिणोक्तं· वामनपुराणे नंदासुतामंगमुपान्वरेतश्वेतिका सुजपासुमांसं· पूर्णासुपोपि सपरिवर्जनीयेति
सामान्यनिषेधेपि षष्ठ्यां पालेत सप्तमात्पुष्पं· पंचदशीं चतुर्दशीं मष्टम्यां विशिरदशोऽभ्यंगश्च संनिहितेसंवंधेदोषा
पित्र्यं व्यवहितसंबंधे दोषाल्पत्वं सर्वेषामियमेवं· न हि भगिन्युद्वाहे पितृव्यपुत्र्युद्वाहे च तुल्यो दोषः। एवं च पितामह
हस्य चतुर्थपंचमीदानां च संततो योन्य· अत एव ततद्गमने प्रायश्चित्तानां स्यमहत्त्वेस्मृतिपुक्तं· एतेन माधवाचार्ये
र्विज्ञानेश्वरमतमयुक्तं पंचविंशत्मतादिविशेषवचनानां पदस्पलंरंकृतं अशुकस्मो वेतितदपिप्रत्युक्तं· अ
नुकल्प सपिंडितानां चतुर्थपंचमपष्ठानां तुल्यानुकल्पत्वाज्ञायोगावश्यकी दोषगुरुलघुभाव कल्पना· एकत्वे

१२२ स्यैव कल्पनास्तु किमनुकल्पस्य त्वकल्पनयेति। किंच मैत्र्यात्मादिविवाहे सपिंड्यनिषेधाप्रवृत्तेरेवोक्तत्वात्कन्यासं
तानेसर्वथापि सेषा भावान्नानुकल्पे इत्यासुरादिविवाहविषय एवानुकल्पः संमतस्तेषां ब्राह्मादिविवाहे सापिंड्या
भ्युपगमस्य वादिनां केषांचिदनुकल्पोनेष्ट एवेत्यलमतिप्रपंचेनेत्युपरम्यते॥ ॥इति श्रीमत् औपदेशिकसापिं
ड्यनिर्णयः॥ ॥एवं निरूपितं ऊर्ध्वं येन सापिंड्यं मिरस्पे कूटारोरावया वान्वयेन चिन्तोमेन श्वरादिभिर्निर्णीतमौपदे
शिकं सपिंड्यं निरूपितं अथेदानीमातिदेशिकं सापिंड्यं निरूप्यते। नन्वतिदेशिकं सापिंड्यमाह समंतुः पितृपत्न्यः
सर्वामातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयान्यथा संक
रकारिणः स्युरिति। अत्र सपत्नमाता महातत्कूटस्थापेक्षतुः पुरुषं सापिंड्यातिदेशो वाक्यार्थस्तात्पर्यविषयीभूतः। त
था हि। विशिष्टविधिर्नेवयत्रैक विधिनापर विधिः। तदिदं पौर्णमास्यधिकरणे आचार्यैर्विस्तरेणाग्रेवक्ष्यते निरू
पितं। तद्यथा विद्दहाक्यविहिते कर्मणि गुणविधित्वे आग्नेयपदार्थविधिनाष्टाकपालपदार्थविधिराक्षेपतो न तस्मा
त्तेषथा वाष्टाकपालपदार्थविधिनाग्नेयपदार्थविधिः। एकमिह सुमंतुवाक्ये पत्न्यन्तरविधिनान्यतरदाक्षेपतो मत १२२

भ्यते। न वात्रग्रहवदेकमुद्देश्यतावच्छेदकमप्यस्ति। सपत्नमातृभ्रात्रादिषु। तेन सपत्नमातृभ्रातरमुद्दिश्य सापिंड्येतिदिष्टे
सपत्नमातृभगिनीमप्युद्दिश्यावश्यं सापिंड्यातिदेशाय पृथक्प्रयत्न आस्थेयः। अथापि सपत्नमातृभ्रातृभगिन्योः सपत्नमा
तामहापत्यत्वमेकमनुगतं ग्रहत्ववदुद्देश्यतावच्छेदकमुच्यते। एवमपि तद्दुहितृणां तेन्योद्देश्यतावच्छेदकेन क्रोडीकाराभा
वादवश्यं तत्र सापिंड्यातिदेशाय पृथक्प्रयत्नो गाकार्य एव। एवमुत्तरत्र। तत्तश्चावाक्यभेदः॥ एवं सापिंड्यानुवादेनानेकेषां
सपत्नमातृभ्रात्रादीनामुपादानाभ्युपगमेपि वाक्यएव सापिंड्यप्रासेश्चन तदनुवादसंभवः। तेनेह वाक्ये तद्दुहितरश्च भगि
न्य इत्यत्र वक्ष्यद्वपरामृष्टयोः सपत्नमातुर्भ्रातृभगिन्योर्दुहितृणामेवोपादाने न्यानुपात्तानामपि सपत्नमातुर्भ्रातृभगिन्योः पु
त्राणां संग्रहः। सिध्यतीति तेप्युपलक्ष्यते तीति तेप्युपलक्ष्यंते दुहितृपदेन। ततश्च तद्दुहितरवाक्येपि तदपत्यानीत्यनेन दुहितृपत्यानी
वपुत्रापत्यान्यपि गृह्यंते इति। एते नैव तद्दुहितरश्चेतिच्चकारस्य सर्वत्रानुषंगकत्वाद्दक्षिणामियोद्दिश्य गवादयः सापिंड्य
मुद्दिश्य सपत्नमातुर्भ्रात्रादयः परस्पर समुच्चित्यविधीयंत इतिवाक्यभेदोद्धारपरास्तः। च। कारानुषंग क्लेशदोषासंगश्चास्मि
न्पक्षे स्यात्। अतो वश्यंभासतः सपत्नमातृभ्रात्रादीनेवोद्दिश्याभासतः सापिंड्यातिदेशविधिर्वाच्यः। तत्रैव त्वसुद्देश्यं वाक्य

१२३ परिसंख्यायां दृष्टैकत्वाधिकरणोपपादितो वाक्यभेदो दुरुद्धर आपद्येत। तस्मादेवमुं वाक्यस्यार्थः। भ्रातृभगिनीदुहितृप
त्यशब्दैः सपत्नमातामहकुलस्याचतुर्थमभिव्याप्य सपत्नमातामहकुलं लक्षयित्वा मेन सह तस्य सपत्नमातातस्य मातुलभ्रातृ
व्यभगिनीभागिनेयपदैर्लक्षितं सापिंड्यं विधीयत इति सिद्धं तु हि तत्पदैर्न पुत्राणामप्युपलक्षणं तत्पुत्राणां च भगिनेयानामनेनेति।
एवं सिद्धे सति तस्य सपत्नमातातृत्प्रत्ययस्याप्यसपिंडा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथु
ने इति मनुवचनादसापिंड्यविधिर्दृष्टव्यः। न वास्य पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेत्यनेन समानार्थत्वं लक्षणाप्रसंगा
त्। न च मातृतः षष्ठे पितृतोष्टमे विवाहातिप्रसंगात् न च चरितार्थेविरोधालक्षणा। पंचमात्सप्तमादूर्ध्वमित्यनेनैवमनुव
चनस्य बाधात्। ननु पंचमात्सप्तमादूर्ध्वमित्यपि सामान्यया वचआतिदेशिकसापिंड्ये च सावकाशमिति कथमनयोर्मध्ये
यातवत्कचसैव बलीयस्त्वोच्यते। उच्यते। यद्यप्यत्र सामान्यविशेषन्यायेन सावकाशन्यायेन वा बाध्यबाधकभावव्यवस्थानसं
भवति तथापि विधिस्पृष्टे निषेधो नावतरतीति न्यायांतरेणो मनुवाक्यमेव बाध्यते। तथा हि। यद्यप्यसपिंडेति नञुपपदसं
बंधात्सपिंडव्यतिरिक्ता दारकर्मप्रशस्तेष्विति पर्युदासः। प्रतीयते तथापि यथाश्रसपिंडां यवीयसीमित्यत्र पर्युदासा १२३

श्रयणे सपिंडापरिणये दोषो न स्यादिति तत्सिध्यै निषेध एवाभ्युपेयते निषेधफलो वा पर्युदासः एवमिहापि। ततश्चोपदेशिक
सपिंडास्थले षष्ठादयो पंचमात्सप्तमादूर्ध्वमित्यभ्यनुज्ञाविधिप्रवर्तैर्वैधीमाप्तिमुपजीव्य मातुरसापिंडामिति निषेध
प्रवृत्तिर्वाच्या। आतिदेशिकसापिंड्यस्थले न कस्यचित्परिणयाभ्यनुज्ञाविधिरेवाभावाद्रागप्राप्तिमेवोपजीव्य मातुरसपिं
डामिति निषेधः प्रवर्तते। तत्रायं निषेधो विनिगमनाविरहात्पंचमात्सप्तमादूर्ध्वमित्यनेन विधिनानुज्ञातं प्रवर्तितुं
शक्तो येव रागतः प्राप्तिमुपजीव्येति मयैं धीं प्राप्तिं बाधत इत्यक्षते इति मातुलसापिंड्यापिंड्यमिति निषेधस्य रागप्राप्तिविष
य आतिदेशिकसापिंड्य एव प्रवृत्तिः। सोयं न्यायो हेमाद्रिणा कालनिर्णये शिवरात्रिप्रकरणे यदा पूर्वैव मध्यरात्रिव्याप्तिमतीत
स्यामुपोषितायामुत्तरदिने [illegible] यद्यनुवृत्ता यो चतुर्दश्यां तदंत एव पारणा कार्येति धर्मीतमुक्तः। रात्रिभोजनेपि बाधक
भावान्न निषेधस्य रागप्राप्तभोजनविषयत्वात् रागप्राप्तस्य भोविधिस्पृष्टे निषेधाप्रवर्तेर्विधिवैयर्थ्यापत्तिकदिम दिप्रसंगा
दग्नीषोमीयहिंसादिवत्। उपपादयिष्यते चैतत् तैलाभ्यंगकालनियमप्रस्तावे इति। तत्रापि अत्रापि कापि तत्तिथिनैलाभ्यं
गो विहितः प्रतिषिद्धश्च ऐयुपक्रम्यपंथः। निषेधस्य रागप्राप्ततैलाभ्यंगविषय त्वादिहित तैलाभ्यंगविषयत्वे विकल्पप्र

१२४ संगात्रागमात्सविधिप्राप्तोभयविषयत्वेन च निषेधस्यैकत्र विधिसापेक्षोनिषेधोन्यत्र तन्निरपेक्षस्तद्वदितिविधिचैवमप्रम
सज्येतेति। अपिच ऊर्ध्वं सप्तमात्पितृबंधुभ्यो मातृबंधुभ्यश्च पंचमात् दुह्वहेदित्यादिर्गौतमीयादिविवाहविधेः पुत्रोत्पत्ति
फलकतया काम्यवाक्यात्काम्यं निषेधस्य बाधकमिति न्यायेनापि मातुः सपिंडान्वोढास्येतिनिषेधबाधकसंयुक्तमि
ति। अपिच सामान्यविशेषन्यायेनाप्यत्र वाध्यबाधकभावः संभवति। तथाहि। असपिंडा यवीयसीमित्येतत्स्तेनिषिद्धवत्
तथा सापिंड्यं सप्तपुरुषमित्येतेन सह समानमूलकत्वाच्च पंचमात्सप्तमादूर्ध्वमित्येतत्प्रायेदोपदेशिकसापिंड्यमात्रविषयं
नातिदेशिकसापिंड्यविषयमित्यविवादं अतोनैतत्सामान्यवाक्यं किंतु विशेषवाक्यमेव। असपिंडा च या मातुरितिमानवं तु
औपदेशिकातिदेशिकयोः सापिंड्ययोः प्रवर्तमानं सत्सामान्यवाक्यमिति यास्तत्र कृत्वा वाक्येन विशेषशास्त्रेण वा ध्यते।
यत्तु यान्तचरवकौ यं सावकाशं न च मादावपि प्रवर्तते रिति। तस्मादूर्ध्वशब्दस्याव्यवहितत्वेवोत्सर्गिकप्रवृत्तेः। मानवं वाक्य
श्रेष्ठं तो हि सत्यं व्यवधानमाश्रीयेत न तत्र विरुद्धं तिष्ठेत् इति तस्यां दशायां सामान्यविशेषभावेनैव वाधोभय
तितस्मात्सामान्यविशेषभावेनापि मानवस्यैपदेशिकसापिंड्यस्य तेबाधः शक्यउपपादयितुं मीमांसायां सकलसंम १२४

ति भिरिनापि प्रसंगो मानवस्यैतिनशिष्टाचारविरोध इत्युपरम्यते। न चेदं स्वकपोलकल्पितं क्वापि निबंधेषूक्तत्वादि
तिशंकनीयं मदनपारिजातएव प्रतिपादनात्। तथा तद्ग्रंथः। वाठं सपत्नमातृपितृकुलसपिंडामाचसगोत्रापि भ
वतिमातुस्सपिंडा चेति तत्र विवाहप्राप्तापिदमुच्यते। मातुरस्सपिंडेति। अस्यायमर्थः। मातुरसपिंडेति पदद्वयोक्तेः श्रवक्र
तत्स्यान्मातुर्या सपत्नमाता तस्यापापितृकुलसपिंडा सा मातुर्वरमातुरसगोत्रा तस्या एव च सपिंडा चेति अथवैवास्यार्थः।
यदि तु वरमातुर्या सपत्नमाता तेतिनयोज्यते तदा श्रुतानुतरो मातृशब्दो किंपरात्विति विचार्यते। किं सपत्नमातृपरत्वे वतु त
सापिंड्यप्रतियोगिनां पासान्नमातात परा विति: नापः। इमौ हि मातृशब्दौ मनुवाक्यस्यस्य मातुरसपिंडेत्यस्य प्रयो
जनार्थमुपात्तौ। तेन षष्ठ्यंतमातृशब्दे समानार्थौ। न च मनुवाक्ये मातृपदस्य गौणलाक्षणिकमातृपरत्वां प्रमाणम
स्ति। न च प्राप्त्यारम्भं तरेण कापि दनुपपत्तिः। मुख्यां वरमातरमेवादाय अस्मदुक्तरीत्या मातुरसपिंडेत्यस्य तदर्थयोजन प्रवृ
त्तस्यक्वग्रंथस्थयोजनसंभवात्। न च सपत्नमातुः पितृपदस्य शक्याजनिकायास्त्वीतमात्वस्य मातृपदशक्यत्वात्स्तो
के। समं तु वाक्ये च पितृपत्न्यः सर्वा मातरः स्वसारिदशान्तर्थक्याप तेः। किं चाप पक्षे प पमतिरोषः। असपिंडा च या मातु

१२५ रितिमातृशाद्दत्तकरावोपचारात्सपत्नमातृप्रसङ्गसपिंडापदेशान्वियादितिपुरुषद्वितिद्वयविरोधः। नचायपक्षेउत्तर
ग्रंथोपिलगतिलथाप्येत्यादिः। नच सपत्नमातुरेव मातृत्वमस्त्वहेतत्स्मृतौ योन्यदिति वा वाच्यं· तथा सति सपत्नेमातृसपिंडे घाभिना
तुल्यादिव्यवहारं दर्शयति सुमंतुरितिफक्किकान्कार्या किंतु सपत्नमातरि मातृव्यवहारं दर्शयति· सुमंतुरितिकलव्या· अथ कथमा
तृसपिंडे स्याहेति उत्तरग्रंथो वनार्यते· तदपि न· भवतोभातृसपिंडाचेतिमातृपदस्य सपत्नमातृपरत्वात्· नच सपत्नमातामा
हकुलेजाकन्या सुमंतुवाक्ये न सपत्नमातुसापिंडा किंतु गयायान्वये नैवेति· अथचेद्द्वितीयपक्षउच्यते· सुमंतुवाक्योक्ता सा
पिंड्यप्रतियोगिनां याः साक्षान्मातामहस्तदुत्तरौके वत्सौ मदनपारिजातग्रंथगतौ मातृशब्दाविति· तदपि न· सुमंतुवाक्येयं प्रति
सपत्नमातालं प्रत्येव सपत्नीमातामहकुले चतुर्थमभिव्याप्य सापिंड्यातिदेशाय स्यपत्नमातालत्साक्षान्मातुः स्वभर्तृस्वपितृ
तत्तृणमिव सपत्नमातामहकुलेशापिंड्यं सुमंतुवाक्येनानुक्तेः। अथ यथापूर्वमेकवाक्यतोपपत्त्यर्थं सपत्नमातृभ्राताद्दिशौ
व्वेः सपत्नमातामहकुलमावेचतुर्थंलक्ष्यत इत्युक्तं· एवं प्रतिसपत्नमाता— तस्याचपासाक्षान्माताततो भयत्र व्यासक्तो
यः। समुदायत्वेलक्षणापि स्वात स्य सपत्नमातामहकुलेसापिंड्यं बोध्यते· सुमंतुवाक्येन— —पासाक्षान्मातायेम पूर्वाइति १२५

वध्यस मर्पणात्स समुदायलक्षणानस्यान्विन्तपत्याः सर्वा इति साक्षान्मातुरप्युपादानात्· अतोयं प्रति सपत्नमातानसाक्षान्मा
तुरपिस्यापत्स सपत्नमातामहकुलेसापिंड्यादुक्तदूषणोद्धारो द्वितीयपक्षे इत्युच्यत इति मैवं। यं प्रति सपत्नेमातानत्साक्षान्मातु
र्विवाहाभावेन सापिंड्यातिदेशवैयर्थ्यात्· सुमंतुवचनस्यचविवाहमात्रविषयत्वेनाशौचप्रवृत्तिरूपप्रयोजनासंभवात्·
यद्यपियं प्रतिसपत्नमातातस्य पुंसः सपत्नमातामहकुलपुंसश्च परस्परं विवाहाभावेन सापिंड्यातिदेशवैयर्थ्यं तुल्यं एवं यं प्र
तिसपत्नमातातस्याः कन्यायाः सपत्नमातामहकुलकन्यायाश्च· तथापि स्त्र्यपत्यसमुपत्ययोस्तावद्विवाहाभावापवादकाद्यभेदभ
यादेवावश्याभ्युपेया यांसपत्नमातामहकुललक्षणायामनुषंगात्तुं द्व्यपत्यान्योन्यं कन्याद्वयस्यचान्योन्यं निष्प्रयोजनमपिसा
पिंड्यमनिवार्यं स्थिद्ध्यप्रतिनदोषाय· यत्तु अपत्येप्रतिसपत्नमातालन्मात्रस्यैव सापिंड्यबोधनं सप्रयोजनं मंत्राखभेदानापादकं चे
ति तत्साक्षान्मातृत्वासक्तकुलक्षणानिवर्जानिष्प्रयोजनमान्येति वैषम्यमिति· तस्मात् मन्मदनपारिजातग्रंथौ यौ कवत्सौ मातृ
भ्रात्रौ यं प्रति सपत्नेमातावदाय साक्षान्मातृपरादित्यपदं द्वितीयपक्षोप्युक्त इति मदनपारिजातग्रंथस्यान्यथा व्याख्याना
संभवाद्वयश्चमकामेनाप्युपदुक्तैव व्याख्याप्याख्यायसीमित्येति· एवं चाक्रिमिषापिमदनपारिजातग्रंथे न संवादो भवति·

१२९ तस्माद्गृहस्थस्य पत्न्या माता तद्वत्स्यादिच्छ सपिण्डा च या मातुरिति मनुवाक्येन स्वजनकसपत्न्या मातामहकुले आचतुर्थं विवाहनि
षेधः सिद्धः। एवं च यद्विज्ञानेश्वरमेधातिथिप्रभृतिभिर्लक्षणया पंचमात्सप्तमादूर्ध्वमित्येतत्तु स्वार्थतामनुवाक्यस्यापिण्डा च या
मातुरित्यस्यांगीकृतालक्षणाप्रसंगात्। असपिण्डत्वेनैवात्रैव च सिद्धे मातृगणोऽनर्थक्याच्च परमतमेव विभवादुक्तं। एवं पिंडे
सपिंडत्वस्याभावेऽसगोत्रा चेति च शब्दो नोपात्तो वनमेधातिथिनोक्तेरत्यसंभूयसा॥ ॥इति श्रीमत्सु द्वैतनिर्णये अतिदेशि
कसापिण्ड्यसंशयोद्भेदपरिच्छेदः॥ ॥अत्र यद्यपि यदुक्तं स्मृतिपुराणेषु श्राद्धागत्वेन गुणफलार्थतया च मांसविधानं युगविशे
षापुरस्कारेण दृष्टत्वेन तथा कलौ तन्निषेधः। अक्षतां गां पशुश्चैव श्राद्धे मांसं तथा मधु। देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेदि
ति क्रत्वर्थपुरुषार्थयोर्विशेषेण श्राद्धे निगमे मांसनिषेधात्। अक्षतां अनुपभुक्तां पुनर्विवाहे वर्जनीयेत्यर्थः। नन्वत्र श्राद्धे मांस
मिति समभिव्याहारात् श्राद्धार्थस्यैव निषेधो न तु पुरुषार्थस्य कामप्रमितस्य बाधकमिति न्यायेऽगोदोहनस्य फलार्थेन यथा पुरुषा
र्थनिषेधबाधेन वेष्टव्यादिति वाच्यं। सत्र सप्तम्याधिकरणत्वमात्रप्रतीतेस्तादर्थ्याप्रतीतेः। तत्परत्वे लक्षणापत्तेः। गुण
फलसंबंधस्याश्रयत्वेन श्राद्धस्याधिकरणत्वाविशेषात्। तस्मात्फलार्थपुरुषार्थमांसविषेधः। गोपशुवत्। अतएव दे १२९

दिवर्हिर्धर्मणोः प्रधानसंबंधित्वाच्छ्राद्धे विधिर्न तु लाक्षणिकोऽन्यत्र लक्षणाभावात्। सन्निधौ विधेयानुपस्थितेरिति। यदा तु गुणफ
लार्थतया मांसेन तत्त्वकृतिकमेव विधीयते पूर्वे रूपादिरतैव तदा फलार्थनिषेध एवेति नेयं। कस्मात्कर्तव्यामन्नताद्यस्य पंचे
सत्र वनपरिसंख्या स्वार्थस्यागादिदोषत्रयापत्तेः। दीर्घकालब्रह्मचर्यादिनिषेधकवाक्यविरोधापत्तेश्च। अतः पंचेति प्रदर्श
नार्थं। एतद्वचनोपात्तस्योपाधिनाव्यपंचसंख्योपपत्तिः। कानि पंचेत्यपेक्षायां च प्रातिपदिकार्थनिर्देशार्था अक्षतेत्यादि प्रथ
मा। अन्यथा विवर्जयेदित्यनेनान्वयेऽद्वितीयापत्तिः। नरगोपशुसन्निधानान्मांसप्रकृतित्वेन गोरेवसंबंधाद्गोमांसस्यैव फलेऽनि
षेधः। न च प्राप्त्यभावान्निषेधानुपपत्तिः। गव्यस्य तु मांसेन तृप्तिर्मासान्दशैव तु मासानेकादश प्रीतिः पितॄणां तु माहिषेण तु
गव्येन दत्ते श्राद्धेषु संवत्सरमिहोच्यत इति व्यासवचनेन गव्यविशेष्याकांक्षायां स्वैवचनोपात्तमांसान्वयेन गोमांसविधानस्य
हेमाद्रिणाभिधानादिति वाच्यं। विकल्प्यमानत्वात्। गोपदस्यानुषंगेण वा मांसपदान्वयः। सन्निहितत्वेन वा। नाद्यः समस्तस्य कां
क्षितरूपाउपस्थितस्यानुषंगायोग्यात्। इह संबंधेन व्यपेक्षालक्षणसामर्थ्याभावेन पशुशब्देन समासानुपपत्तिप्रसंगात्। द्वितीये
न पशुनान्वितस्य वैयधिकरण्येन मांसान्वये वैरूप्यापत्तेश्च। नोत्तरः। यएतेनानिराथान्वेमैत्र चैवे कत्वाऽन्वयेन निराकांक्षस्या

१२७ परत्वान्वयानुपपत्तेः। प्राणिहिंसापेक्षत्वेन निषेधस्य प्राप्तमांससमाचरविषयत्वाविशेषाकांक्षणीयत्वेऽप्यस्य। नच हिंसापूर्वकमांस
दाननिषेधोऽयं श्राद्धे मांसं विवर्जयेदिति तस्य प्राप्तमांसत्वविवेकेन हिंसैव निषिध्यत इति वाच्यं। श्रुतमांसपरित्यागेनाश्रुतहिं
सानिषेधे श्रुतहान्यश्रुतकल्पनापत्तेः। नच वचनान्तरे श्राद्धे मांसार्थहिंसायाः कण्ठरवेणैव निषेधः कश्चिद्दृश्यते येन तदेकमूलकस्य
नालापवेन हिंसापरत्वेमेतस्य कल्प्येत। किं वा हिंसानिषेधपरत्वे एतस्य किं सामान्यतो हिंसा निषिध्यते। किं वा श्राद्धीयमांससि
ध्यर्था तदाक्षिप्ता उत छागोत्समेषाश्वालभ्यया इति प्रकरणे विशेषतः कास्तायनुविहिता। नाद्यः। श्राद्धेकत्वाविरोधेऽपि योरानर्थ
क्यापत्तेः। दैवादिहिंसाया अपि निषेधापत्तेश्च। न द्वितीयः। द्रव्यार्जनस्य क्रत्वप्रयुक्तत्वाज्ज्ञाघनीन्यायेनासिद्धोपादानान्मां
सविधेर्निषिद्धहिंसाक्षेपकत्वात्। तर्हि तत्प्राप्तं सा हिंसामात्रवर्जनमिहानूद्यत इति चेन्न। स क्रतुश्चारितेव वर्जयेदि
तिपदक्षतादौ मांसैच विध्यनुवादवैरूप्यापत्तेः। न तृतीयः। प्राकरणिकहिंसायाः फलतो निषेधे मांसपदे न हिंसासामान्यस
तेन च प्रकरणिकहिंसाविशेषस्य लक्षणायां वा तु। परमस्यपरमापूर्वप्रयुक्तत्वे दाक्षिणात्याशब्ददवेलक्षितलक्षणाप्रसंगा
त्। मांसश्राद्धवादिना फलतो छागाद्यालंभस्येष्टत्वाच्च। तस्मात्क्रतुस्पृष्टेऽपरिहारेण फलतो श्राद्धे मांसं वचनान्तरेण निषिध्यते इति १२७

गमे इति युक्तं। न च श्राद्धकल्पितरूपोद्देश्यद्रव्यसमाये शक्लौचाक्यभेदः। परस्परनिरपेक्षे उद्देश्यद्रव्याभावेन निमित्तफलोद्देश्यद्रव्य
वतिजातेष्टिविधानिवयाक्यभेदाभावात्। अमावास्यायामपराह्णे पिंडपितृयज्ञेन चरन्तीति वाक्यस्य वषिनश्राद्धोद्देशेन मां
सनिषेधाच्छ्राद्धीयमांसस्य फलतो निषेधावगतदभावः। नचैवं विशिष्टोद्देशकलत एव वाक्यभेदः। पागादिमांसनिषेधापत्तेरे
तादृशोद्देश्यापर्यवसानात्। भ्यामहे। हविषा विशेषणमिति न्यायेनोद्देश्यस्वरूपांतर्गतत्वेनोपयत्तवदुद्देश्य। विशेषणत्व
भावादुपपत्तेरितिपरिशातिनत्वात्। अन्यायस्तु धानामवेषवियाररसोऽहद पंगमः। इह च दानादन क्रियानुपादाने पिश्राद्धे
मांसं विवर्जयेदित्येतावन्मात्रेणापादानाद्धामादने हि अपि निषिध्येतेन श्राद्धकर्तृकं दानं श्राद्धपात्रकर्तृकं भक्षणं निषिध्यते।
तेन परकर्तृशास्त्रार्थानामनुष्ठाना मांसं दद्यादितिदानि युक्तो मायात् ब्राह्मणचारिवत्। वियुक्ततु यथान्यायं यो मांसं नात्तिमा
नवः। स प्रेत्य पशुतां याति संभवानेकविंशतिमिति मन्वादिभिर्नियुक्तमांसभक्षणस्यावश्यकर्तव्यत्वापत्तेर्वेनकर्तृत्वेन नि
षेधात्। आद्यादिकरणकमांसत्वेन श्रौती कारणायुदासादनान्नक्रियाद्वयनिषेधेऽपि न वाक्यभेदः। षष्ठ्यादिश्रुतेस्तन्निषेधे
भोजनादनिषेधवदिदं सलंबलक्ष्योदेन ब्रह्मचारिदाविशेष्यापत्ते फलतो श्राद्धे मांसं निषिद्धं। तथाहि। पुराणधर्माः परिया

स्मावर्णैरेतैर्यथोचितंव्यामाध्यारात्तथान्यास्थास्त्यलिम्मागरविरोधिनः।कर्मणामनसावाचाप्रयत्नाद्धर्मंसमाचरेत्।अ
स्वर्ग्यंलोकविद्विष्टंधर्म्यमप्याचरेन्नतु।इतियुगधर्मग्रायत्तांकौलविद्विष्टस्यचास्वर्ग्यस्यहेतुकामत्वाचरणीयतामुक्त्वाक
लियुगवर्ज्यान्याह।समुद्रयातुःस्वीकारःकमंडलुविधारणं।द्विजानामसवर्णासुकन्यासूपगमस्तथा।देवराच्चसुतोत्पत्तिर्मधु
पर्केपशोर्वधः।मांसदानंतथाश्राद्धेवानप्रस्थाश्रमस्तथा।दत्ताक्षतायाःकन्यायाःपुनर्दानंपरस्यच।दीर्घकालंब्रह्मचर्यंन
रमेधाश्वमेधकौ।महाप्रस्थानगमनंगोमेधश्चतथामखः।इमान्धर्मान्कलियुगेवर्ज्यानाहुर्मनीषिणः।देशाचाराःप
रित्याज्यास्तद्देशवासिभिः।अन्यथापतितोज्ञेयःसर्वधर्मबहिष्कृतइति।अत्रमांसादनमितिपाठेनियुक्तस्यभोजनेनिषि
द्धकर्तुरपिमांसदाननिषेधःसिध्यति।ब्रह्मचारियात्रेकरवश्राद्धेब्राह्मणःकाममश्नीयाच्छ्राद्धेव्रतमपीडयन्निति।ब्र
ह्मचारिणोमधुमांसनिषेधेकर्तुः।नचग्रहणप्रतिप्रसवादित्यापः।तन्त्रोद्दामविधेरन्यथानुपपत्तेः।इदंचश्राद्धविधेर्मांसा
पदानेप्यन्नादिदानेनोपपत्तेः।इहापिचपूर्वोक्तसकलशंकाकलंकापसारणंसुधियांनातिश्रमावहमिति।तथाहेमाद्रि
माधवाचार्यमदनरत्नपृथ्वीचन्द्रोदयस्मृतिरत्नावलीस्मृतिचन्द्रिकादीपिकाविवरणादिनेकानेकग्रन्थेषुधर्मतत्त्वसमयमूल

ककलिवर्ज्यगणनेश्राद्धेपशूपाकरणनिषेधान्मांसनिषेधः।घेरातिथिपितृभ्यश्चपशूपाकरणक्रियेतिनचश्राद्धेपशुयागाभावे
नपशुयागधर्मानतिदेशादुपाकरणाप्राप्तेर्यत्राश्वधपशुंकस्मैउत्तरतोऽग्नेः।शामित्रमपायतनंकृत्वापाययित्वापशुंप्राग्व्यपुरस्ता
त्प्रत्यङ्मुखमवस्थाप्याग्निंदूतमितिद्वाभ्यांसपलाशशाखयापश्चादुपस्पृशेदमुष्मैत्वाजुष्टमुपाकरोमीतिदारादनेव
इदंपशूलेनचरंतीत्यंतआश्वलायनायुक्तःपशुकल्पप्रवर्ततेरकादौतत्रैवोपाकरणनिषेधोनसर्वश्राद्धेष्वितिवाच्यं।पशुक
ल्पेमपशुसंतस्यप्रोक्षणोपाकरणवर्जं।मित्याश्वलायनेनाष्टकासुपाकरणवर्जनानन्दिष्यत्वासंभवात्।पशुकल्पेचोपाक
रणविधानंमधुपर्केयदोकुरुतेतिप्रैषस्यदार्थवत्।तत्रहिऋत्विजांबर्हिःस्पत्यस्यालक्षण्येद्राग्न्याःआचार्यादीनामाग्नेयःप्रि
यस्यमैत्रोवस्यप्राजापत्योतिथेराग्नावैश्वानरइत्येवंयागविधिः।काम्यपशुषुवार्थवत्।शूलगववत्पश्चर्यंतुनप्रोक्षणादिस
मानपुष्पुनेतिनअनियतेप्रोक्षदिग्रहणस्यप्रोक्तवनंत्रनिस्सर्थत्वात्।प्रपंचितंचैतदाश्वलायनगृह्यवृत्तौनारायणेन।त
स्मादष्टकासुउपाकरणाप्राप्तौनिषेधासंभवादत्रश्राद्धेउपाकरणप्राप्त्यभावेननिषेधायोगादुपाकरणोपलक्षितप
शुशब्दोपस्थापितलसकलिकर्मांसदानमेवकलौनिविध्यते।तथाचश्राद्धेमांसमिश्रने।नैकमूलत्वान्नकल्पनागौर

१२९ वं मूलांतरकल्पनयाऽन्योपाकरणेन लक्षिता संज्ञपनरूपा हिंसैव पितृभ्यो निषिध्यतां संस्कारत्वेन साम्यतदुपस्थितेर्न्नतु
दानमिति वाच्यं साक्षात्संबंधित्वात् तथा प्रधानोपस्थितेः गुणानां च परार्थत्वादसंबंधः समत्वात्स्यादिति न्यायेन संस्काराणां
परस्परासंबंधात्संस्कारानुपस्थापकत्वात् प्रयोगविधिकृतप्रधानसंबंधद्वारकत्वाच्च परस्परसंबंधस्य विनियोगवि
धिकृतप्रधानसंबंधात्सार्थिकत्वात् अत एव पौर्वापर्यात्मकः क्रमः प्रयोगांगं प्रयोगविध्युत्तरकाले च प्रवर्तत इति सि
द्धांतरहस्यं प्रोक्षणादिनाव्यवधानाच्चैनोपाकरणेन संज्ञपनोपस्थितिरानंतर्यनिमित्तापातिश्चातो पाकरणलक्षितं पितृ
भ्यो दानमेव निषिध्यते येषां तु शांखायनानां पारस्करगृह्यानुसारिणां यच्छूलगवप्रकृतिकत्वात्सर्वस्मार्तपशुयागानां
मुष्टकाय शावपितृभ्यस्त्वा जुष्टमुपाकरोमीति लिंगेन स्पष्टो पाकरणं तेषामप्युपाकरणद्वारा पशुदानमेव निषिद्धं अन्यथा
चरातिथिभ्यां दाननिषेधः पितृभ्यस्तूपाकरणमात्रनिषेध इति वैरूप्यापत्तेः न च ताभ्यामप्युपाकरणस्यैव निषेध इति
वाच्यं तयोर्देवतात्वेन ताभ्यामुपाकरणायोगात् देवतायै हि पशूपाकरणं देवतामादिशेदमुष्मै त्वा जुष्टमुपाकरोमीति
वचनात् यदि तु कश्चिदस्मिन्मतौ वाचनिकं श्राद्धे उपाकरणं स्यात् तथापि तद्द्वारा पशोः प्रधानसंबंध एव निवर्त्यते न तूप १२९

करणमात्रं उक्तदोषे वैरूप्यापत्तेः वरातिथिपितृभ्य इति च तु श्रुतिवैरूप्यं वापद्यते वरातिथिविषये पारंपरिकबुद्धिमा
त्रकृतत्वादर्थ्यपर्यवसानासिद्धविषये च साक्षान्मंत्रशब्दोक्तदेवतात्वपर्यवसानादिदिक् वृहत्साराशरे पि शौचं च पात्र
शुद्धिश्च श्राद्धाच्च परमापदि अनंतरस्ति कृच्छ्राद्दद एतत्र वस्तुने चामिषं एतत्स्तु वैश्विमन्मादि यत्तु प्राणिवधं कृत्वा मां
सेन तर्पयेत्सितृन् सो विद्वांश्चंदनं दग्ध्वा कुर्यादंगारविक्रयं क्षिप्त्वा कूपे यथा किंचिद्बालः प्राप्तुं तदिच्छति पतत्यज्ञानतः
सोपि मांसेन श्राद्धकृत शैलिश्राद्धे मांसनिषेधः न चात्र मध्यपचने प्राणिवधनिर्दधवे धस्यैव श्राद्धार्थतया निषेधो
न तु मांसस्येति वाच्यं पूर्वोक्तप्रकारेण हिंसाप्रसक्तेस्तन्निषिध्यायोगात् न चामिषमिसुपक्रमान्मांसेन श्राद्धकरणे
तिसुपसंहाराच्चैकवाक्यतावगमेन मध्यश्रुतप्राणिवधनिंदयामांसदाननिंदायामेव तात्पर्यात् विष्णुरूपांशुषष्ठर
सारे विधिसरूपस्याप्युपांशुयाजमंतरा यजतीत्यत्रेव पुरोऽजातिरुत्सुपक्रमे यस्मिन् जातरुत्सुपसंहारे च जननश्रवणा
देकवाक्यतावगमे यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन मातीसो देर्मध्यस्थस्य स्तावकत्ववदिहापि मां
सदाने हिंसापतिरूपनिंदाद्वारा तदन्यापत्यामांसदानस्तुतौ वा तात्पर्याच्च तदुक्तं भट्टपादैः एकोपक्रमसंहारैकं

१३० दं प्रपतत इति · नहि निंदा निंद्यं निंदितुं प्रवर्त्तते अपितु विधेयं स्तोतुमिति भाष्यकारः । न चास्मिन्मांसग्रहणे हिंसा नापतति
हिंसा चैवानुमंता च विशस्ता क्रयविक्रयी · संस्कर्त्ता चोपहर्त्ता च खादकश्चाष्ट घातकाः इत्यष्टविधघातकान्यतरहननप्रस
क्तेरावश्यकत्वात् · अयं च मांसनिषेधो विशेषश्रुतोपि कलिविषय एव · कलौ पाराशरस्मृतिरिति पराशरस्मृतेः कलि
विषयत्वस्मरणात् · अन्यथा मांसविधानानां निर्विषयताविरहितप्रतिपिंडदानादिविफल्यं प्रसज्येत · न च व्यवस्थासंभवे व्यव
स्थापुरुषाः अत एव पृथ्वीचंद्रोदये निबंधेप्येव पाराशरे मांसनिषेधः कलियुगविषय इत्युक्तं । बृहत्पराशर एव सर्वथात्र
यदान्नस्यात्तदैवामिषमाश्रयेत् · ब्राह्मणश्च स्वयं चाप्यात्तश्वश्वादिहतं पदीत्स्वन्नशब्दवाच्यस्यादानापस्य सर्वथाभावे
मांसं सविदधानो मांसस्य श्राद्धे प्रशस्ततां दर्शयति · मुन्यन्नैः स्यात्सरामीतिर्यथा न पशुहिंसया · नैतादृशः परो धर्मो नृणां
सद्धर्ममिच्छतां · व्यासोदं उस्य भूतेषु मनोवाक्कायजस्य यः । तथा न पशुहिंसयेति तथा शब्दो व्याहार्य · दंडस्याप्यासहिंसाया
स्त्यागो य एतादृशोन्यः परो धर्मो नास्तीत्यर्थः । अत्र श्राद्धे आमिषतदभावान्नपायसादिनिंदानुभोक्तृश्चदानादननिषेधा
द्दानविधयः आमंत्रितस्तु यः श्राद्धे दैवे मांसं समुत्सृजेत् · यावंति पशुरोमाणि तावन्निरयमृच्छति इति निंदापूर्वकादन १३०

विधयश्च सर्वथा बाधप्रसंगात्कलियुगातिरिक्तविषया इति स्वचितं · अन्यश्च सर्वो न्यायोपस्कारोत्राप्यनु
संधेयः । ननु मांसदानविधीनां निगमादिगततन्निषेधानां च देशभेदतो व्यवस्थास्तु-मैवं · ननावल्क्लाविमजद्देश
भेदोपादानमस्ति · न च कस्यचित्तदभावे · अतः समग्यवस्थयैव विरोधपरिहारादधिकस्य कल्पनाष्टदोषपरिहाराच्च तदपेक्ष्य
वस्थांतराकांक्षणादन्ना । कांक्षितविध्यपत्तेः । कल्पनायां वा श्रुतार्थापत्तिस्वादेकवाक्यतापन्नदेशभेदपरपदकल्पने
श्राद्धमांसदानानुवादेन युगदेशभेदयोर्वर्जने वाक्यभेदः स हृदयाभिंस्यात् · आस्तांगोपश्चादौ चैकवाक्यतापात्तेदे
शभेदव्यवस्थयैव वर्जनमापद्येतेति विष्णुवापतिग बृहन्नारदीयादौ चस्कलककलिवर्जितानां देशविशेषेष्वेव निषे
धः स्यादिति तदन्ये बहवो देशाः सकलकलिवर्जितानुष्ठानापत्त्या सुतरां विप्लाविताः स्युः । यावत्सु च देशेषु श्राद्धे पिशित
वर्जनं दृश्यते तावद्देशसंग्राहकैकपदाभावादनेकपदकल्पनापत्त्या मनेकवाक्यभेदाः प्रदुःस्युः । देशव्यवस्थाएकैकानेका
नेकपदकल्पनापोचनदेशविशेषाचारदर्शनं मूलमिति रेनता श्रयापत्तेः । न च मूलांतरमस्तीति मांसदानांमांसरसलोलु
पत्नैव मूलमापद्येति सर्वनिषेधेषु स्यारूच्चितः संकोचकएवालिकस्येरन्निति पिद्धानुष्ठानादृतेः । देशविशेषाचारमूलकस्य

१३१ वस्थापकपदकल्पनाहोकाधिकरणविरुद्धाच· तावद्देशगतजातिगुणक्रियासंस्थानादिविषयपरविशेषणासंभवस्य
तन्त्रायस्येहापिसत्वात्· तस्मादाचारतो व्यवस्था कल्प्येता· सामान्यमांसदानविधिदर्शनप्रवृत्तनियोज्यलाभाच्चेनन्तदर्श
नपिवे धांतरइव विश्वजिदादिवन्नियोज्यपरपदकल्पनयाव्यवस्थामुक्तिसहेति· किंच· देशविशेषेष्वाचारतएव श्राद्धेमां
सदानादनयोर्लिदत्तेरुद्रप्रसक्तेस्तद्विषयकोनिषेधः कार्यः नवाचारमूलमेतन्निषेधा॥ देशविशेषविषयाणांयुगवि
शेषयाणांच युगाविशेषविषयात्व प्रमाणशून्यदेशविशेषविषयामारंप्रसस्मानविषयादर्शपूर्णमासप्रकरणस्थान
तनिषेधस्येवसमर्लान्तनिषेधंप्रतिमूलत्वासंभवात्· एतेषामप्याचारताविशेषविषयत्वान्मूलत्वेप्रागुक्तएवैतरेतरा
श्रयइतिनन्नुबृहन्नारदीयेएतच्छ्राद्धप्रकरणेयथाचर्सप्रदेयं तुमधुमांसादिकंतथैत्याचारतो व्यवस्थावचनेनैवक्लृप्त
तथामांसदानंतथाश्राद्धे इतिकलिवर्ज्येष्वभिधायदेशाचाराःपरिग्राह्यास्तत्तद्देशीयैर्नरैः॥ अन्यथापतितो ज्ञेयः
सर्वधर्मबहिष्कृतइत्यनेनतत्रैवाभिहितं· देवलोप्याह· अयस्मिन्देशेयआचारोव्यवहारःकुलस्थितिः॥ सतस्मिन्नेवकर्तव्यो
देशाचारःस्मृतोबुधैः॥ मनुरप्याह· यस्मिन्देशेपुरेग्रामेत्रैविद्येनगरेपिवा· योयत्रविहितोधर्मस्तंधर्मंनविचारयेत्· स १३१

दभिराचरितं यस्त्यात्कार्मिकैः सुद्विजातिभिः॥ तंदेशकुलजातीनामविरुद्धं प्रकल्पयेत्· आपस्तंबोप्याह· येषां
परंपराप्राप्ताः पूर्वजैरप्यनुष्ठिताः॥ तएवतैर्नदुष्येयुराचारैर्नेतरेपुनरिति· अतः कलिनिषेधानामाचारतो व्यवस्थे
ति· इदमतिदुष्टं· यथाचारमितिवचनेहिप्रकरणोपस्थितश्राद्धेनिषिद्धमधुमांसादिदानमनूद्ययथोपचारमितिप
दोपस्थापिताव्यवस्थाविधीयते· यच्चनव्यक्त्येतरासंभवात्· विशिष्टविधौगौरवापत्तेर्विशेषस्यानेकस्मिन्निप्राप्ते
विध्ययोगाच्चेति· वाजपेयेयजुर्युक्तरथमध्वर्यवेददाति· तच्चसप्तसप्तदशकानिददातिसप्तदशरथाः सप्तदशदास्य
इत्यादिवचनप्राप्तयजुर्युक्तरथदानानुवादेनाध्वर्यवेपदोपस्थापितव्यवस्थावत्· कलौचमध्वादिदानेनिषिद्धमितिपत्र
पुत्रांतरेणहीनमनिषिद्धंप्राप्तंतद्विषयैवव्यवस्थानभवति· नमस्तवद्दासस्यासंवदेतेतिनिषेधस्यापुसत्त्वेहन्नास्यादि
नापरेधविधानादजस्वलासंवादप्रसक्तेः॥ प्रकरणादुत्कृष्यापिदृष्टार्थतामंमौक्तसत्यत्तुरोधेनक्रतुपदेक्षन
संयादविषयत्ववत्· किंच· यथाचारतोमांसदानमारंभे अनेनवचनेनव्यवस्थाप्येतेतर्हिनेनैवयथावदभिमतव्यव
स्थासिद्धेर्बृहन्नारदीयएवकलौमांसदाननिषेधोव्यर्थः॥ आचारव्यवस्थापिनप्रकारणेकरानाम्नांश्राद्धदर्शितुत्वात्

१३२ द्वेः। अत्र सत्यपि तु प्रकरणबहिर्भावान्निषेधस्य क्रत्वर्थत्वेन पुरुषार्थत्वाल्लोके आह्वमोऽसदा ते सर्वः प्रयचेतो लिकु स्वया-
न्निषेधः। प्रकरणाद्धि पुरुषार्थस्यापि निषेधः क्रत्वर्थो भवति। तदा कुर्भं दृ पादाः स्यपारामास भक्षादि पुरुषार्थमपि प्रि
तः। प्रतिषेधः क्रतोरंगमिष्टः प्रकरणाश्रयादिति। न तु क्रत्वर्थस्याप्रकरणे निषेधः। क्रत्वर्थः। सुराग्निलो चहवर्णो लेखादि
निषेधवत्। किंच। निषेधव्यवस्थापकलापं यथाचारवचनस्य यथाचारं न देयमित्यवस्थित्। यचदाने यथे वस्थापि तेदानमप्य
र्थतो व्यवस्थाप्यत इति वाच्यं। श्रुतानुदितदानव्यवस्थायावचस्युपपत्तेः। श्रुतानुदितव्यवस्थापा अन्याय्यत्वात्। न च विहितप्र
तिषिद्धाष्टदोषविकल्पपरिजिहीर्षया श्रुतावबाधस्यैवोचितेन विकल्पाप्रसक्तेः। नन्वेवं नलोपपशौ कराला स्वनेनाप्या
ज्यभागास्य विशेषविषयेणाज्यभागविधयचोदक बाधास्सशा वाज्यभागविकल्पो न स्यात्। अथ प्राय फलेन वोदकमुपजी
वन्नभ्यनुज्ञानेनाज्यभागनिषेधो विशेषविषयोऽपि विकल्पप्रसक्त्याज्यभागौ पशौ चेत्। न हि दीक्षितो न जुहोतीत्यस्य यमपि प्रा
करणिकहोमनिषेधायोगाद् अग्निहोत्रादिहोमविधिमुपजीव्यत्वादत्र ज्ञानमग्निहोत्रादिहोमं विकल्पयेत्। अथार्थविशे
षविषयत्वाद्बाधतराबलत्वाज्यभागनिषेधोऽपि बाधकत्वैव चोदकं न विकल्पयेदाज्यभागौ च क्रव्यौ वा विशेषः। श्रूयताम १३२

च विशेषः। यद्युभावपि विधिप्रतिषेधौ पुरुषार्थौ क्रत्वर्थौ वा स्यातां ततः स्याद्विकल्पः। पुरुषार्थतया तु विहितान्यग्निहोत्रा
दीनि क्रतुमध्येऽपि प्राप्तानि प्रतिषिध्यन्ते। क्रत्वर्थतस्युपगमादिवत्। अत एव कार्थ्याभावाद्विकल्पाप्रसक्तेः। क्रतुमध्ये वियत
मग्निहोत्रादिवर्जनीयं। आज्यभागविधिप्रतिषेधयोस्तु एकपश्वर्थत्वाद्विकल्पः। एकातिराचार्थषोडशिग्रहणवत् प्रस्तुते। न
क्रतोर्याविकल्पाप्रसक्तेर्नतान्निवृत्तये श्रुताश्रुतयोर्व्यवस्थापनमिति वरूप इति मध्यस्थीना। अन्ये तु यथास्थितसूत्रभाष्या
नुसारेण दीक्षितो न जुहोतीत्यत्र पर्युदास एव दीक्षितान्यो होमादि कुर्यादिति। जुहोत्यनुवादोपस्थापितेन दूरस्थेनापि तद्विधिनैक
वाक्यत्वात्। अन्यथार्थिकसमानविषयत्वेन विकल्पापत्तेः। पुरुषार्थक्रत्वर्थहिंसाविधिनिषेधयोः क्रत्वर्थपुरुषार्थत्वम
सगोदोहनविध्योर्वा बाध्यबाधकभाववत्। तत्रापि समानविषयत्वापेक्षणात्। तथा प्रस्तुतेऽपि कल्पितव्यतिरिक्तैर्मांसं दधाति
ति दूरस्थेनाप्यनुवादवलोपस्थितेनैकवाक्यतया पर्युदासत्वं। निषेधत्वे ह्यनतोपशाविति वद्विकल्पः स्यात्। अ[illegible]क्र
त्वर्थाग्निहोत्रहवणीदेहादिनिषेधश्चेत्तदा प्रकरणाभावेऽपि निषेध्यक्रत्वर्थत्वाल्लिङ्गेन निषेधस्यापि क्रत्वर्थता स्यात्। अन्यथा
निषेध्यक्रियाकैमर्थ्य[illegible]ताव्यर्थाः स्यात्। तथा च निषेधे क्रत्वर्थपश्वादाज्यभागवद्विकल्पापत्तिः। पुरुषार्थे तु क्रतुवैगु

१३३ व्याप्तिः। पुमर्थेन निषेधेन क्रत्वर्थविध्यबाधात् विपर्ययात्। अत एवं ज्ञापकेषु पर्युदासत्वमेव। आशौचे श्राद्धे वैश्वदे
वादिपुरुषार्थनिषिधेविधिनिषेधयोः पुरुषार्थत्वाद्धि कल्पः स्यान्निषेधपक्षे। तस्य आपि पर्युदासत्व एवोक्तमार्गेण। कृतविवाह
देः संक्रान्तिमन्वाद्यादिषु पिंडादिवर्जने पि एवमेव पर्युदासत्वा। अत एव संक्रान्तौ समावास्यादिश्राद्धसन्निपाते तन्त्रेण श्राद्धसि
द्धिरुक्ता न्यायविद्वद्भिर्हेमाद्रिप्रभृतिभिः। अन्यथा हि विरुद्धोगकत्वान्न तन्त्रतासंभवः। न चोपशान्तियत्र तु वचनव्यक्त्यसंभवा
त्पर्युदासासंभवेनागत्या निषेधोविकल्पश्चेति दुष्टांकाश्च्यमवतां सुबोधं। तदत्यमति दूरं गत्वा पर्युदासत्वे कल्पे श्राद्धे मांसवर्ज
नस्य न विकल्पापत्तिर्नतरां तद्व्याख्यातश्रुत व्यवस्थापनं यथा वारन्वनेन नेति निषेधत्वे पर्युदासत्वे वानियतकल्पे श्राद्धे मांसव
र्जनं सिद्धं। आग्नेयविधिदत्तादेवाद्धितायेमांसप्रापकविधेः बलावप्रवृत्तेर्बाधकाभावेनाप्रविधयानान्यतरापत्तेनि
षेधप्रवृत्तेः। अत्र बहुवक्तव्यमपि अतिविस्तरापत्ते र्नवरामः। यत्तु देशाचाराः परिग्राह्या इति बृहन्नारदीयवचनं यद्देव
लस्य यस्मिन् देशे य आचार इति। यच्च भर्गोर्यस्मिन् देशे पुरुषेनामेइति तत् श्रुतिस्मृत्यविरुद्धतत्तद्देशाद्याचाराणां व्यवस्थाया
ग्राह्यत्वावरत्तेन द्विरुद्धश्राद्धमांसदानाचारांगोचरयेतीति व्यर्थत्वादुपन्यासः। अत एव यस्मिन् देशे य आचारः पारंपर्यक्रमा १३३

गतः। श्रुतिस्मृत्यविरुद्धश्च स सदाचार उच्यत इति श्रुत्याद्यविरुद्धस्यैव सदाचारत्वमुच्यते गौतमोपि। आचारश्चैवसा
धूनां देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः प्रमाणमिति श्रुतिस्मृत्याद्याम्नायाविरुद्धाचाराणामेव प्रामाण्यमाह।
स्मृतिरपि चाम्नायशब्देनोच्यते। आम्नायः स्मृतिधारक इति शंखलिखितवचने प्रयोगादिति भट्टवार्तिकादवगंतव्यं।
न तच्चस्य स्माद्यविरुद्धाचारविषयत्वाद्देवलादिवचनानां प्रकृते तद्विरोधस्य दर्शितत्वादुपन्यासो व्यर्थः। यत्तापस्तं
बवचनं। येषां परंपराप्राप्ताः पूर्वजैरप्यनुष्ठिताः। त एव तैर्न दुष्येयुराचारैर्नेतरैः पुनरिति तदपि नैवं विधाचाराणां नि
र्दुष्टत्वपरं। पंचधा विप्रतिपत्तिर्दक्षिणत इत्यादिना बौधायनेन स्मृतिविरुद्धदेशाचारानुपन्यस्येतरत्र तस्मिन् कुर्वंनु
यायितेतरस्मिन्देशे मातुलसुतादिति देशाचारस्य प्रामाण्यमापस्तंबमतेनोपन्यस्य निषेधेत दिति गौतमउभययैतेऽ
न्यादियतेशिष्टस्मृतिविरोधादिति निराकरणात्। आपस्तंबवचस्तु तद्देशीयानां गर्हामात्रनिराकरणमात्रपरं न तु
प्रत्यवायाभावपरं कामकृतमहापातककर्मप्रायश्चित्तवचनवत्। अत एव न्यायसुधा। आपस्तंबस्यापि मन्वादिवद्धर्म
शास्त्रप्रवक्तृतया याप्तत्वखलानासरणात्र द्वचनस्मृतिध्याख्यायोगोपि गर्हानिराकरणमात्रपरतयान व्याख्येयमिति। आ

१३४ चार्यास्तु मामालंबवचनस्मृतिविरुद्धाचरणश्रुतिमूलकबहुस्मृतिविरोधात्स्पष्टकामादिहेत्वंतरदर्शनाच्चेत्याहुः। प
दा। यत्र प्रत्यक्षवैदिकलिंगदर्शनेन स्मृतिबाधो भट्टपादैरुक्तस्तद्विषयमापस्तंबवचः। देशविशेषविषयत्वेन लिंगमूलका
नुत्तानोपपत्तौ सर्वथा स्मृतिबाधित्वात् सर्वेषां प्रत्यवायाभावकल्पनानौचित्यात्। तस्मान्न श्राद्धे मांसदानविधानां तद्वर्ज
नवचनानां च देशभेदाद्व्यवस्थितविषयत्वं युक्तमिति सिद्धं। मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः। मधु प्रधानं शू
द्रस्य सर्वेषां चाविरोधि यदितिवचनेनोक्तव्यवस्था पाक्षात्रियवैश्ययोरेव मांसदानात्तावयं सर्वोपि कलौ तन्निषेधपरत्वाद्विषयए
व। ब्राह्मणस्य पाकाभावे यज्ञनायोग्यात्। यदा तु प्रधानशब्दस्य सर्वत्रानुषंगेण प्राधान्यमात्रमशोक्तं न तु व्यवस्था तदास
र्ववर्णविषयो निषेधः इत्यलं। किंच यदि कलौ मांसदाननिराकरणं मांगीक्रियते तर्हि पूर्वोक्तव्यासवचनेन छागवन्मेषा आलब्ध
व्या इति कस्मात् न वचनेन च गोमांसदानं कलौ यदि प्राप्तं कथं निवारयितुं शक्येत स्पष्टमांसरसलोलुपरसनैः सह विचार
रसनेति। भट्टरामेश्वरसुतो भट्टनारायणः सुधीः। न्यायान्मतसुसूक्तेनावीवधन्मानसं तत्कृतम्। इति नारायणभट्टकृतौ कि
लम्श्राद्धे मांसदानादानविचारः विवाहनिषेधप्रयोजकत्वं मातिदेशिकस्यापिंडत्वस्येति निषेधमाचमुपस्थितं तत्र ब्राह्म १३४

णस्य मांसभक्षणनिषेधः। तत्र मनुः यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवं। तद्ब्राह्मणेन नात्तव्यं देवाना
मश्नता हविः। ननु देवपितॄन्समभ्यर्च्य खादन्मांसं न दोषभागिति याज्ञवल्क्योक्तेर्देवपित्रर्थव्यतिरिक्तस्य दोषभा
क्त्वात्वेन गमनेन निषेधः। मैवं। नस्य यद्देवपित्रर्थस्य प्रतिप्रसवः। निषेधस्य त्वे हि दोषप्रसक्तौ प्रतिप्रसवो युज्ये
त नतु मांसभक्षणे सामान्यतो निषेधोस्ति यस्यायं प्रतिप्रसवः स्यात्। न च मनुनिषिद्धस्यैव प्रतिप्रसवः। तथा सति निषेध
स्य ब्राह्मणमात्रविषयत्वात् प्रतिप्रसवोपि ब्राह्मणमात्रविषयः स्यात्। ततश्च क्षत्रियादेर्देवपित्रर्थव्यतिरिक्तभक्ष
णे दोषो न स्यात्। न चायं मत्स्यो भक्ष्यकामतो जग्ध्वा सोपवासस्त्र्यहं वसेदिति निषिद्धस्य प्रतिप्रसवः। तत्र भासतिम
त्स्यमांसमात्रविषयत्वाद्देवपित्रर्थव्यतिरिक्तानिषिद्धजाति मांसभक्षणे दोषो न स्यात्। तस्मात्प्रतिप्रसवासंभवा
त् याज्ञवल्क्यं देवपित्रर्थव्यतिरिक्तमांसभक्षणनिषेधकमेव। यद्यपि वा किंचित्सामान्यतो मांसभक्षणनिषे
धकं याज्ञवल्क्यवाक्यं प्रतिप्रसवः स्यात्तथापि देवपित्रर्थमांसभक्षणमापतितं प्रवेतिव्यतिरिक्तस्य निषेधेन
विप्रतिपत्तिः। एवं सति तादृशमांसस्यैव भक्षणं ब्राह्मणस्य मनुवाक्ये प्रतिषिध्यते सामान्यतश्च निषिद्धस्य ब्राह्म

१३६ णे पुनर्विशेषतो निषेधो दोषातिशयार्थः स्यात् । यथा नंदासु नाभ्यंगो मुख्यार्थं च रेवत्यां क्षौरं च रिक्तासु अप्यासु मांसं च र
र्णासु योषित्परिवर्जनीया भद्रासु सर्वाणि समारभेतेति वामनपुराणे स्कांदनाम्नान्यतो नंदादिषु अभ्यंगनिषेधे सत्यपि तु सर्व
स्य नंदादि विशेषेषु षष्ठ्यादिषु पुनर्निषेधः षष्ठ्यष्टम्योः समावास्यायां पक्षद्वये चतुर्दश्यां ॥ अत्र संनिहितं पापं तैले मांसे भ
गे क्षुरे इति स विशेषेषु मेव निमित्तं शानि विरुद्धविषयत्वे भादगस्त्यादौ च विशेषः कस्य तथेह श्राद्ध छागमभ्यादादि विषेषु न
सिद्धं तथा । याज्ञवल्क्यवाक्येन हि देवपित्र्यर्थव्यतिरिक्तमांसनिषेधे सति देवपित्र्यर्थव्यतिरिक्तनिषिद्धस्य मनुवाक्येन निषे
धो ब्राह्मणं प्रतिसंभवत्येवेति देवपित्र्यर्थव्यतिरिक्तनिषिद्धमांसभक्षणविषयत्वमेवांगीकृत्य दोषविशेषार्थतामनुवाक्य
स्य न पुनः कृत्स्नमिति निषेधोऽयं च निषिद्धविषयत्वे व्याख्या याज्ञवल्क्यपूर्वापरविरोधो वैयर्थ्य बीजं च चिंत्यं ननु ब्राह्मणस्य देवपित्र
र्थव्यतिरिक्तं चेति द्विविधस्यापि मांसस्य भक्षणे सर्वथा प्रतिषिद्धे सत्यप्रसक्तत्वादेव मांसवर्जनसंकल्पविधिर्ब्राह्म
णं प्रति याज्ञवल्क्योक्तो नुपपन्नः । गृहेपि निवसन्विप्रो मुनिर्मांसविवर्जनादिति चेत् एवं । न शास्त्रेनापि वेदोपनरवादे
कृत्स्नसूकरौ । एकादश्यां न भुंजीत पक्षयोरुभयोरपीति देवलस्मात् षष्ठिघटिकायामेकादश्यां शुद्धायां भोजननिषेधा १३६

द्वा प्रसक्ते भोजने उपवासविधिर्भोजनाभावसंकल्परूपो यथा कृत्स्नाय विधीयते । स्कांदे । यदीच्छेद्विपुलान्भोगान्भुक्तिं चासंत
दुर्लभां । एकादश्यामुपवसेत् पक्षयोरुभयोरपीति । तद्वदत्रापि भविष्यति । यत्तु मनुवाक्यं । असंस्कृतान्पशून्मंत्रैर्नाद्याद्विप्रः क
थंचन । मंत्रैस्तु संस्कृतानद्याच्छाश्वतं विधिमास्थित इति । तद्व्याख्यातं धातिथिना पशुबंधे प्रोक्षणादयो मंत्रवंतः संस्कारास्ते
षां क्रियंते पशूनां वैदिकयागयोग्यानां तेषां मांसमद्यात् । सोमयज्ञादौ च सत्यपि सामवपाचरिकयागशेषत्वे मंत्रसंस्कारा
भावादभक्ष्यता शाश्वतं नित्यं वैदिकमित्यर्थ इति । इदं च ब्राह्मणयजमानविषयं । यज्ञशेषरक्ष इत्यनेन निषिद्धस्य प्रतिप्रसवः ।
न त्वृत्विग्विषयं ब्राह्मणानामेवार्त्विज्यस्य मीमांसायां सन्न्यायेन साधितत्वात् तत्कर्तृकशेषभक्षविधिरेवर्त्विकाशीर्षत्रस
इत्येतस्य निषिद्धस्य कृत्स्निषु व्याप्तिसिद्धेः भ्य याज्ञ्यामिलाञ्चशब्दभेदादिस्यपि करणे अतएवार्त्विज्यं निंदितानि वार्त्विकादयं न्या
ये निमतन्यायाणां लक्ष्यते । स्यापि कारिकएव विधिः स्यापि कारिकं निषेधं बाधते इति । शेषभक्षविधिश्च नर्त्विगधिकारिक
इति यजमानस्य निषेधं न बाधते । अतश्च यजमानस्यैवर्त्विज्यामपि मंत्रैस्तु संस्कृतानद्यादित्यनेनैव विधिना यज्ञशेषरक्ष इति निषेध
बाध इति । न तु निपुरुषस्तु यथान्याय्यं मांसं नाश्नाति मानवः । स प्रेत्य पशुतां याति संभवानेकविंशतिमिति मनुवाक्ये निपुरुषश

१३६ दः श्राद्धीयनिमंत्रणनिमंत्रितवचनः। श्राद्धनिमंत्रणं च ब्राह्मणानामेवोक्तं पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते निमं
त्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितानिति तत्र श्च नियुक्तस्त्विति विधिर्निरवकाशत्वात् पक्षरक्षइत्यस्य निषेधस्य बाधकः
स्यात्। एवं प्राणात्यये तथा श्राद्धे इति याज्ञवल्क्यवाक्येपि प्राणात्ययग्रहणस्य द्विजकाम्याग्रहणस्य देवान् पितॄंश्च समभ्यर्च्येत्य
स्य च क्षत्रियादिविषयत्वेप्युपपत्तेः सामान्यशास्त्रत्वेपि श्राद्धे खादन्नदोषभाक् इति स्यानियुक्तवाक्यस्य च पक्षरक्षइत्येतन्निषेधकत्वं
स्यादिति चेत् उच्यते। यदिदं श्राद्धनियुक्तब्राह्मणानां मांसभक्षणं तत्त्वाति प्रतिरूपं श्राद्धांगं तच्च नियुक्तवाक्यस्यापुरुषार्थ
त्वाद्वैदिकोफलश्रुतिः फलश्रुतिरर्थवादः पर्णमयाधिकरणन्यायेन ततश्च शेषभक्षविधिवदेव नियुक्तविधेरपि नियुक्तपुंका
रिकत्वाभावात् पक्षरक्षइति निषेधबाधकत्वमिति। न चैवं श्राद्धीयान्नभोजनमविधिनैव सामान्यतः प्रवृत्तेन सिद्धेर्विशेषतः
पुनर्मांसभोजनविधिः श्राद्धे ब्राह्मणानां व्यर्थ इति वाच्यं। सादृष्यविशेषार्थत्वात्पुनर्विधेः। सादृष्यविशेषार्थं हि श्राद्धे मां
सदानं। अतस्तादृशफलविशेषार्थं मांसभवश्यं भोक्तव्यमेव ओदनादिस्तु भोज्यस्य नावश्यं भोजनमिति। यद्वा। अक्षतोपश्रु
श्चैव श्राद्धे मांसमिति निगमवाक्येन विशेषतः कलौ श्राद्धे मांसदाननिषेधान्नियुक्तादिवाक्यं युगांतरविषयं भविष्यति। १३६

तस्मादाद्यपक्षे कस्मिन्नपि युगे श्राद्धव्यतिरेकेण ब्राह्मणैर्मांसं न भोक्तव्यमिति सिद्धं द्वितीयपक्षे तु युगांतरे श्राद्ध
व्यतिरेकेण मांसं ब्राह्मणैर्न भोक्तव्यं। यागे तु कुक्लिजायजमानस्य च न दोषो स्यादधिकारिकविधिना स्याधिकारिकनिषेध
स्य बाधे विमं चैस्त्वितस्य नेयथा धातः श्राद्धे तु कलौ ब्राह्मणेन न भोक्तव्यमेव यजमानेन मांसं न देयमेवेति व्यवस्था न
इति श्रीमत्सदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजशंकरकृते ध
र्मद्वैतनिर्णये ब्राह्मणकर्तृकमांसभक्षणनिषेधसंशयोच्छेदपरिच्छेदः॥ मांसभक्षणं ब्राह्मणेन न कार्यमिति निषेधे
निरूपिते अन्यस्मै प्रतिश्रुतं मन्यस्मै न देयमिति निषेधमर्यादा प्रदानिकं निरूप्यते तच्च मेदनापरानिकेन्यथा रक्ष्येया
त वल्क्यः। स्वकुटुंबाविरोधेन देयं दारसुतादृते। नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतमिति। अत्र मिताक्षरायमापृ
पातनिका प्राभदेयमस्यतपालिपि कृत पीकारानाहे मितिश्रंथे नान्यस्मै प्रतिश्रुतं स्यान्यस्मै अदेयता निषेध व स्वादे
वन तस्य त ये समभिधानुपुपच्यक्रम। तदेव च याख्यास्यमांसपुच्छे कारएव ददेय तमाचेण न पुनः स्वत्वाभावाभिप्रायेण
पुत्रदारसर्वस्वप्रतिश्रुतेपुस्व ससद्भावादिति ग्रंथेन। तथैतदग्निमश्लोके प्रतीयते प्रकाशः स्तास्याचरस्वविशे

१३७ षत इति प्रासंगिकमुक्त्वा प्रकृतमनुसरन्नाह देयं प्रतिश्रुतेन तस्मै देयमेवेत्येवकारस्युत्क्रमेण । अत्र धर्मार्थं प्रति
विशेषविषयतया व्याख्याने बीजं स्वयमेवाग्रे दर्शितं । स्वस्यैनार्जनवास्त्वं श्रावितं धर्मकारणात् । अदत्वानुमन्ते
दाप्यस्तत्सुतोऽन्यत्र संशय इति कात्यायनस्मरणादिति ग्रंथेन । अत्रेदं विचार्यते । अन्यस्मै प्रतिश्रुतमन्यस्मै नदेयमि
ति निषेधातिक्रमेण दाने किं दाता प्रत्यवैति सैव प्रतिग्रहीतुः स्वत्वमुत्पद्यत एव उत स्वत्वमेव नोत्पद्यते न तु प्रत्यवैति स्वि
अथ प्रत्यवैत्यपि स्वत्वं च नोत्पद्यत इति । तत्र स्वत्वमुत्पद्यत एवापरस्वत्वापर्यवसानकत्वाद्दानस्य । किंच । दानप्रतिग्रहा
वयं तच्छिन्नानुभयोर्व्यापारी तत्र यथा मेध्यादेः । प्रतिग्रहनिषेधेपि तमतिक्रम्य प्रतिग्रह्णातरि स्वत्वं दानमनिषिद्धत्वादु
वस्यैवं एवमिह दाननिषेधेपि तमतिक्रम्य ददाति प्रतिग्रहस्यानिषिद्धत्वात् प्रतिग्रहीत्वात् तदनुष्ठानास्य स्वत्वोत्पत्तिरविरुद्धा । अ
पि च निषिद्धेनापि मेध्यादिप्रतिग्रहेणेह यथा निषिद्धेनापि दानेन स्वत्वोत्पत्तेरविरोधः । दातानुकूलत्वं प्रत्यवैतीति । निषेधाति
पापीयान् निषिद्धकर्ता मंतरेण तद्विषयनिवर्तनानुपपत्तेः । तत्र त्रियाम्न्विशेषः । इह विशेषतो दानमात्रं निषिध्यते यत्र लोकि
कं दृष्टार्थं मित्रादिभ्यो दानं यच्च दृष्टार्थं येभ्यः पात्रेभ्यो दानं नित्यं नैमित्तिकं काम्यं च दाक्षिणदानवत् । तत्रादृष्टे दाने निषिद्धकर्ता १३७

मात्रं बोध्यते । विधेस्तु दाने निवर्तनाविषयत्वेन विरोधात्तद्वर्जनाविषयत्वबोधे नितापर्यवस्यति निवर्तनाविषयत्वानुपप
त्तिनादवस्थ्यात् । नहि मेति पन्ने वैधेष्टाभावावगमेपि कथंचित्तादात्विकेष्टयोजकतावगत्या रागतः प्रवर्तमानाः शक्या नि
वर्तयितुं । यत्र निषिद्धत्वं न बोध्यते अतस्तदपि बोध्यते । तच्चानेन नरो स्वत्र पापानिष्टसाधनतावगमपूर्वोस्त्यापि प्रतिपत्तेष्टसा
धनताभावावगतिर्भ्रम इति कस्यचन इति वाच्यं । तिस्यवन्निवर्तनाविषयत्वानुपपत्तेः । प्रतिपन्नेष्टसाधनत्वाद्धि कृष्यादिवत्
र्जनापि निषेधसिद्धानिष्टसाधनत्वाच्च कश्चिन्निवर्तताम् अपि तत्र अनित्यवन्निवर्तनाविषयत्वमुपरुध्येतेति । अनिष्टसाधनताव
गति परत्रेष्टसाधनताभावो व्याप्तिव्यन्ते । चैवं दाने तु निषेधेनेति सिद्धं । तस्मादन्यस्मै प्रतिश्रुतमन्यस्मै ददद्दाता प्रत्यवैति केव
लं प्रतिग्रहीतुरस्य स्वत्वमुत्पद्यत एवेत्याद्यः पक्षः । द्वितीयस्तु स्वत्वमेव नोत्पद्यते न तु दाता प्रत्यवैतीति । तत्रोपपत्तिः । न
स्वत्वोत्पत्तिर्दातृस्वार्थं तर्गता येन दानानुष्ठानादेवेतरस्य स्वत्वोत्पत्तिः स्यात् । किंतु स्वत्वसंपादनं द्रव्यस्यागवदुद्देश्यताल
कं स्वत्वोत्पत्त्यनुकूलप्रयोजकव्यापारात्मकं दानं शरीरघटकं स्वत्वोत्पत्तिरुत्तरकालीभूता पृथगेव स्वर्गादिवत् । तत्र संभा
व्यत एवेतन दृष्टसंभवसदृष्टकल्पनानवकाशान्न्यायउपास्यन्न प्रायेण च व्यवहारशास्त्रे दृष्टार्थे एव विधिनिषेधा इति न

१३९ प्रत्यवायः कल्प्यः। यदुक्तं मेध्यादिप्रतिग्रहनिषेधेपि दानस्येवेह दाननिषेधेपि प्रतिग्रहस्य संभवात्तेन स्वत्वमुत्पत्स्यत इति तन्नि
त्यानिषिद्धेनापि मेध्यादिप्रतिग्रहणे वेह निषिद्धेनापि तेन स्वत्वस्याविरोध इति · तदप्यनेनैव निरस्तं प्रायेण चेत्यादिना · यथा
दैत्रैवच प्रतिश्रुतं देयमेवेति नादृष्टार्थो दानविधिः किंतु स्वत्वोत्पत्त्यर्थ एव एवमयं दाननिषेधोपि स्वत्वानुत्पत्त्यर्थ एव व्यवहार
शास्त्रत्वादिति · सिद्धांतस्तु प्रतिश्रुतं देयमेवेत्यत्रापीदं उदादिविधानं द्रव्यव्यवहारशास्त्रत्वेन सत्यपि दृष्टार्थत्वे अदत्ततः प्रत्यवा
यकल्पनादस्त्येवादृष्टार्थत्वं एवं प्रतिश्रुतस्यान्यस्मै दाननिषेधेपि निस्वत्वनिवर्तनानुपपत्तेः। यथा हि कश्चित्स्वस्वत्वानुत्पा
दकेपि चौर्यभोजनादिसिध्यर्थं रणतः प्रवर्तते तथा कश्चित्परस्वस्वत्वानुत्पादकेपि प्रतिश्रुतदाने रागतः प्रवर्तेत तद्ग्रहणे चौ
र्यइव रागतः प्रवृत्तस्य वशीकारार्थं तत्र नित्यवन्निवर्तना विषयत्वमुपपद्येत · अतो दातुः प्रत्यवायोपि कल्प्यते · किंच महत्त
स्य दत्तं लोभाद्यो यश्च देयं न यच्छति · अदेयदायकोदंड्यस्तथा दत्तप्रतीच्छक इति नारदवचनात्प्रतिश्रुतस्यान्यस्मै दाने दंड उक्तः दंडः स्मा
नाद्युपायश्चित्तकल्पनानि बंधकारैस्तत्र तत्रोक्ता · रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः। सभ्याः पृथक्पृथक्दंड्या
विवादाद्द्विगुणं दममिति स्मारादौ प्रायश्चित्तात्तत्र पृथक् दोषकल्पनासिद्धेरिति · ननु देयं प्रतिश्रुतं चेत्येवं सनेनैव सिद्धे किमर्थं पुन १३९

रुच्यतेन्यस्मै न देयमिति · केचिदाहुः देयमित्येतावदेवात्रोक्तं ननु तस्मै अन्यस्मै वेति तत्रादानएवा। प्रत्यवायान्व
गमादन्यस्मा अपि दद्यात्तं घातवत्यान्यस्मैदानेपि प्रत्यवायं बोधयितुमन्यस्मै दाननिषेध इति एवमन्यस्मैदाननि
षेधेपि दानविधाने कदाचित्स्वयमेव रक्षेत् कदाचित्तस्मै प्रतिश्रुतं तस्मै दद्यादेनियमेन तद्यावत्स्यात् दानविधिरप्यर्थ
वानेव यस्मै प्रतिश्रुतं तस्मै देयमिति तु दानवाक्यव्याख्यानं विस्तानेश्वरस्य निषिद्धलब्धार्थविवरणमेवेति ·
अपरेत्वाहुः प्रतिश्रुतं देयमिति तु ज्ञैयं यस्मै प्रतिश्रुतं तस्मै इति प्रकालेरन्यथा परिहर्तव्यं देयमेवेत्याह नियमः क्रिय
तेन तस्मा एवेति अतः प्रतिश्रुतं यस्मै प्रतिश्रुतं तस्मै देयमेवेत्युक्तेपि तस्मै वान्यस्मै च कदाचिद्दद्यात् · एवमपि न
स्मै दानसंपत्तेरतल्लघादत्तैव निषेधो व्यारभ्यते अन्यस्मै न देयमिति · अन्ये त्वाहुः देयमेवेति शाब्दनियमेपि न स्याए
वेति यशाब्दनियमाभावेपि संप्रदाननियमोप्यार्थिको स्येवेकक्रियस्य वशीकाराद्दृष्णे क हायनीवत् · यथाहि · यस्या
मेव क्रयविक्रयक्रियायामेकहायनीकरणत्वोमस्य कर्मतस्यामेवारुण्यकरणं यस्यामेवारुण्यकरणं तस्यामेवसो
मः कर्म एकहायनीचकरणमिति सम्बन्धोन्यतिरमः पार्ष्णिकः सिध्यति · एवमत्रापि यस्मै प्रतिश्रुतं तत्संप्रदानिकायामे

१३९ वदानक्रियासां प्रतिश्रुतं दयं करणं नान्यसंप्रदानिकायामित्यपं नियमः पार्ष्टिकः सिध्यत्येवेति एकेनादियावेनश्रुत्य
र्थाभ्यां देयमेवनस्माएवचेतिअनेकनियमबोधवैष्ट्यविरोधात्कयेकहा यस्मारुण्यादि ब्रिचेतिपुनरनर्थकमेवप्राप्नोति
नचान्यस्मै प्रतिश्रुतमिति·तस्मादेवमन्यथाऽपिपरिहर्तव्यं·दानस्य स्वामिनं प्रत्येव संभवाज्जीवंतं स्वामिनं प्रत्येव दानविधिः
प्रवृत्तः। तेन तस्मिन्सति प्रतिश्रुतं देयमेव दानसहितेनैव प्रतिश्रुतेन स्वत्वमुत्पद्यते न केवलप्रतिश्रवणेनेति दानविधेः फ
लितार्थः। अन्यस्मै प्रतिश्रुतमन्यस्मै न देयमित्येभक्षुसामान्यक पवृत्तमपि निसति प्रवृत्तेन दानविधिना स्वविषयेबा
धितत्वाद्सतिस्वामिनि न प्रवर्त्तते·तत्र वान्यस्मै न देयमित्यनेनान्यस्मै दानानर्हमित्युक्तं·न चैतत्संभवति प्रतिश्रवणमात्रे
णस्वत्वानुत्पत्तौ विस्पर्धापत्त्वात्स्वामिन्येवस्वत्वे ति प्रतिश्रवणमात्रेण स्वत्वे भवतीति फलतोस्य वचनस्य मात्स्यार्थः सिध्य
तीति·किंच·प्रतिश्रुतं देयमितिनात्र दानोत्तरं विधीयते किंतु यद्दानं कर्त्तुं प्रतिश्रुतं तदेव दानं कोपलोभादिना न कुर्यात्
दानादिति पुनः प्रवर्तते· न च दानं स्वामिन एवावश्यकं नेतरस्येति स्वामिनं प्रत्येव दानविधिप्रवृत्तेः स्वामिति स्वत्वनाम्या
मेव दानप्रतिश्रवणाभ्यां स्वत्वमुत्पत्तिर्न केवलप्रतिश्रवणेनेति युक्तं चैतत् तस्मिन्नसति प्रतिश्रवणमात्रेणेति·एतदयुक्तं।· १३९

विज्ञानेश्वरग्रंथविरोधात्·तेनाहयश्चान्यस्मै प्रतिश्रुतमित्यस्यैव व्याख्याने पुत्रदारसर्वस्वप्रतिश्रुतेषु स्वत्वसद्भावादि
त्युक्तं तेन तस्य प्रतिश्रवणमात्रेण स्वत्वोत्पत्तिप्रतिपादकतायां ग्रंथविरोध एव तावत्·किंचादेयमित्यस्यैव न देयमित्य
स्यापि प्रसक्तिपूर्वकत्वाद्दानप्रसक्तेश्च स्वामिनं प्रत्येव संभवात्तत्रैव प्रवृत्तिरविशिष्टायां तु दानानर्हता प्रतिश्रवणमात्रे
ण स्वत्वानुत्पत्तौ न संभवतीत्यर्थापत्तिरुक्तासापि ग्रंथाविरुद्धा प्रतिश्रवणेन स्वत्वानुत्पत्तावपि निषेधबलादेव सर्वस्व
पुत्रदारादिवद्दानानर्हतोपपत्तेरुक्तत्वात्·यत्तूक्तं प्रतिश्रुतं देयमितिनात्र दानोत्तरं विधीयत इत्यादि तत्र·प्रतिश्रवणेन सं
कल्पनिर्वापादिस्थानीयेनोपक्रांतस्य पूर्वं दानस्वामिनं प्रत्यवश्यकर्तव्यं चेत्यतिपाद्येनैव प्रारब्धास्यैवावश्यकर्तव्यत्वन्या
येन सिद्धमिति प्रस्तुतान्नाप्रत्येव दानविधिः प्रवर्तते अत एव कालातीतेऽस्य स्वत्वेनेति याज्ञवल्क्ये स्तुतस्यापि दापनमुक्तं·एवमन्यस्मै
न देयमित्येषोऽप्यर्थः स्वामिनं प्रतिषाध्यस्वान्यायेनैव प्राप्तत्वेन तदपि वचनमन्यप्रत्येष वर्तते·ततश्चान्वयव्यतिरेकद्वारा ए
क एवार्थ उभाभ्यामपि प्रतिपाद्यत इत्येकमेवानर्थक्यं परिहर्तव्यं·संतिष्ठेद्दृशान्यस्योदाहरणानि व्यवहारशास्त्रेन्य
त्रापि च·यत्तूक्तमस्वामिनि कथं दानोपदेश इति·शृणु·सत्पुत्र धनेत्यादावपुत्रादयः स्वामिन एव·अपुत्रस्यापि धनेतदया

१५० दुहित्रादयः स्वामित्वं भजेरन्निति पत्नी दुहितरश्चैव इत्यनेनोक्तं। यस्य तु सब्रह्मचारिपर्यन्तः कोऽपि नास्ति तस्य क्षत्रियादेर्धनं म
नुना इतरेषां तु वर्णानां सर्वाभावे हरेन्नृप इति राज्ञः स्वत्वमुक्तं। नादद्याद्ब्राह्मणस्य यतेत्तु पदापि अहार्यं ब्राह्मणद्रव्यं राज्ञा नि
त्यमिति स्थितिरिति मनुना हरणनिषेधाद्धरणप्रसक्तेश्चास्य विषयत्वेन राज्ञः स्वत्वाभावावगमात् प्रतिश्रुतदानविधिर्न सं
भवतीति शंक्यते तथापि नारदेन ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन। ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथे
ति नृपस्य दानोक्तेर्यथा क्लिष्टरूढादिवद्दानमात्रोपयोगी पाराक्तिकस्वत्वाभिप्रायेण कथंचित्समर्थ्यते तथा प्रति
श्रुतदानविधिरप्युपपन्नः। यद्वा गौणप्रयोक्तृपरिग्रहात्स्वीयदानरूपलौकिकस्वत्वोपायेन राजा सर्वस्य ब्राह्मणवर्जमित्या
दिमिश्रवाक्यैः सर्वस्याप्यस्वामिकवस्तुनो राजा स्वामीति प्राप्ते अहार्यं ब्राह्मणद्रव्यमिति मनुनापवादे कृते नारदेन ब्राह्मणस
म्प्रदानकदानरूपे विषयविशेषेण देवस्वत्वं राज्ञः प्रतिप्रसूयते। ततश्चास्वामिकब्राह्मणद्रव्येऽपि ब्राह्मणसंप्रदानकदानं
कर्तुमस्य वरोऽतः स्वत्वमिति प्रतिहते वरवयापि प्रतिश्रुतदानविधिप्रवृत्तिरिति। नन्वेवं प्रतिश्रुतं देयं अन्यस्मै न देयमिति व
चनान्ययेकार्थप्रतिपादनेनार्थवत्त्वेऽपि कालान्तरकास्यसुतस्यैव राजकर्तृकराप्नोस्त्व रस्येन प्रतिश्रवणकर्तृ राया दद्दिनाप्र १५०

तिश्रुतं देयमिति न सिध्यतीति चेत्। एवमेवेत्यस्यताः। वयं तु ब्रूमः। अत्र पूर्वार्धश्चाविलं धर्मकारणादित्युक्तेर्धर्मार्थप्रति
श्रुतविषयत्वेन देयं प्रतिश्रुतं चैवेति सामान्यवचनस्य प्रतिश्रुतदानविधिरूपसंहारार्थमेव वाक्यमित्यभ्युपगतं सर्वनिबंध
कारैः। ततश्च पुनः श्रुतविषयत्वेनाप्युपसंहाराभ्युपगमे तात्पर्यभेदाद्दुःपरिहरो वाक्यभेदः प्रसज्येतेति। नचात्र विनिगमना
विरहो येन श्चाविलं धर्मकारणादित्येतद्वोपलक्षणं स्यादिति शंक्यतां। किंच विनिगमकमिति चेत्। केचित्तावदाहुः। योगा
धमनविक्रीतं योगदानप्रतिग्रहं। यस्य चाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेदिति वाक्ये योगाख्योपाधिना विक्रीतस्य
प्रतिगृहीतानां पूर्वार्धोक्तेर्यस्य चाप्युपधिं पश्येदित्युत्तरार्धस्य सामान्यतः प्रवृत्तस्य प्रतिश्रुतादिसंग्रहार्थत्वाद्दुपाधि
नाप्रतिश्रुतस्यानिवर्तनापत्त्यापि धान्यान्तेश्चाविलं धर्मकारणादित्येतदुपलक्षणं किंतु स्तुतग्रहणमेवेति। इदं तु विस्तानैष रो
चानुमेनेनैव हि यस्य चाप्युपधिं पश्येदित्युपधिग्रहणसमर्थ्यामिदमुपाधिविगमदर्शं व्याहृतं स्याख्यातं। तेनागामिनो
पाधिविरोधेनापि विक्रयदानप्रतिग्रहाः कृतास्तदुपाधिविगमे कर्तव्यादीन्विनिवर्तयेदिति ग्रन्थेन। ततश्च धर्मार्थप्रतिश्रुत
व्यतिरिक्तस्याप्यौपाधिकप्रतिश्रुतस्य तदुपाधिसंपत्तौ देयत्वात्तदुपलक्षणं संभवत्येवेति नास्य वचनस्य विनिगमकत्वेप्य

१४१ त्तिरित्यस्य द्विनिगमकं वाच्यं। किंच· आगामिनोपाधिविशेषेणेति व्याख्यानात्पूर्वभाविप्रीतिरूपोपाधिना दत्तस्य प्रतिश्रुतस्य
वा येप्रातिरूपोपाधिविगमेपि निवर्तनं योगाद्धर्मानिति वाक्येन नोक्तं· ततश्च प्रीतिदानार्थमपि प्रतिश्रुतस्योपलक्षणं प्राप्तोसे
वश्याविलं धर्मकारणादित्यनेन तन्निवृत्त्यर्थमपि किंचिद्विनिगमकं वाच्यमेव तदुच्यते· मुख्यत्वेन त्वनुपसंज्ञातविरोधित्वात्
आविलं धर्मकारणादित्येतद्यथाश्रुतमेव ग्राह्यं नोपलक्षणं युक्तमिति पूर्वत्रैवोपसंहारार्थता युक्ता नोत्तरत्र सुतस्य ग्रहणइति
विनिगमकमिति युक्तमुत्पश्यामः॥ अत एवापराकेंस्वस्येत्यस्य न व्याख्याख्यातेन वाप्यहान्नं संप्रदानं ब्राह्मणं प्रति एतावतु
म्यं समपादेयमिति· श्रावयित्वा सौपदिदानमदत्त्वैवमत्तरूतादातदायादीनां तद्देयं अप्रयच्छतो राज्ञा दाप्यइति ग्रंथेन दापुपल
क्षणार्थतयैव व्याख्यातमिति· किंच· यथा निर्वापो यथावाप्तेंद्रवायवादिग्रहणं प्रदानोपक्रमइति सुरूवार्तिके इदमी
तान्यधिकरणेषु एवं प्रतिश्रवणमपि श्चाच निर्वापाग्रहणादिनोपक्रांतमेव प्रदानमाश्रावणप्रत्याश्रावणादिप्रकारेण प
रिसमाप्यते एवं प्रतिश्रवणप्रक्रांतमेव प्रदानं परिसमापयितुमर्यंतस्तैदानोपदेशांसवापेसुतं प्रत्तो चदापारमपि· प्रतिप्रतिश्रव
णेनोपक्रांतप्रदानं कथं समापयितव्यमित्यपेक्षावशात्तुत्संप्रवर्तते· अन्यथा दापादौसतिप्रक्रांतस्यापि प्रदानस्यापरि १४१

समापनापत्तेः यन्त्वन्येनोपक्रांतस्यान्येन समापनं सहस्रसंवत्सराधिकरणं कुलकल्पनिरासान्निरस्तसत्पतिरत्ना· अन्येपि
तु समापयितव्यमित्येतस्य क्षवचनं कुशप्रवर्तत इत्याक्षेपो। तद्विषयावधारणे समापनापेक्षायाः सहकारितानाविरुध्यते·
तं सुक्तन्याघारग्निहोत्राधिकरणे वार्तिको पाद्दासायैप्रातरभ्युक्तोपमेक एव प्रयोगो भवति तदासायं होमे कृते प्रदानाम यज
मानस्य कदाचिदपि दृश्यते तदा यथा कथंचित् प्रातर्होमः कर्तव्य इति· श्रुतमात्रविषयत्वबादिन्याविच्छेदमेतच्चोद्यपरिहार
सणिरनुसरणीयेव· अतश्च यथा यागार्थगृहीतं निरूप्तं नायाग एव विनियोज्यं नान्यकार्ये एवं प्रतिश्रुतमपि न दाया
दादिभिरप्यस्त्वशक्यो विनियोक्तुं न चासमाप्यपणेकुमिति किमनेनेत्याकांक्षानकुतश्चिज्जन्मसहस्रेणापि निवर्तेति
एव स्वयंदानविधिनैव निवर्तनीये ति कथं चिन्नयाप्परिहार्यत्वान्यथापयत्यास्तुतग्रहणमुपलक्षणार्थमेव न स्वयं दे विवक्षितमि
ति· नन्वेवं प्रीतिदानार्थमपि प्रतिश्रुतमवश्यं परेयस्यानूतनश्चापि प्रतिश्रवणोपक्रांतस्यदानस्य समापना पत्त्यादिति चेन्न· प
त्रिवैपस्यैव कर्मणउपक्रांतस्यान्या येनावश्यसमापनीयत्वं प्रतिपादनात् धर्मार्थदानस्यैवतथात्वात्· प्रीतिदानस्य तु रथग्रह
कर्मादिवल्लौकिकस्य प्रारब्धस्याप्यवश्यसमापनीयतायाः प्रगृह्यएवाकारितत्वादिति· ननु धर्मग्रहणस्येह विवक्षितत्वेन

१४२ द्विषये दानस्योपसंहारः स्यादाग्नेय इव चतुर्धाकरणस्य इह तु तो दापनमेवाराधने प्रस्तावाय यविधीयते ननु दानं तत्तु
यथाप्राप्तमेव धर्मार्थमितरार्थं वा प्रतिश्रुतं स्यात् न्यत इति न तस्योपसंहारः संभवति प्रयोजकव्यापाररूपत्वात्तस्य ए
तस्य यत्र्याघकामं याजयेदित्यादिवदिति वाच्यं न हि प्रयोजकव्यापारत्वे विध्यविध्योः प्रयोजके किंतु प्राप्ताप्राप्तभक्ति यर्यो
जनस्य दक्षिणालाभप्रयुक्तत्वादागमनतः प्राप्तिः ननु दापनस्य रागप्राप्तिसंभवः स्वरूपेण रागप्राप्त्युपगमेऽपि तु दापनस्यात्
न्ते प्रत्यवायपरिहारस्य भवत्येव विधिस्तेन रूपेणाप्राप्तेः अस्ति चैवंविधमुदाहरणं यथा दत्त्वाश्चैवापदत्यनूं अपयोमह
दाप्नोति नरकं चैव गच्छतीति इदं उ विधिः अत्र हि शारीरो दंडो यद्यपि न रागतः प्राप्तस्तथापि यमदंडो रागत एव प्राप्त इति त
द्दंशे अकरणे प्रत्यवायार्थतया विधिरिष्यते एतेन रूपेणाप्राप्तेरेव मिहाथाति उच्यते कृत्वा नियातिः श्रेणाश्च गणा
ज्ञानप्रदानपि सधर्मान्वेतितानूराज्ञाविनीयस्य प्रत्येति तथा सूनैवं दापनमंतरेणास्य धर्मस्यापन्नात्तु पद्यते दापनं प्रा
प्तमेवेतीह न विधेयं प्रतिश्रुतदानं तु कीदृशस्य धर्म इत्यपेक्षायां धर्मार्थं प्रतिश्रुतविषयमेवेत्यवश्यं वोपनीयं तत्र यथा
द्विविषयमपि दानं सामान्यवाक्यप्राप्तं यदि तु तद्विषयमेवेत्यपि बोध्यते ततो दुःपरिहरो वाक्यभेद इति राकवलि १४२

दमन्यप्यपि लिंगदन्यपारिज्ञाते हि पर्वण्योदयिके कुर्युः श्रावणं तैत्तिरीयकाः । कठचाः श्रवणे कुर्युर्ग्रहसंक्रान्तिवर्जिते
इति छंदोगपरिशिष्टवाक्यात् तैत्तिरीयशाखिनामेवौदयिकपर्वण्युपाकर्म इतरयजुःशाखिनां तु श्रावणी दुर्गानवमी दूर्वाये
यकुलाष्टमी पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दिनमिति वचनात् पूर्वविद्धपर्वणीति हेमाद्र्यादिसंमतत्वे इदं तु मुख्याव
कुंचगद्यस्यैव पौर्णमास्या उपाकर्मणश्च प्राप्तेस्तदनूद्याप्राप्तौदयिकत्वतैत्तिरीयकर्तृरूपानेकगुणविधाने वाक्यभेद
स्तथापि चितोदयिकत्वं प्राप्तावपि विशिष्टानुवाददोषादौदयिकत्वमात्रविधानात् तैत्तिरीयग्रहणमितरोपलक्षणार्थमि
ति पूर्वपक्षिते हद्धासिद्धांतितं तत्राद्यः संप्राप्ते श्रावणस्यांते पौर्णमास्यां दिनोदये इत्यादिभविष्योत्तरादिवाक्याद्वेद
यिकत्वप्राप्तेरप्राप्ततैत्तिरीयकर्तृमात्रविधिः विशिष्टोद्देश्यतयाप्याख्यावाक्यभेद इति अत्र च विशिष्टोद्देश्यतायां प्रमाणा
भावाद्द्वपरितुष्या यपक्षदूषणपूर्वकं पक्षांतरमुक्तं अथवा विशिष्टविधिरेव कारिकायां पूर्वमुपाकर्मणस्तत्राविधानात्
न च गद्यस्यादिप्राप्तानुवादसंभवः । ग्रंथकर्तृभेदेन विशिष्टविशिष्टविध्याश्रयणसंभवात् शाखांतरस्य बोध्यभेदेन अन्य
थे ह बोध्यभेदाभावमात्रेण समानविषयानेकस्मृतिप्रणयनवैयर्थ्यापत्तेः । न च कर्तृभेदेऽपि शाखांतरवद्बोध्यभेदाभा

१४३ वेनैकस्य कर्मणोऽनेकविधिवैयर्थ्यं सर्वत्र प्रतिविधि विकल्पश्रवणात्। सर्वशाखाधिकरणन्यायेन कर्मणः प्रधानस्यैकत्वाद्विशि
ष्टविधिगौरवाच्च तैत्तिरीयकपदलाक्षणिकमिति वाच्यं। तथा सति तैत्तिरीयकपदवैयर्थ्यापत्तेः। पर्वण्योदयिके श्रावणं कुर्युरि
त्येतावतैव हि सर्वेषां प्राप्तत्वात् तैत्तिरीयकपदं व्यर्थमेव स्यात्। किं च विशिष्टविधिगौरवभयात् लक्षणांगीकारे इति प्रसंगः। एवं च श्रा
वितं धर्मकारणादित्यस्यापि वाक्ये सुतरां ग्रहणस्यानुपलक्षणत्वात् सिद्धिः। शिष्टं धर्मार्थं प्रतिश्रुतं विषयकमुभयविशिष्टं दानं दाप
नाऽशिक्षं विधीयत इति न दायादेरपि प्रतिश्रुतदानसिद्धिरिति। शक्यं हि दमपि परां कर्तुं। न हि स्मृतिषु विधिरस्ति क्वापि कस्यापि
धर्मस्य। अनुवादिका स्तुताः। अतस्ताभिरविदितेऽपि रवार्थे बोधिते स्वस्य पुंवाक्यत्वेनाप्रामाण्याद् अर्थापत्त्या कस्मिंश्चिद् वेदवाक्यमे
वतस्यार्थस्य विधायकं तदुपस्थापकस्सामर्थ्येऽनुस्मृतिवाक्यं। न च घटाद्येकवस्तूपस्थापकानामनेकेषामपि त्वक्चक्षुरादीना
मन्यतमस्य वैयर्थ्यमापद्यते। तेन समानविषये स्तावत्स्मृतिवाक्यैरेकरूपमेकमेव वेदवाक्यं मूलं कल्प्यते सर्वैरपि विकल्पेन।
यत्र त्वेकं स्मृतिवाक्यं सामान्यविषयमितरस्मृतिवाक्यं तु विशेषपरं तत्रोभाभ्यामपि स्वस्वानुरूपं मूलद्वयमुपस्थाप्यत
इति तावन्निर्विवादं। तत्र यद्येकविशेषश्रवणमस्ति ततः कस्यचित्तु सामान्यवाक्याद्विशेषवाक्यस्य शाखान्तरीयस्य समानशा १४३

खीयस्य वा कल्पनेन कोऽपि फले विशेषः। शाखान्तरीयत्वे विशेषवाक्यस्यापि विशिष्टविधित्वे सर्वशाखोपसंहारेण कर्मभेदाभावा
त्तस्य शाखान्तरीयेऽपि सामान्यवाक्येऽनादर्तव्यत्वात्। एकशाखीयत्वे तु विशेषस्य गुणभूतत्वेऽननूद्यैव विधानात्। उपसंहारप्र
योजकस्यैतूपसंहारस्यैवासंभवात्। यत्र तु विशेषवाक्ये एकविशेषश्रवणं यथा पर्वण्योदयिके इत्यत्र यथा वा प्रकृते स्वस्थेनार्त्ते
न चेत्यत्र तत्रास्ति एकशाखीयत्वे भिन्नशाखीयत्वे च विशेषः। आद्ये कर्मानुवादेनानेकविशेषविधाने वाक्यभेदप्रसंगा
दनन्यगतिकेन च गुणद्वयेन कर्मभेदादन्यतरस्याप्युपलक्षणत्वेन सगतिकत्वसंभवे तदनौचित्यात्तैत्तिरीयादिपदस्योपलक्ष
णत्वमेव भवति। भिन्नशाखागतत्वे तु विशेषविधेः कर्मैक्येऽपि विशिष्टविधित्वेन भवतीति नोपलक्षणत्वं। तत्र किंस्माप्य
मिति चेत्तत्राऽपि सामान्यविशेषस्मृत्योर्भिन्नग्रंथगतत्वेन तत्कल्प्ययोरपि वेदवाक्ययोः शाखान्तररूपग्रंथगतत्वानुमानेऽपि ए
कशाखीयत्वं। त्राब्राह्मणरूपानेकग्रंथगतत्वेनाप्युपपत्तेः। शाखान्तरगतत्वानुमानेनैकान्तिके कल्प्यते। वस्तुतस्तु समंत्रब्रा
ह्मणगतयोरिव वाक्ययोस्स्मृत्योर्भिन्नग्रंथगतत्वेऽपि सर्वासां स्मृतीनां सर्वान् प्रति प्रवृत्तेर्बोध्यभेदाभावादेकस्य वेदस्य
वाक्ययोरपि बोध्यभेदाभावादेकशाखागतयोरेवानुमानं युक्तं। ततश्च विशिष्टविध्यसंभव तत्र यदि तु बोध्यभेदाभावाद्भिन्न

वाक्यगतयोरनुमानं तथापि तदधिकरणेऽभिधानात्। यत्तु नानावाक्यभेदो ज्ञापकं मदनपारिजातकृता तदप्ययुक्तं स्थले
रविधायकत्वादेवाकल्पस्य तु वाक्यस्यावृत्त्यादिमतएव कल्पनानेनत्रापि वाक्यभेदः। तदुक्तं। श्रूयमाणस्य वाक्यस्य
न्यूनाधिकविकल्पने। लक्षणवाक्यभेदादिदोषो नानुमिते त्वसौ। यत्तु निबंधेषु तत्र न त्रेवाक्यभेदापत्त्याभिधानं तद्विधा
न्त्यादिमतो वाक्यस्य कल्पने गौरवात् तदभिप्रायमेव। तच्च प्राप्तत्वेनानुवादसंभवे परिहरणीयं असंभवे त्वभ्युपेयमेव। न
उद्देश्यविशेषेणाविशेषेण विवक्षालिधिमित्ते प्राप्ते कर्तव्यत्वेन कर्मगुणोपादाननिमित्तो वैरूप्यनिमित्तश्च यो वाक्यभेदस्तद्वदत्रा
माण्यापादको गौरवलक्षणो वाक्यभेदः। तेनितरोपकवाक्ये च परिहृतएवास्ताचोदयितकसत्राद्युपपादनेन पारिजात एव
स्वस्थे नेसादि वाक्ये चास्माभिः स्वलग्नहणस्य जघन्यत्वेन घन्यत्वेन दायादायुपलक्षणत्वोपपादनादिति। अतएव विज्ञानेश्वरे
णक्षयाहे मृतेऽहनि तु कर्तव्यमिति याज्ञवल्कीये कोद्दिष्टविधिवाक्यव्याख्याने आपाद्य सहपिंडत्वमौरसो विधिवत्सुतः। कुर्या
त्तदर्शवच्छ्राद्धं मातापित्रोः क्षये हनीति जमदग्निना सापिंडीकरणं कृत्वा कुर्यात्पार्वणं च सदा। प्रतिसंवत्सरं विद्वान् छागल १४४
लेयोदितो विधिरिति शातातपेन च पार्वणविधानाद्धि प्रतिपत्तिमुपन्यस्य औरसक्षेत्रजाभ्यां मातापित्रोः क्षयाहे पार्वणमेव

कर्तव्यं दत्तकादिभिरेकोद्दिष्टमिति दाक्षिणात्यव्यवस्थां दूषयित्वा उदीच्याः पुनरेवं व्यवस्थापयंति स्यादिग्रंथेऽभ्यमावा
स्यादिषु यस्य त्रितयपक्षोऽथवा पुनः। पार्वणं तस्य कर्तव्यं नैकोद्दिष्टं कदाचनेति वाक्येन सामान्यरूपाणां पार्वणवाक्यानामुपसं
हारमाशंक्य भिन्नभिन्नमूलेनानेन भिन्नभिन्नमूलानां बहूनां चैकक्षयाहमात्रपार्वणविषयाणां वचनानाममावास्यापेतप
क्षमृताहविषयत्वेन संकोचस्यायुक्तत्वादिति दूषणमुक्त्वा सामान्यवचनानर्थक्याच्चेति दूषणांतरमुक्तमुपपादितं च।
तदेतदानर्थक्यापादनं स्मृत्यंतरत्वेन कर्तृभेदादेवसमाधानं तु शक्यमेव तथाप्युक्तं तत्स्मृतिकल्पयोः सामान्यविशेषवाक्ययो
रेकशाखागतयोरेकानुमानाद्वाक्यभेदाभावेन संगच्छतेऽन्यथेति। एवं नानावेदैकशाखीवाक्यद्वयकल्पनेन सिद्धांतउपपादितः। व
स्तुतस्तु भिन्नशाखागतयोरपि कल्पने न दोषः। यत्तूक्तं भिन्नशाखायां गतत्वेऽपि विशेषविधेः कर्मैक्येऽपि विशिष्टविधित्वैव भवती
तिनोपलक्षणत्वे तिनन्न। प्रत्यक्षो हि शाखायां रवाक्यशाखांतरेणान्यतरप्राप्तावपि वाक्यभेदाद्विशिष्टविधित्वैव भवतीति स्मृतौ तु
कल्पे स्मृतौ यद्यपि विशेषद्वयं श्रुतं तथापि स्मृत्यंतरतोऽन्यतरप्राप्तावेकविशेषप्राप्तिकैव श्रुतिः शाखांतरापापि कल्प्यतेऽन्यथा
ऽवात्। यत्तु विज्ञानेश्वरीयासामान्यैकवाक्यानर्थक्यात्किंचित्रैकशाखीयवाक्यद्वयकल्पनं नागमयतीति तत्राचदति प्रसक्तं मतानुगम

१४५ नंनास्ति ब्राह्मण्याद् बाह्यशासनादिति सामान्यवाक्यास्य थक्षितिं समारूढस्य न विष्कागंतुमर्हसी येनेन स्यस्यांतरे
णोपसंहारस्य तेनैवोक्तत्वात्· नहि तत्रापि सामान्यवाक्यस्य किंचित्प्रयोजनमस्ति एवं निबंधमित्युक्तं तत्र सामान्य
वचनानर्थक्यप्रसंगे प्युपसंहारो गौरवत एव येन शास्त्रांतरीय सामान्यवाक्यकल्पनैवगम्यते विशेषांतर्गतसामान्य
प्राह्यनुवादकं वा सामान्यवाक्यमिति यत्कल्प्यते· द्वितीयेनेश्वरी यत्तु सामान्यवाक्यानर्थक्यप्रसंतनमप्युक्तमपत्वेन सा
मान्यस्य विशेषांतर्गतनानीयप्रयोजनमित्येवं व्याख्येयं· यथा लोके दुर्बराधिकरणपूर्वपक्षिणा स्नावकत्वे विध्यपेक्ष
याभ्यानर्थक्यमायादितं न सर्वथा तथाक्षयाहमात्रपार्वणविधिः प्रेतपक्षदर्शान्यक्षयाहेपिप्राप्तो द्विष्टविकल्पेन प्रवृ
त्तः स्यात्तत्प्रवृत्तिविशेषकरत्वेनार्थ———मुपसंहारो तेन विकल्पापवाद एव प्रेतपक्षदर्शक्षयाहयोरिति· यत्र त्वेवं विध
मर्थवत्वं न संभवति तत्रोपसंहारो युक्त एवेत्यभ्युपेतं येन इति न विरोधः। तदेवं सामान्यवाक्यस्यैकशाखीयस्य भिन्नशा
खीयस्यापि वा कल्पने बाधकाभावाद्विशेषहृदयप्रतिज्ञा यत्रेत्यनुवादसंभवे विशिष्टविधित्वप्रयोगे स्थिते नैव विरोधवा
क्यस्य स्थैनेत्याद्वि वाक्ये च वैषम्य बीजं चिंतनीयं· तत्र यत्तुत्तरत्र जघन्यत्वेन सुतग्रहणमुपलक्षणं ततः पूर्वत्रापि ते १४५

नैयहेतुमात्रे तैत्तिरीयपदं वाजसनेयादीनामुपलक्षणं स्यात्· अथ धर्मस्य तपउयोः कतरदुपलक्षणमित्यत्र केचत्तं विनि
गमकं जघन्यत्वेन तु तैत्तिरीयवाक्ये वैषम्ये तत्र तु प्राप्तस्य प्राप्ती बीजं· औदयिकत्वं हि प्राप्तस्यान्नविधेयं तैत्तिरीयप्राए
व विधेयाइति नोपलक्षणं· इतरत्र तु देयं प्रतिश्रुतं चैवेयं सस्य प्रतिश्रवणकर्तरि न प्रवृत्तिस्तत्र प्रारब्धवैधकर्मणो व
श्य समापनीयत्वस्यप्राप्यतरत्वप्राप्तेः। अतस्तत्सुतादि विषयएव प्रवर्त्तते तेन दाने सुतविषयत्वप्राप्तेस्तदनुवादसंभ
वात्कर्मार्थप्रतिश्रुतविषयत्वेन वा प्राप्ताविधेयेति सुतग्रहणमेवोपलक्षणमित्युच्यते· तर्हि न्यायतः सुतादिविषयतसि
द्धिवत्प्रारब्धवैधकर्मण एवावश्यसमापनाकांक्षान्यायसहकारित्वेन धर्मा· ।।श्री।। द्रव्यप्रदानिकमथान्यस्मै प्र
तिश्रुतमन्यस्मै न देयमिति निषेधगर्भमिति ततः परं स्तेयान्यमहापातकनिष्कृतिरिति निषेधार्थे निरूप्यते स्तेयान्यमहा
पातकनिष्कृतिरिति कृतिनिषिद्धेष्वुपदिष्टा तत्र केचित् ब्रह्महत्यासुरापानगुरुतल्पमहापातकिसंसर्गप्रायश्चित्तक
लेनभवये येति मन्यंते। वयं तु ब्रूमः। स्तेने तु मानवेन वा धर्मास्त्वेता यागोत्तमाः स्मृताः। द्वापरे शंखलिखिताः कलौ पारा
शराः स्मृता इति पाराशरस्मृतिः स्मा अविरोधे मन्वादिस्मृतेरपि कलौ प्रवृत्त्य विशेषेण चेयधर्मादि रोधे प्रवर्त्तते· ब्रह्महत्या

१४६ सुरापानादिप्रायश्चित्तविधिश्च पराशरेण स्मर्यते· समुद्रसेतुगमने प्रायश्चित्तं विनिर्दिशेदिति ब्रह्मनिष्कृतिः। नयप्र
द्विजः कुर्याच्च दीर्घलामुमुद्रगां· चांद्रायणं ततश्चीर्णं कुर्याद्ब्राह्मणभोजनं· अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणां
इति मद्यपनिष्कृतिः। अत्र गौडीमाध्व्यादौ चांद्रायणाद्यतिरेकगोदानं च कल्प्यं· सुरापानं सकृत्कृत्वा त्वग्निवर्णां सु
रां पिबेत्· स पावयेदथात्मानमिह लोके परत्र चेति सुरापनिष्कृतिः। आसनाच्छयनाद्यानात्संभाषात्सहभोजनात्·
संक्रामंति हि पापानि तैलबिंदुरिवांभसि· चांद्रायणं यावकं च तुलापुरुष एव च· गवां चैवानुगमनं सर्वपापप्रणाशनमि
ति महापातकसंसर्गप्रायश्चित्तं· अत्रापि संसर्गस्य बहुप्रकारत्वात्तारतम्याच्चांद्रायणावृत्तिः कल्प्या यथा द्वादशाब्दा
दितु सत्सलासंपद्यते· एतेतद्व्याख्याने माधवेनोक्तं आर्यस्तु कलियुगे संसर्गदोषाभावमभिप्रेत्य संसर्गप्रायश्चित्तेनाप्य
धात्· अत एव स्पर्शस्पर्शत्वादेकलौ वर्ज्याभावेपि पापमात्रापादकत्वमस्तीत्या हेति आसनाच्छयनाद्यानादिति श्लो
कमात्रं पृथक्कृत्य व्याख्याय संसर्गदोषव्याजेन पूर्वं मनूक्तप्रायश्चित्तानां सर्वेषां साधारणं प्रायश्चित्तान्याह इति
महापातकिसंसर्गान्यसंसर्गप्रायश्चित्तविधापितया चांद्रायणं यावकं चेति श्लोको व्याख्यातः। तदयुक्तं· पराशरेण १४६

स्याप्रक्रमे एवोक्तं· त्यजेद्देशं कृतयुगे· कृते संभाषणादेव त्रेतायां स्पर्शनेन च· द्वापरे त्वन्नमादाय कलौ पतति कर्मणे
ति· तत्र कर्तारं तु कलौ युगे इत्यस्य तावदयमर्थोन्याप्यः। कृतत्रेताद्वापरेष्वेकदेशग्रामवासैककुलमात्रेण संसर्गप
दोषः। कलौ तु नैतन्मात्रेण दोषः किंतु निषिद्धाचरणेनैव तेन संलापस्पर्शनिश्वासादिनिषिद्धसंसर्गस्यापि निषिद्धत्वा
त्कर्तुरपि दोषो भवत्येव च· द्वितीयश्लोकेपि कृते संभाषणादेवेत्येवकारेणोत्तरत्राप्युदयेच्च तदनुकर्षणेन कृते संभा
षणमात्रात्पतति· त्रेतायां स्पर्शमात्रात् द्वापरे तु तत्स्वामिकान्नप्रतिग्रहमात्रात्कलौ तु कृत्स्नेन निषिद्धकर्मणा संला
पस्पर्शनिश्वाससहयानाशनासनादिरूपेण शुद्धकाः संभाषणादिसमुदायेनैव पततीति श्लोकयोरर्थः। अन्यथा कर्तारं तु
कलौ त्यजेदित्यनेन सोत्स्कार्ष्ट्याद· संसर्गो निषिद्धः। कलौ पतति कर्मणेत्यनेन च साक्षात्कर्तुरेव दोषो न संसर्गकर्तुरि
ति परस्परविरोधः स्यात्· एवं च कलौ संसर्गदोषाभावो किमर्थं धव स्याभ्याप्येवानंतरव्याख्यातश्लोकद्वयार्थानवबोध
निबंधनः। एवं च कलिनिषिद्धेषु संसर्गदोषहेतुत्वेन पातकिना सह संलापस्पर्शनिःश्वासादेकादशविधसंसर्गा
भावेपि यो देशादिसंसर्गः कृतयुगादौ दोषहेतुत्वेनोक्तः पूर्वश्लोके पश्चात्तदुत्तरश्लोके कृतयुगादौ संभाषणादिप्रा

१४७ दोष उक्तस्तद्विषया· स्वस्यार्थस्यार्थ्यं शोधितद्विषय एवेति भासमानाच्छयनासनादिश्लोकः एवंविधसंसर्गस्य पातित्या
पादकत्वपर एव· उत्तरश्लोकस्तु तत्रापि प्रसंगात्स्वपापांतरेपि प्रायश्चित्तप्रतिपादनार्थ एव· तत्र पतितसंसर्गे द्वादशा
ब्दतुल्यफलोभ्यासश्चांद्रायणादेः कल्प्यः। पापांतरे त्वनुक्तप्रायश्चित्ते क्वचिदल्पाभ्यासः क्वचिद्रूक्षसमिति· तथा क्वचित्स
मुच्चयः क्वचिद्विकल्प इति· अत एव विज्ञानेश्वरेण चांद्रायणं पाराशरवाक्यतुल्यं हारीतवाक्यं तथा· यच्चोक्तं पत्रेवानोक्त
मिह पातकनाशनं· प्राजापत्येन कृच्छ्रेण शोधयेन्नात्र संशयः इत्यौशनसं तथा तप्तकृच्छ्रमधिकृत्य· एष कृच्छ्रो द्विरभ्यस्तः पात
केभ्यः प्रमोचयेत्· त्रिरभ्यस्तो यथान्यायं शूद्रहत्यां व्यपोहतीति हारीतवाक्यं तथा पराको नाम कृच्छ्रोयं सर्वपापप्रणोदन इति
मानवमुपन्यस्योक्तं· एतानि प्राजापत्यादीनि उपपातकादिषु सकृदभ्यासापेक्षया समस्तानि व्यस्तानि योजनीयानि
तथा अदृष्टत्वे च महापातकादिषु भ्यासापेक्षया योजनीयानि· अत एवोक्तं यमेन· यच्चोक्तं यच्चानोक्तं मिश्रादि· गौ
तमेनाप्युक्तं निष्कृतीनां संग्रहार्थं सर्वप्रायश्चित्तग्रहणं कृतमिति· अत एव चेयमव्याशंका निरस्ता· पराशरेण सेतुगमनमे
व ब्रह्महत्यायामुक्तं सुरापानव्रतं च मरणांतमेव· अतस्ते एव कलौ स्यातां नान्यद्द्वादशाब्दादिरूपेयं महापातकनिष्कृतिः १४७

रित्यस्य सामान्यशास्त्रस्य सेतुगमनावधेः एव बाधेपि द्वादशाब्दादिनिषेधकत्वात्· गुरुतल्पव्रतं तु न किंचिदप्युक्तं पराश
रेण· अतस्तन्न स्मृदेवेति· चांद्रायणं यावकं चैसेत्यत्र सर्वपापप्रणाशनमित्युक्तेर्हारीतादिवाक्यव्याख्यान्यायेन ब्रह्महननसु
रापानगुरुतल्पेष्वपि पतितसंसर्गे इव प्रवृत्तेर्विज्ञानेश्वरस्येष्टत्वात्· तस्माद्ब्रह्महत्यादिव्रतविधिना विशेषशास्त्रेण पारा
शरेण कलौ पाराशरा इत्येतदेकवाक्यतया कलिविषयेणत आपि पुनः पाराशरतल्पो विशेषेण स्तेयान्यमहापातकनिष्कृतिरिति
कलिविषयं सामान्यशास्त्रं बाध्यत इति ननु सामान्यवाक्यस्य बाधितस्य विषयांतरसंभवेनाप्रामाण्यं भवति यदा हि वचनाय वा
क्यस्य च पदहोमव्यतिरिक्तविषयस्य नचेह स्तेयान्यमहापातकनिष्कृतिरित्यस्य बाधे विषयांतरसंभव इत्यप्रामाण्यमेवापद्ये
त· अतो विपरीतं वान्यस्तेयान्येयनेनैव बाधितं कलौ पाराशराः स्मृता इति वाक्यं विषयांतरेव्यवतिष्ठते स्तेयान्यमहापातक
निष्कृतिरिति· अत्रोच्यते· इदमिह निर्धार्यं कलौ पाराशराः स्मृता इति वाक्यस्य को विषय इति· यत्र तावत्स्मृत्यंतरं सामान्यविधिः
पराशरवाक्यं च विशेषविधिर्न तावदसौ विषयः सामान्यविशेषन्यायेनैव तत्र स्मृत्यंतरबाधसिद्धावस्य वैयर्थ्यापातात्· अ
तो यत्र तुल्यबलतया विकल्पप्रसक्तिः स तावदस्य प्रथमस्य विषयो वाच्यः। एवं च यथैतद्वाक्यं विकल्पन्यायबाधार्थं पि व्यवतिष्ठते तथा

१४८ सामान्यविशेषन्यायबाधार्थमपि किं नेष्यते न तत्र विनिगमकमस्ति। यद्येनवाक्येन विकल्पन्यायबाध्यते न सामान्यविशेषन्या
यइति अतश्च यत्र स्मृत्यन्तरविशेषशास्त्रं पराशरबाक्यं च सामान्यशास्त्रं तत्रापि कलौ पाराशराः स्मृता इति प्रवर्तते. न चेद्विशेषवि
धेस्य संतारूपस्य विशेषशास्त्रस्य पाक्षिकबाधस्याप्यप्रसक्तेस्तत्र प्रवर्त्तमानं कलाविति वाक्यमपूर्वविधिः स्यात्. विकल्प
विषये च पाक्षिकस्य बाधस्य प्रसक्तस्यानियमनान्नियमविधिः स्यादिति वैरूप्यं वाच्यं. विकल्पन्यायस्य सामान्यविशेषबाधन्या
यस्य च प्रवृत्तेः प्रागेव किं बाध्य किं नेत्याकांक्षायां कलाविस्यस्य प्रवृत्तेरुभयविषयेपि कलाविस्यस्य नियमविधित्वोपपत्तेः। अत एव
मीमांसकानां मौलेवशेषाकूत वैकल्पिकव्रीहियवन्यापकातिदेशकस्य कल्प्यायप्रवृत्तेः प्रागेव क्रियाविधौ किमिह द्रव्यं सा
धनमित्याकांक्षावेलायां प्रवृत्तो मुद्गविधिर्नियमविधिरेवेष्टः। एवं च कलौ पाराशराः स्मृता इति यथैतद्व्यतिरिक्तैः पराशरी
यसामान्यविधिभिः स्तेयान्यमहापातकेस्तेनव्यतिरिक्तस्मृत्यन्तरविशेषविधिबाधार्थं प्रवर्तते तथास्तेनादिसामान्यविधि
नास्तेयान्ये(?) स्मृत्यन्तररूपस्य विशेषविधेर्बाधार्थं प्रवर्त्तते. न चात्र सति क्रियाविरोधः स्याद्ध्यापाध्ययनविधिवदुपप
त्तेः यथा सौ विशेषरूपेण प्रमापकः स्वाध्यायस्य सामान्यरूपेण च प्रमेयः एवं कलौ पाराशराः स्मृता इत्ययं विधिर्वि १४८

शेषरूपेण स्वयं प्रमापकः पराशरसंहितत्वसामान्यरूपेणाव प्रमेयइति यत्तत्र दूषणमुक्तं. कलाविति स्मृत्या स्तेयान्ये
तिस्मृतेर्बाधे तस्याविषयान्तरासंभवादप्रामाण्यापत्तिरिति. तन्न. एवमपि न दोषः। यथा हि औदुंबरीं स्पृष्ट्वोद्गायेदि
ति श्रुत्या बाधितौदुंबरीसर्ववेष्टितव्येति स्मृतेर्विषयान्तराभावादप्रमाणं भवत्येवमत्रापीति. न्यायसुधाकरस्तु ई
दृशे विषये बाधितस्य प्रमाणस्यार्थान्तरे तात्पर्यं कल्प्यमित्याह. तत्रौदुंबरी सर्ववेष्टयितव्येत्यत्र दर्शं गुत्सानि मु
क्त्वा सर्ववेष्टयितव्येति तात्पर्यं कल्प्यं. तथा मातुलकन्यापरिणये देशभेदेन स्मृत्याचारयोः प्रामाण्यव्यवस्थेत्यापस्तंबस्मृ
तिव्याख्याने(?) दूपक्षमुक्त्वा वार्तिककृता इतरदुत्तरस्मिन्कुर्यान्न द्व्यतिनेतरस्मिन्देश प्रामाण्यादित्यादिबोधायनस्मृत्यापस्तं
बमतमुपन्यस्य पूर्वं निरस्तमिति यदुक्तं बौधायनस्मृत्यापस्तंबस्मृतिबाधउक्तेन्यायसुधाकृता बाधितायाआपस्तंबस्मृ
तेर्विगानाविगानपरत्वं वर्णितं. एवमिहापि बाधितायाः स्तेयान्यमहापातकनिष्कृतिरितिस्मृतेस्तथो श्रुतादर्थादर्था
न्तरपरत्वं कल्प्यं. तथाहि. स्तेयान्यमहापातकनिष्कृतिः संसर्गे उपदेशी वा वर्ज्यास्तेयान्यमहापातकनिष्कृतौ कृमाया
मपि संसर्गो न कार्यस्त्यै(?)स्तावानिष्कृतिर्नोपदेष्टव्या इत्यर्थः। ननु कलौ पाराशराः स्मृता इत्यस्यैवमापस्त्विन्नोपदे

१४९ शूद्रादौ पातित्ये कस्माच्चित्स्मृतेर्वचनेऽप्यसत्के द्(?)पमेव स्मृतिरूपायत्वेनादर्तव्या नान्येत्येवं नियमपरता किं न स्यादिति चे
त् । न । विनिगमकाभावात् । स्मृतिस्वरूपपरत्वसंभवे तदर्थपरत्वानुपपत्तिर्विनिगमकमिति चेन्न । अर्थोपदेशार्थो
नुष्ठानेऽपि स्मृतिस्वरूपस्येव उपायत्वेन नियमोपपत्तेः । अनयैव स्मृत्यार्थमनुतिष्ठेन्नान्ययेति । यद्येवं कलौ पाराशराध
र्मा इत्यनेन कलिं प्रकृत्य पराशरस्मृतित्वं पुरस्कृत्य प्रवृत्तेर्विशेषशास्त्रेण कलिमात्रे पुरस्कृत्य प्रवृत्तेः सामान्यशास्त्र
स्य स्तेयान्यमहापातकानि कलिरित्यस्य स्मृत्यन्तरस्य बाध इति प्रसंगः । कन्यानामसवर्णानां विवाहश्च द्विजातिषु । तथा दत्तौर
सेतरेषां तु पुत्रत्वेन परिग्रहः । तथासवर्णान्यांगनादुष्टैः संसर्गः शोधितैरपि । तथा आपद्वृत्तिर्द्विजाग्र्याणां [illegible]नाम्यम
कलिनिषिद्धवचनानि सामान्यशास्त्राण्येवापद्यास्त्वे असवर्णानामिति सामान्यशब्दात् । दत्तौरसेतरेषामिति
सामान्यशब्दात् । तृतीये सवर्णान्याः असवर्णायांगनायास्ताभिर्दुष्टैस्तत्संस्पृष्टैरिति सामान्यशब्दात् । चतुर्थे आ
पद्वृत्तिरिति कुसीदादिवाचकात्सामान्यशब्दात् । मैवं । तत्र चतुर्थे प्रसंगे आपद्वृत्तिर्द्विजाग्र्याणामित्यत्र चतुर्थ
इति प्रसंगे तावदिदानीं उपपत्तिरेवोत्तरं । पराशरस्मृतौ हि द्वितीयाध्याये स्वयं कृषेत्तथा क्षेत्रं धान्यैश्चस्त्ययनार्जितैः । निर्वपेत्संच १४९

यतांश्च क्रतुदीक्षांश्च कारयेत् । तिलान् रसान्न विक्रेयान् धान्यं तत्समं । विप्रस्येवंविधा वृत्तिस्तृणकाष्ठादिविक्रयः । इत्येवं
या आपद्वृत्तिर्ब्राह्मणमेव प्रति तृणकाष्ठादिविशेषरूपेण व्याख्याता । कृतायेव कलौ पाराशरत्वेन दाक्ष्यवशात्कलिविष
यतया प्रवृत्तया आपद्वृत्तिर्द्विजाग्र्याणामित्येतद्बाध्यते । अतस्तत्पराशरानुक्तब्राह्मणविषया कुसीदक्षात्रवृत्त्या
आपद्वृत्तिविषयं भवति । द्वितीयादिप्रसंगेषूत्तरमुच्यते । दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रह इति कलिविषयमपि द
त्तौरसेतरत्वेन प्रवृत्तेः सामान्यवाक्यं तत्पराशरस्मृत्या कलौ पाराशरा इत्यनया बाध्यतां । न तया बाधः स्यादपरिमितिपराशरे
ण विशेषतो द्वादशविधपुत्राणां लक्षणतः कर्तव्यतयोपनिबंधनं । क्रियेतानुतादलि । तन्नेतरेषां तन्मैव निबंधः । चसारस्तु
पनिबंधाश्चतुर्थेध्याये । औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः इत्यत्रापि औरसस्यापि प्रसिद्धत्वान्मुख्यत्वाच्च
लक्षणकरणोपेक्षा क्षेत्रजकृत्रिमयोरन्येषां कर्तव्ये लक्षणेनाकरणाद्दत्तकस्य च तु दद्यान्माता पिता वा यं स पुत्रो दत्तकोभ
वेदित्युत्तरार्धे लक्षणाकरणात्तस्येव कर्तव्यताभिप्रेतेति गम्यते तावदेव । अतोऽत्र संवादेऽपि च पराशरस्मृतेर्दत्तौरसेतरेषामित्य
नेन विरुद्ध इति न द्वितीयादिप्रसंगः । आद्ये प्रसंगेऽप्युत्तरमुच्यते । कन्यानामसवर्णानां विवाहश्च द्विजातिष्विति यस्य कलौ

१५० पाराशरा धर्मा इत्यमयापाराशरस्यस्यात् तदा बाधः स्यात्· यदि पराशरेण तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रममिति च
अनुलोमविवाहा निबद्धास्युर्न तु तदरलि· यत्तु पराशरेणैकादशेऽध्याये उक्तं· दासनापितगोपालकुलमित्रार्धसीरिणः।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्· शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः। असंस्काराद्भवेद्दासः संस्का
राद्देवनापितः। क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु यः सुतः। स गोपाल इति ज्ञेयो भोज्यो विप्रैर्न संशयः। वैश्यकन्यास
मुत्पन्नो ब्राह्मणेन तु संस्कृतः। स ह्यार्धिक इति ज्ञेयो भोज्यो विप्रैर्न संशय इति· तत्र न विवाहविधिरस्ति किंतु जातिमात्रमुक्तं।
तत्र दासनापितादिजातिचतुष्टयं द्वापरे ब्राह्मणादिभिरूढायां शूद्रादिकन्यायामुत्पन्ने मूलपुरुषे ततः संततिपुरुषेषु कलियुगेषु
तिष्ठति· अतस्तत्स्वामिकान्नभक्षणाभ्यनुज्ञाविधिर्दासादिजात्युत्पत्तिश्च पराशरीया कन्यानामसवर्णानां विवाहश्च द्विजा
तिष्विति कलिविषयनिषेधाबाधेनाप्युपपन्नेति· तृतीयस्त्विति प्रसंगो नास्त्येव· न हि सवर्णास्त्यागनादुष्टैः शोधितैः सह संसर्गः
सामान्यतो विशेषतो वा पराशरेण क्वचिदप्युक्तः· कर्तव्यतयायः सवर्णास्त्यागनादुष्टैः संसर्गः शोधितैरपीति कलिनिषिद्धेषु
पठितस्य निषेधस्य बाधकः स्यादिति· नन्वेवमपि कलिपुरस्कारेणापि निषिद्धेषु सामान्यतः पुनर्भूनिषेध उक्तः। ऊढाया १५०

पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा· कलौ पंच न कुर्वीत भ्रातृजायां कमंडलुमिति· तस्य· नष्टे मृते प्रव्रजिते क्लीबे च पतिते
पतौ· पंचस्वापत्सु नारीणां पतिरन्यो विधीयत इत्यनेन चतुर्थाध्याये पराशरोक्तेन विशेषाभ्यनुज्ञानेन कलौ पाराशराध
र्मा इत्येतद्वशात्कलिविषयेण बाधाद् ऊढायाः पुनरुद्वाहमिति पंचविधपुनर्भूव्यतिरिक्तविषयं प्रसज्येतेति चेत्· मैवं· अत्र
स्मत्सुहृद्दामोदरभट्टकृते स्मृत्युक्तद्वैतनिर्णयस्य परिशिष्टे दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य चेति कलिनिषेधव्याख्या
नेउक्तं· कन्या अक्षतयोनिः दत्ताक्षतायाः इति वचनात्· कन्येति विशेषणेन दानयोग्यतायामपीदमयुक्तं· दानमन्यस्मै पति
पादनं पुनर्दानं परस्य चेति वचनात्· अतएवमाधवेन· वरश्चेत्कुलशीलाभ्यां न युज्येत कथंचन· न मंत्राः कारणं तत्र न च क
न्यानृतं वदेत्· समाक्षिप्य तु तां कन्यां बलादक्षतयोनिकां· पुनर्गुणवते दद्यादिति शातातपोऽब्रवीदिति वाक्ये नोढायाः पुनरु
द्वाहमाशंक्य युगांतरविषयत्वेन समाहितं· अयं च न देवराय दाननिषेधः। पूर्वोक्तेन पौनरुक्त्यात् अत्र यद्यपि विज्ञानेश्वरे
पादत्तामपि हरेत्पूर्वी चेच्छ्रेयांश्च द्वार आव्रजेदित्यत्र इदं च सप्तमपदात् प्राग्द्रष्टव्यमित्युक्तं· तेन सप्तपदोत्तरं पुनर्दानस्य
कलौ निषेधे वैयर्थ्यं तथापि दानोत्तरं सप्तमपदात्प्राक् यदन्यस्मै दानमुक्तं तत्कलौ निषिध्यत इति ध्येयमिति· ततश्च तस्य बा

१५१ धोमादसांक्षीत् ब्राधोस्यागमिरिति नष्टे मृते प्रव्रजिते क्लीबे च पतिते पञ्चावितिपराशरवाक्यस्यार्थांतरं कार्यं· अस्ति हि पति
शब्दः स्वामिवचनोपि भुवः पतिरित्यादिप्रयोगात्· अस्ति च विवोढृवचनोपि· न चेह भार्यादिप्रतिसंबंध्युपादानमस्ति येन
विवोढृवचन एव गृह्येत अतो व्याधपरिहाराय च पतिरन्यो विधीयत इति· स्वामिवचन एवायं पतिशब्द इति न विरोधः। यास्य
माधवेन युगांतरपरत्वेन व्याख्यातास्तान युक्ताः· कलौ पाराशरा धर्मा इत्यस्य विशेषविधेर्जागरूकत्वात्· योपि व्यवस्था हे
तुत्वेनोक्त ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा· कलौ पंच न कुर्वीत भ्रातृजायां कमंडलुमित्यादिपुराणवाक्यं· तदप्य
युक्तं· अस्य नष्ट इत्यादिपराशरवाक्यस्य च क्रियाविशेषपुरस्कारेण कलिपुरस्कारेण च प्रवृत्तत्वाविशेषेप्युत्तरस्य कलौ
पाराशरा इति पाराशरत्वेन विशेषाद्बाधकत्वं स्यात्· वस्तुतस्तु नष्टः स्यादेः स्वरूपतोपि बलीयस्त्वं प्रतीयते नु ऊढायाः पुन
रुद्वाहमिति सामान्यात् नष्टे दिपंचकस्य तु तद्विशेषत्वात्· तस्मान्नष्ट इत्यादेरेव कलौ पाराशरा इत्येतदेकवाक्यताप
न्नस्य हि धाविशेषविधित्वादूढावाक्यबाधकत्वमेव न्याय्यं प्रसज्येत तेनोक्तविपरीतमित्यस्मदुक्तव्याख्यामेव पराशर
वाक्यस्यान्यथानयनं युक्तमिति सर्वं समंजसं· इति श्रीमत्सदवाक्यप्रमाणपारावारीणधुरीणभट्टशंकरकृतौ १५१

तनिर्णये स्तेयान्यमहापातकमिश्रसंशयोद्देदपरिच्छेदः॥ ॥स्तेयान्यमहापातकनिष्कृतिरिति निषेधार्थे निरूपिते द्रव्य
मानविधयोपि तद्घातिरिक्तनिषेधार्था इति निरूप्यंते· अथ द्रव्यमानद्वैतनिर्णयः याज्ञवल्क्यः॥ जालसूर्यमरीचिस्थं त्रसरेणुर
जः स्मृतं· अष्टौ ते लिक्षा तु तास्तिस्रो राजसर्षप उच्यते· गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः। कृष्णलः पंच ते माषस्ते सुव
र्णस्तु षोडश· पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितं॥ सुवर्णमानान्युक्त्वा रजतमानान्याह· द्वे कृष्णले रूप्यमाषो धरणं षो
डशैव ते· शतमानं तु दशभिर्धरणैः पलमेव तु· निष्कः सुवर्णाश्चत्वार इति· ताम्रमानमाह· कार्षिकस्ताम्रिकः पण इ
ति· तत्र हि कृष्णल इत्यारभ्य निष्कः सुवर्णाश्चत्वार इत्यंतं रजतपरिमाणपरिभाषापरतया व्याख्यातवान्विज्ञानेश्वरः। त
दा च शतमानपक्षे निष्कशब्दा रजतविषयाः पर्याया भवंति· पलशब्दश्च रजतविषयोपि हेमविषयश्चतुःसौवर्णिकपलप
क्षसंवाद एव संपद्यते· तथा हि· सुवर्णपूर्वोक्ताः एव हेमोक्ताः। तेन पंचकृष्णलात्मकमाषषोडशात्मकसुवर्णेऽशीतिः कृष्णला
निति सुवर्णचतुष्के चतुर्गुणा अशीतिः कृष्णलानि भवंति· तानि विंशत्युत्तरत्रिशती· ३२०। धरणे च राजतद्विकृष्णलकमाषषो
डशात्मके द्वात्रिंशत्कृष्णलानि· ३२। तादृग्विध धरणदशकात्मके च शतमानपर्याये राजतपलेपि दशगुणिता द्वात्रिंश

१५२ स्कृष्णलानि विंशत्युत्तराणि शतान्येव भवति। अमुमेवार्थं निष्कमभिप्रेत्य संविद्व्यतिक्रमाख्यविवादपदे मनुना दंड उक्तः। यो ग्राम
देशसंघानां कृत्वा सत्येन संविदं। विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत्। निगृह्य दापयेदेनं समयव्यभिचारिणं। चतुः
सुवर्णान् षण्निष्कान् शतमानं च राजतमिति। अत्र निर्यासं न चतुःसुवर्णषण्निष्कशतमानात्मकं दंडत्रयं तारतम्यपरिमाणे
पुशतमानपर्यायाणां निष्काणां षड्गुणितो यो दंडो द्वितीयाच्चतुःसुवर्णान्न्यूनश्चतुर्थांशोत्कृष्टश्च तेन मानादपि को भवति
तेन युज्यते। तन्मेदकः शतं दंडो लोहितस्य चेदं शकृत्। मासं पश्यन्नाच षण्निष्काश्च वास्तव्यस्थिभेदकरति मनुवाक्ये विशतमा
नपर्याय एव निष्को गृह्यते। तथा रूप्याध्यक्षस्तु नैष्किक इति त्रिकांडीव्याख्याने तत्र निष्कुरूपस्य धैर्यस्मलिवला द्रूप्यधातुसा
मान्यवाचीति निष्कशब्दः सुवर्णं। तथाहि निष्कशब्दोऽयं मानार्थः। साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले। दीनारेऽपि च निष्को
स्त्रीति त्रिकांडीनामधारणात्। तत्र सुवर्णशब्दो रूप्यरक्तिकारूप्यमाषपरिमाणसुवर्णवचन इति रायमुकुटः। मिता
क्षरायां तु चतुःसौवर्णिको निष्क इत्यत्र पंचकृष्णलकमाषषोडशकरूपसुवर्णशब्दस्य परिमाणितत्वात्तावत्परिमाणकर
जतं चतुष्टयग्रहणोक्तेः साष्टशते सुवर्णानामित्यस्यापि सुवर्णशब्दः पंचकृष्णलकमाषषोडशकपरिमाणे रजतप १५२

रणेयेति कर्कस्तु वाजपेये सप्तदश निष्कव्यवस्था चतुःसौवर्णिको निष्क इति हिरण्यप्रस्तरादिव्याख्यानकारः। मुक्तं चैतन्म
नुना तत्पलाभ्यां सुवर्णरूप्यपरिमाणोपक्रांतेऽभिधानादुभयविषयत्वस्यापि संभवात्। अत एव मनिहेम्नुना जालस्था
न्मरीचिगतं रजस्त्रसरेणुसंज्ञं। तदष्टकं लिक्षा। तत्त्रयं राजसर्षपः। तत्त्रयं गौरसर्षपः। ते षट् यवः। तत्त्रयं कृष्णलः। तत्पंच
कं माषः। तद्द्वादशकमक्षार्धं। सच तुर्माषिकं सुवर्णं। तच्चतुःसौवर्णिको निष्क इति सुवर्णपरिमाणवचनेन निष्कशब्दमुक्त्वा द्वे
कृष्णले रूप्यमाषकः। ते षोडश धरणमिति रजतपरिमाणं मुक्तं। निष्कशब्दस्य दीन -- पिवाचकउत्तरत्रिकांडेऽ। तत्र दीनार
रपरिमाणं हेमाद्रौ द्विधोक्तं तत्र व्रतखंडे विष्णुगुप्तः। दीनारो रूपकेरष्टाविंशत्यापरिकीर्तितः। सुवर्णसप्तति मो भागो
रूपक इष्यत इति। दानखंडे तु कात्यायनः। माषो विंशतिभागस्तु ज्ञेयः काकिणिविंशत्पणास्तदपि यास्तु पंचालतो न्यूना
दश कार्षापणा मत्स्य मित्यनुपपन्नं। तस्मादिह कात्यायननारदोक्तो दशार्धपूर्वकात्मको षष्ठपूर्वकात्मक एव वा कार्षापणो
विवक्षित इति। हरदत्तस्तु गौतममिताक्षरायां च तु चतुःकृष्णलो माष इति प्रतिपादनार्थं मुशल्यो वाक्ये मुराजहारः। माषो विंशति
भागस्तु ज्ञेयः कार्षापणस्तु सः। कृष्णलस्तु चतुर्थोंऽशो माषस्येह प्रकीर्तित इति। द्वादशे प्राप्ते एतत्पूर्वार्धं तु स्यपूर्वा

धन्वेद्रमादिदानस्वंउारयंकास्थापनं वाक्यमपि दूर्वमुदाहृतं· तेन पंच कृष्णलकं वक्तुः कृष्णलको पिमाषइति सिद्धं। सतु सिं
धुषष्ठेरावस्यादिकपंचनपवच्छिन्नप्रदेशविषयो नान्यत्रेत्युरहंमाकः इति श्रीमत्सद्वाक्यप्रमाणपारावारीणधुरीण
मीमांसाद्वैतसाम्राज्यधुरंधरश्रीमद्रुद्रनारायणात्मजभट्टशंकरकृते धर्मद्वैतनिर्णये सुवर्णादिपरिमाणसंशयोच्छेदपरि
च्छेदः समाप्तः॥ ॥शुभंभवतु॥ ॥श्रीरस्तु॥